विरेचन, वमन, अञ्जन, नस्य, धूपन/धूमपान, अनुवासन वस्ति, शिरावेध/रक्तस्रावण, संशमन (शमन उपचार), प्रदेह, अभ्यंग, अवगाहन, शीतल उपचार, कृष्णसार मृग, मृग, हरिण, मयूर, लावपक्षी-लाभेचरो, खरायो, तित्तिरि-तित्रो, कुखुरा, क्रौञ्च-कन्याङकुरुङ, कुलिंग-जंगली भँगेरो, पृषत (मृग, चितल), चखेवा, कपिञ्जल (गौरतित्तिरः, तित्रोको एक प्रकार), वर्त्तक-बट्टाइ, कालपुच्छ (मृगविशेष, वारहसिंगे), गाईको दुध, गाईको घिउ, बाखाको दुध, बाखाको घिउ, हर्रो, पहाडी झरनाको स्वच्छ पानी, एरण्डतैल-अडिरको तेल, सेतो चन्दन, पहिले बताइएका पुराना शाली षष्टिक आदि पथ्य आहारहरू, चन्द्रमाको किरण, प्रियतमसितको आलिंगन यी आहारविहार पुराणज्वर (पुरानो ज्वरो)[६] लागेका व्यक्तिहरूका लागि हितकारक छन् ॥८-११॥

५ मध्य ज्वर = एक हप्तापछि तीन हप्तासम्म आइरहेको ज्वरो ।
६ तीन हप्ता नाघेपछि पनि आइरहेको ज्वरो ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अभिघातक्षतव्रणजज्वरचिकित्सितम्–

अभिघातसमुत्थाने पानाभ्यंगौ च सर्पिषः।

क्षतजे व्रणजे चापि क्षतव्रणचिकित्सितम् ॥१२॥

अन्वयः

अभिघातसमुत्थाने च सर्पिषः पानाभ्यंगौ, क्षतजे व्रणजे चापि क्षतव्रणचिकित्सितम् ॥१२॥

भावार्थः

अभिघातले[७] गर्दा भएको आगन्तुज ज्वरमा घृतपान र घृतको अभ्यंग गर्नुपर्दछ। क्षतज र व्रणज ज्वरमा क्षत र व्रणको चिकित्सा गर्नुपर्दछ अर्थात् क्षतज ज्वर भए क्षतचिकित्सा र व्रणज ज्वर भए व्रणचिकित्सा गर्नुपर्दछ ॥१२॥

ओषधिगन्धाभिशापाभिचारोत्थे–

ओषधीगन्धजे कर्म कुर्यात् पित्तप्रसाधनम्।

अभिशापाभिचारोत्थे जपहोमादिभेषजम् ॥१३॥

अन्वयः

ओषधिगन्धजे पित्तप्रसाधनम् कर्म कुर्यात्, अभिशापाभिचारोत्थे जपहोमादिभेषजम् ॥१३॥

भावार्थः

ओषधिगन्धज[८] ज्वर भए पित्तशामक कर्म गर्नुपर्दछ। अभिशाप[९] र अभिचारका[१०] कारणले आएको ज्वर भए जप, होम आदि नै औषधि हुन् ॥१३॥

उत्पातग्रहपीडा-क्रोधोत्थिते–

उत्पातग्रहपीडोत्थे दानस्वस्त्ययनादयः।

क्रोधोत्थिते पित्तहरं कामक्रोधज एव च ॥१४॥

---

७ चोटपटक र घाउ आदिले गर्दा हुने ज्वर।

८ धौषधिको गन्धले हुने ज्वर।

९ अभिशापोत्थः स्रापले गर्दा आउने ज्वर।

१० अभिचारोत्थः अभिचार, भ्रारफुक टुनामुना आदि अभिचारको कारणले गर्दा आउने ज्वर।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अन्वयः

उत्पातग्रहपीडोत्थे दानस्वस्त्ययनादयः, क्रोधोत्थिते कामक्रोधजे च पित्तहरम् एव ॥१४॥

भावार्थः

ग्रहहरूका उत्पातका कारणले भएको पीडाबाट आएको ज्वरमा दान र शान्तिस्वस्ति गर्नुपर्छ। क्रोधबाट उठेको ज्वर भए पित्तनाशक क्रिया गनुपर्दछ, कामजनित क्रोधबाट आएको ज्वर भए पनि पित्तनाशक उपचार गर्नुपर्दछ ॥१४॥

कामशोकसमुद्भूते–

कामशोकसमुद्भूते सर्वा वातहरी क्रिया।
आश्वासनं चेष्टकामो हर्षदायीनि यानि च ॥१५॥

अन्वयः

कामशोकसमुद्भूते सर्वा वातहरी क्रिया, आश्वासनं च, इष्टकामः, यानि हर्षदायीनि च ॥१५॥

भावार्थः

कामको अतृप्तिले भएको, शोकबाट पैदा भएको ज्वरमा सबै वातहर क्रिया गर्नुपर्दछ। त्यसैगरी आश्वासन, इष्ट कामनाको पूर्ति तथा जे जे उपायहरू हर्षदायी हुन्छन् ती उपायहरू पनि गर्नुपर्दछ ॥१५॥

पुनश्च–

विशेषतः पुनश्चात्र कामक्रोधसमुत्थिते।
भयशोकसमुद्भूते कामक्रोधोक्तमौषधम् ॥१६॥

अन्वयः

पुनः कामक्रोधसमुत्थिते, भयशोकसमुद्भूते चात्र विशेषतः कामक्रोधोक्तं औषधम् ॥१६॥

भावार्थः

फेरि भन्नुपर्दा कामक्रोधसमुत्थित ज्वर र भयशोकसमुत्थित ज्वरमा विशेषतः कामक्रोधोक्त ज्वरमा बताइएकै उपचार उचित हुन्छन् ॥१६॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भूताभिषंग-मनःक्षोभसमुद्भूते–

भूताभिषंगजे भूतबन्धावेशनताडनम् ।

मनःक्षोभसमुद्भूते मनसः सान्त्वनानि च ॥१७॥

अन्वयः

भूताभिषंगजे भूतबन्ध-आवेशन-ताडनम्, मनःक्षोभसमुद्भूते च मनसः सान्त्वनानि ॥१७॥

भावार्थः

भूताभिषंगज ज्वरमा भूतबन्ध[११], आवेशन[१२] र ताडन[१३] गर्नुपर्दछ । मनमा क्षोभ भएर उठेको ज्वरमा मनलाई सान्त्वना दिने गर्नुपर्दछ ॥

सर्वज्वरहरवर्गः–

इत्यागन्तुज्वरे पूर्वैर्भिर्षग्भिः पथ्यमिष्यते ।

विष्णोर्नामसहस्राणां पठनं श्रवणं श्रुतेः ॥१८॥

देवानां ब्राह्मणानां च गुरूणामपि पूजनम् ।

ब्रह्मचर्यं जपो होमः प्रदानं नियमो यमः ॥१९॥

साधूनां दर्शनं सत्यं रत्नौषधिविधारणम् ।

मंगलाचरणं चेति वर्गः सर्वज्वरान् जयेत् ॥२०॥[१४]

अन्वयः

पूर्वैर्भिषग्भिः आगन्तुज्वरे इति पथ्यम् इष्यते । विष्णोर्नामसहस्राणां पठनम्, श्रुतेः श्रवणम्, देवानां ब्राह्मणानां च गुरूणामपि पूजनम्, ब्रह्मचर्यम्, जपः, होमः, प्रदानम्, यमः, नियमः, साधूनां दर्शनम्, सत्यम्, रत्नौषधिविधारणम्, मंगलाचरणं च इति वर्गः सर्वज्वरान् जयेत् ॥१८-२०॥

---

११ मन्त्रद्वारा भूत-प्रेतको बन्धन गर्नु, बाँध्नु ।

१२ भूतप्रेतको आवेशन अर्थात् ढाक्नु, छोप्नु ।

१३ ताड्नु ।

१४ चरदलतरुसेवा होममन्त्रस्त्रिनेत्रद्विजगुरुजनसेवा विष्णुनाम्नां सहस्रम् ॥ मणिधृतिरपि दानान्याशिषस्तापसानां सकलमिदमरिष्टं युक्तमष्टज्वराणाम् ॥ इति पाठोऽपि ग्रन्थान्तरे दृश्यते ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भावार्थः

आगन्तुकज्वरमा पूर्वाचार्यहरूले यी पथ्यहरू बताइदिएका छन्। खास गरी विष्णुसहस्रनामको पाठ; वेदको श्रवण; देवता, ब्राह्मण र गुरूहरूको पूजन; ब्रह्मचर्य, जप, होम, दान, यम, नियम, साधुहरूको दर्शन, सत्य, रत्न र औषधिहरूको धारण, मंगलाचरण यी उपायहरूले सबै किसिमका ज्वरहरूमा विजय प्राप्त हुन्छ ॥१८-२०॥

ज्वरेऽपथ्यानि–

वमिवेगं दन्तकाष्ठमसात्म्यमतिभोजनम्।
विरूद्धान्यन्नपानानि विदाहीनि गुरूणि च ॥२१॥
दुष्टाम्बुक्षारमम्लानि पत्रशाकं विरूढकम्।
ललदम्बु[१५] च ताम्बूलं कालिगं लौकुचं फलम् ॥२२॥
तोडी मत्स्यं[१६] च पिण्याकं नवान्नं पिष्टवैकृतम्।
अभिष्यन्दीनि चैतानि ज्वरितः परिवर्जयेत् ॥२३॥

अन्वयः

वमिवेगम्, दन्तकाष्ठम्, असात्म्यम्, अतिभोजनम्, विरुद्धान्यन्नपानानि, विदाहीनि, गुरूणि च, दुष्टाम्बु, क्षारम्, अम्लानि, पत्रशाकम्, विरूढकम्, ललदम्बु च, ताम्बूलम्, कालिंगम्, लौकुचं फलम्, तोडी मत्स्यं च, पिण्याकम्, नवान्नम्, पिष्टवैकृतम्, अभिष्यन्दीनि च एतानि ज्वरितः परिवर्जयेत् ॥२१-२३॥

भावार्थः

वमनको वेग, दतिउन, असात्म्यभोजन, अतिभोजन, विरुद्ध अन्नपान, विदाही र गुरु (भारी, गरिष्ठ) अन्नपान, दूषित जल, क्षार, अमिलो, पत्रशाक, विरुढक (टुसा उमारेको अन्न), ललदम्बु (कागती, भकमिलो, अमिली आदि मुख रसाउने फलको रस), पान, कालिंग (तरबुजो), बडहर, तोडीमत्स्य (तोडी नामक माछा), पिना, नयाँ अन्न, पिष्टविकार र अभिष्यन्दी पदार्थहरूलाई ज्वरपीडितले परहेज गनुपर्दछ ॥२१-२३॥

---

१५ नलदाम्बु इति च पाठान्तरम्।

१६ ओडी मत्स्यमिति भैषज्यरत्नावल्याम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ज्वरमुक्तस्यापथ्यानि–

व्यायामं च व्यवायं च स्नानं चंक्रमणं तथा ।

ज्वरमुक्तो न सेवेत यावन्नो बलवान् भवेत् ॥२४॥

अन्वयः

ज्वरमुक्तः यावत् नो बलवान् भवेत् (तावत्) व्यायामं च, व्यवायं च, स्नानं तथा चंक्रमणं च न सेवेत ॥२४॥

भावार्थः

ज्वरोले छोडेको मानिसले जबसम्म बलवान् हुँदैन तबसम्म व्यायाम, व्यवाय (मैथुन) स्नान र चंक्रमण (पैदल भ्रमण, टहल्नु) गर्नुहुँदैन ॥२४॥

इति ज्वरे पथ्यापथ्यविधिः ॥१॥

यति ज्वरमा अपनाउनुपर्ने पथ्यापथ्यविधि बताइयो ॥१॥

◆◆◆

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

२
अथातीसारे पथ्यापथ्यविधिः

अतिसारे पथ्यानि–

वमनं लंघनं निद्रा पुराणाः शालिषष्टिकाः ।
विलेपी लाजमण्डश्च मसूरतुवरीरसाः ॥१॥
शशैणलावहरिणकपिंजलभवा रसाः ।
सर्वे क्षुद्रझषाः शृंगी डिंडिशो[१७] मधुरालिका ॥२॥
तैलं छागघृतक्षीरं दधि तक्रं गवामपि ।
दधिजं वा पयोजं वा नवनीतं गवाजयोः ॥३॥
नवं रम्भापुष्पफलं क्षौद्रं जम्बुफलानि च ।
भव्यं महार्द्रकं विश्वं शालूकं च विकंकतम् ॥४॥
कपित्थं वकुलं बिल्वं तिन्दुकं दाडिमद्वयम् ।
तालकं कञ्चटदलं चांगेरी विजयारुणा ॥५॥
जातीफलं सफेनं[१८] च जीरकं गिरिमल्लिका ।
कुस्तुम्वुरूर्महानिम्बः कषायः सकलो रसः ॥६॥
अन्नपानानि सर्वाणि दीपनानि लघूनि च ।
नाभेर्द्व्यंगुलतोधस्ताच्छस्त्रेणार्द्धेन्दुवद्दहेत् ॥७॥
तथा वंशास्थिमूलेपि[१९] पथ्यवर्गोऽतिसारिणाम् ॥७.५॥

अन्वयः

वमनम्, लंघनम्, निद्रा, पुराणाः शालि-षष्टिकाः, विलेपी, लाजमण्डश्च, मसूरतुवरीरसाः, शशैणलावहरिणकपिंजलभवा रसाः, सर्वे क्षुद्रझषाः, शृंगी, डिंडिशो, मधुरालिका, तैलम्, छागघृतक्षीरम्, दधि तक्रं गवामपि, दधिजं वा पयोजं वा नवनीतं गवाजयोः, नवं रम्भापुष्पफलम्, क्षौद्रम्, जम्बुफलानि च, भव्यम्, महार्द्रकम्,[२०] विश्वम्, शालूकम्, च विकंकतम्, कपित्थम्, वकुलम्, बिल्वम्, तिन्दुकम्, दाडिमद्वयम्, तालकम्, कञ्चटदलम्, चांगेरी, विजया, अरुणा, जातीफलम्, सफेनं च, जीरकम्, गिरिमल्लिका, कुस्तुम्बुरुः, महानिम्बः, कषायः सकलो रसः, अन्नपानानि सर्वाणि दीपनानि लघूनि च, नाभेर्द्व्यंगुलतोधस्ताच्छस्त्रेणार्द्धेन्दुवद्दहेत् ? तथा वंशास्थिमूलेपि (दहेत्)अय अतिसारिणाम् पथ्यवर्गः ॥१-७.५॥

---

१७ खुड्डीशः इति शब्दकल्पद्रुमे । खल्लीशः इति भैषज्यरत्नावल्याम् ।

१८ जातीफलं च ह्रीबेरं इति भैषज्यरत्नावल्याम् ।

१९ .....शस्त्रेणार्द्धशशांकवत्, दाहो वंशास्थिमूले च.....इति भैषज्यरत्नावल्याम् ।

२० महार्द्रकमिति महत् आर्द्रकम्, वनार्द्रकम् । अस्य गुणाः अग्निदीपनत्वं, धारकत्वं, रुक्षत्वं वायुकफनाशित्वञ्चेति शब्दचन्द्रिकायाम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भावार्थः

वमन, लंघन, निंद्रा, शाली र षष्टिक जातका पुरानो धानको चामलका परिकार, विलेपी, धानका लावा हालेर बनाइएको लाजमण्ड, मुसुरोको र अरहरको दाल, खरायो, मृग, हरिण, लाभे, तित्रो यिनीहरूका छुट्टाछुट्टै तयार पारिएका रसहरू, ससाना माछाहरू, शृंगीमाछा, डिण्डिश माछा, मधुरालिका (एक किसिमको समुद्री माछो) तिलको तेल, बाखाको दुध, बाखाको घिउ, गाईको दही र मही, गाई र बाखाको दुधबाट निकालिएको र दही मथेर निकालिएको नौनी, ताजा केराको बुंगो र काँचो फल, मह, जम्बुफल (जामुन), भव्य (लिच्ची)[२१], महार्द्रक (वनार्द्रक/बन अदुवा), शुठो, कमलकन्द, मयल, कयेथ (अमिलो बेल), मौलसिरी, बेल, तिन्दुक (तिदू, हलुवावेदजस्तो एक किसिमको फल, खल्लुक) दाडिमद्वय (अनार र दारिम) ताड र ताडी, कञ्चटदल[२२], चांगेरी, विजया (भाँगो/भाङ), अरुणा (मञ्जिष्ठा/मजिठो), जाईफल, सफेन (अहिफेन/अफीम), जीरा, गिरिमल्लिका (कुटज)[२३], धनियाँ, बकाइनो, सबै किसिमका टर्रो स्वाद भएका द्रव्यहरू, दीपन र लघु गुण भएका खानेकुराहरू, नाभिदेखि दुई अंगुलमुनि अर्द्धचन्द्राकारमा गरिने दहनकर्म तथा पृष्ठवंशको मूलमा गरिने दाह यी सबै अतिसार (पखाला) लागेका रोगीहका लागि पथ्य हुन् ॥१-७.५॥

अतिसारेऽपथ्यानि–

स्वेदोञ्जनं रूधिरमोक्षणमम्बुपानं स्नानं व्यवायमपि जागरधूमनस्यम् ।
अभ्यञ्जनं सकलवेगविधारणं च रूक्षाण्यसात्म्यमशनं च विरुद्धमन्नम् ॥८॥
गोधूममाषयववास्तुककाकमाचीनिष्पावकन्दमधुशिग्रुरसालपूगम्[२४] ।
कुष्माण्डतुम्बिबदरं गुरु चान्नपानं ताम्बूलमिक्षुगुडमद्यमुपोदिका च ॥९॥
द्राक्षाम्लवेतसफलं लशुनं च धात्री दुष्टाम्बुमस्तुगृहवारि च नालिकेरम् ।
संस्नेहनं मृगमदोऽखिलपत्रशाकं क्षीरं[२५] सराणि सकलानि पुनर्नवा च ॥१०॥
एर्वारुकं लवणमम्लमपि प्रकोपिवर्गोऽतिसारगदपीडितमानवेषु ॥१०.५॥

अन्वयः

स्वेदोञ्जनम्, रूधिरमोक्षणम्, अम्बुपानम्, स्नानम्, व्यवायम् अपि, जागरधूमनस्यम्, अभ्यञ्जनम्, सकलवेगविधारणम् च, रूक्षाणि, असात्म्यमशनम् च, विरुद्धमन्नम्, गोधूम-माष-यव-वास्तुक-काकमाची-निष्पावकञ्च मधुशिग्रु-रसाल-पूगं कुष्माण्ड-तुम्बि-बदरम्, गुरु चान्नपानम्, ताम्बूलम्, इक्षुगुडमद्यम्, उपोदिका च, द्राक्षा, अम्लवेतसफलम्, लशुनम्, धात्री च, दुष्टाम्बुमस्तुगृहवारि च, नालिकेरम्, संस्नेहनम्, मृगमदः, अखिलपत्रशाकम्,

२१ भैषज्यरत्नावलीमा भव्यको अर्थ कमरख (Star fruit/Carambola) गरिएको छ।
२२ तोयवल्ली, जलपिप्पली, An aquatic plant, Comolina salicifolia/bengalensis. नेपाली निघण्टुमा पिर्हे भनिएको छ।
२३ भैषज्यरत्नावलीमा नेत्रवाला/सुगन्धवाल अर्थमा लिइएको छ।
२४ पूरम् इति भैषज्यरत्नावल्याम्।
२५ क्षारः इति शब्दकल्पद्रुमे। भैषज्यरत्नावल्यां च।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

क्षीरम्, सराणि सकलानि, पुनर्नवा च, एर्वारुकम्, लवणम्, अम्लमपि, अतिसारगदपीडितमानवेषु प्रकोपिवर्गः (भवति) ॥८-१०.५॥

भावार्थः

स्वेदन, अञ्जन, रक्तमोक्षण, अत्यधिक पानी पिउनु, स्नान, मैथुन, रात्रिजागरण, धूमपान, नस्य, अभ्यंग, वायु तथा मलमूत्र आदि वेगहरूको धारण, रुक्ष वस्तुहरूको सेवन (भोजन), असात्म्य भोजन, विरुद्ध भोजन, गहुँ, मास, जौ, बेथे, कबइ साग, भटमास, कन्द (सूरणकन्द, ओल), रातो सहिजन, आँप, सुपारी, कुभिण्डो, लौका, बयर, भारी या गरिष्ठ खाने कुराहरू, पान, उखु, सख्खर, मद्यपान, पवइ साग, दाख, अम्लवेतस (चखेत्रो), लशुन, अमला, दूषित पानी, मस्तु (दहीको पानी), घरमा बाँकी रहेको पानी (वासी पानी/अमिलो पानी, काञ्जी), नरिवल, चिल्लो पदार्थको सेवन/स्नेहनकर्म, मृगमद (कस्तूरीको बिना) सबै किसिमका पत्रशाक, दूध, सर गुण भएका अर्थात् दिशा पातलो गराउने खालका सबै किसिमका द्रव्य, पुनर्नवा, काँक्रो, ज्यादा नूनिलो र ज्यादा अमिलो र क्रोध यिनीहरूको वर्ग अतिसार रोगले पीडित व्यक्तिहरूका लागि प्रकोपकारक हुन्छ ॥८-१०.५॥

इत्यतीसारे पथ्यापथ्यविधिः ॥२॥

यति अतिसारमा अपनाउनुपर्ने पथ्यापथ्यविधि बताइयो ॥२॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

३
अथ ग्रहण्यां पथ्यापथ्यविधिः

ग्रहण्यां पथ्यानि–

निद्रा च्छर्दनलंघनं चिरभवा ये शालयः षष्टिकाः ।
मण्डो लाजकृतो मसूरतुवरीमुद्गप्रसूता[२६]रसाः ॥१॥
निःशेषोद्धृतसारमेव दधि यत् सक्षीरजातं गवाम् ।
छाग्या वा नवनीतमेव विमलं[२७] तद्वत्पयःसंभवम् ॥२॥
छागल्याज्यपयोदधीनि तिलजं तैलं सुरा माक्षिकम् ।
शालूकं वकुलं च दाडिमयुगं नव्यानि भव्यानि च ॥३॥
रम्भायाः कुसुमं फलं च तरुणं बिल्वं च शृंगाटकम् ।
चांगेरीविजयाकपित्थकुटजाऽजाजीकसेरूणि च ॥४॥
तक्रं कञ्चटपल्लवं च नलकं [२८]जातीफलं जाम्बवम् ।
धान्याकानि च बार्हतानि च[२९] [३०]महानिम्बोऽरुणा फेनिवत्[३१] ॥५॥
कव्याल्लावशशैणतित्तिरिरसाः क्षुद्राः झषाः सर्वशः ।
खुड्डीशो मधुरालिका च खलिशः सर्वः कषायो रसः ॥६॥
नाभेर्द्व्यंगुलकादधोर्ध्वशशिवद् वंशास्थिमूले तथा ।
दाहः प्रज्ज्वलितायसा च कथितं पथ्यं ग्रहण्यातुरे ॥७॥

अन्वयः

निद्रा च्छर्दनलंघनम्, चिरभवा ये शालयः षष्टिकाः, मण्डो लाजकृतो मसूरतुवरीमुद्गप्रसूता रसाः, निःशेषोद्धृतसारमेव दधि यत् सक्षीरजातं गवाम् छाग्या वा, तद्वत्पयःसंभवं एव विमलं नवनीतम्, छागल्याज्यपयोदधीनि, तिलजं तैलम्, सुरा, माक्षिकम्, शालूकम्, वकुलं च, दाडिमयुगम्, नव्यानि भव्यानि च, रम्भायाः कुसुमं तरुणम्, फलं च विल्वं च, शृंगाटकम्, चांगेरीविजयाकपित्थकुटजाऽजाजीकसेरूणि च, तक्रम्, कञ्चट-पल्लवम् च, नलकम् जातीफलम्, जांबवम्, धान्याकानि च, बार्हतानि च महानिम्बोऽरुणा फेनिवत्, क्रव्याल्लावशशैणतित्तिरिरसाः, सर्वशः क्षुद्राः झषाः, खुड्डीशः, मधुरालिका च, खलिशः, सर्वः कषायो रसः, नाभेर्द्व्यंगुलकादधोर्ध्वशशिवद् वंशास्थिमूले तथा दाहः प्रज्ज्वलितायसा च ग्रहण्यातुरे पथ्यं कथितम् ॥१-७॥

२६ प्रभूता रसा इति पाठान्तरम् ॥
२७ दधिजमिति भैषज्यरत्नावल्याम् ।
२८ काञ्चटसौनिषण्णदलकमिति भैषज्यरत्नावल्याम् ।
२९ धान्याकानि च तिन्दुकानि च महानिम्बारुणा फेनवत् इति पाठान्तरम् ॥
३० तिन्दुकानि चेति भैषज्यरत्नावल्याम् ।
३१ पेलवमिति भैषज्यरत्नावल्याम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भावार्थः

निद्रा, वमन, लंघन, पुरानो शाली र षष्टिक धानको चामल, लाजमण्ड; मूंग, मुसुरो र अरहरको दाल तथा रस; राम्ररी निकालिएको गाईको वा बाख्राको दहीको सार (पूरै नौनी निकालिएको मही र दही); त्यस्तै दुधको स्वच्छ नौनी; बाख्राको दुध, दही र घिउ; तिलको तेल, सुरा, मह, शालूक (कमलकन्द), मौलसिरि, अनार-दारिम, ताजा भव्यफल (लिच्ची)[३२], केराको बुंगो र काँचो फल, बेल, सिँघडा, चरीअमिलो, विजया (भाङ), कयेथ, कुटज, कालो जीरा, कसेरु (मोथेको कन्द, कसर), मही, कञ्चटपल्लव (कञ्चटनामक सागका मुना), नलक (केराउको साग),[३३] जाईफल, जामुन, धनियाँ, भण्टा, बकाइनो, अरुणा (मञ्जिष्ठा, मजिठों) फेनिवत् (अहिफेन, अफीम), क्रव्याद (मांसभक्षी सिंह, व्याघ्र आदि पशु), लाभे, खरायो, हरिण, तित्रोबाट सिद्ध रस, साना माछाहरू, खुड्डीश माछा, मधुरालिका माछा, खलिश माछा, कषाय रस, नाभिदेखि दुई अंगुल तल र पृष्ठवंशको मूलमा तातो फलामले अर्द्धचन्द्र आकारमा गरिने दहनकर्म यति ग्रहणी रोग लागेका व्यक्तिहरूका लागि पथ्य हुन्छन् ॥१-७॥

ग्रहण्यामपथ्यानि–

रक्तस्रुतिं जागरमम्बुपानं स्नानं स्त्रियं वेगविनिग्रहं च।
नस्याञ्जने स्वेदनधूमपाने श्रमं विरूद्धाशनमातपं च ॥८॥
गोधूमनिष्पावकलायमाषयवार्द्रकच्छत्रकराजमाषान्।
उपोदिकावास्तुककाकमाचीकुष्माण्डतुम्बीमधुशिग्रुकन्दान् ॥९॥
ताम्बूलमिक्षुं बदर रसालमेर्वारुकं पूगफलं रसोनम्।
धान्याम्लसौवीरतुषोदकानि दुग्धं गुडं मस्तु च नारिकेलम् ॥१०॥
पुनर्नवाबार्हतवैणवानि सर्वाणि शाकानि च पत्रवन्ति।
दुष्टाम्बुगोवारिकुरंगनाभिं क्षीरं[३४] समस्तानि सराणि चापि ॥११॥
द्राक्षामथाम्लं लवणं रसं च गुर्वन्नपानं सकलं च पूपम्।[३५]
वैद्यश्चिकित्सन् ग्रहणीविकारे विवर्जयेत्संततमप्रमत्तः ॥१२॥

अन्वयः

रक्तस्रुतिः, जागरम्, अम्बुपानम्, स्नानम्, स्त्रियम्, वेगविनिग्रहं च, नस्याञ्जने, स्वेदनधूमपाने, श्रमम्, विरूद्धाशनम्, आतपं च, गोधूम-निष्पाव-कलाय-माष-यवा-र्द्रक-छत्रक-राजमाषान्, उपोदिका-वास्तुक-काकमाची-कुष्माण्ड-तुम्बी-मधु-शिग्रु-कन्दान्, ताम्बूलम्, इक्षुम्, बदरम्, रसालम्, एर्वारुकम्, पूगफलम्, रसोनम्,

---

३२ नेपाली निघण्टुमा भव्यको अर्थ लिच्ची गरिएको छ। भैषज्यरत्नावलीमा कमरख भनिएको छ।

३३ तिलकम् इति शब्दकल्पद्रुमे। तिलकम् कालो नुन, लोध्र, चूवा आदि अर्थमा छ।

३४ क्षारम् इति पाठान्तरम्।

३५ निष्पावकन्दमधुशिग्रुरसालपूगमिति पाठान्तरम् ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

धान्याम्ल-सौवीर-तुषोदकानि, दुग्धम्, गुडम्, मस्तु च, नारिकेलम्, पुनर्नवा-बार्हत-वैणवानि, सर्वाणि शाकानि च पत्रवन्ति, दुष्टाम्बु, गोवारि, कुरंगनाभिम्, क्षीरम्, समस्तानि चापि सराणि, द्राक्षामथाम्लं लवणं रसं च, गुर्वन्नपानम्, सकलं पूपं च ग्रहणीविकारे चिकित्सन् संततमप्रमत्तः वैद्यः विवर्जयेत् ॥८-१२॥

भावार्थः

रक्तमोक्षण, जागरण, अत्यधिक पानी पिउनु, स्नान, स्त्रीप्रसंग, वेगधारण, नस्य, अञ्जन, स्वेदन, धूमपान, श्रम, विरुद्धभोजन, घाम ताप्नु, गहुँ, भटमास, केराउ, मास, जौ, अदुवा, च्याउ, राजमा, पवई साग, बेथे, कबई साग, कुभिण्डो, लौका, गुलियो सहिजन, कन्दमूल (सूरण कन्द, ओल, आलु, पिडालु आदि), पान, उखु, बयर, आँप, काँक्रो, सुपारी, लशुन, धान्याम्ल (धान सडाएर बनाएको अमिलो मद्य), सौवीर (जौको भूस निकाली सडाएर बनाएको अमिलो मद्य) तुषोदक (भूस समेतको जौ सडाएर बनाएको अमिलो मद्य), दुध, गुड, दहीको पानी, नरिवल, पुनर्नवा, भण्टा, वाँसको जौ-वेणुयव (तामा पनि),[३६] सबै किसिमका पत्रशाक, दूषित पानी, गहुँत, कस्तूरीको बिना, खीर, दुध र दहीको सर (तर), दाख, अमिलो, धेरै नुनिलो, गह्रुको खानपान, सबै किसिमका पुवाहरू यी सबैलाई ग्रहणीरोगको उपचार गर्न लागेको कहिल्यै पनि प्रमाद नहुने वैद्यले परहेज राख्नुपर्दछ। यस्ता कुराहरूको सेवन नगर्न रोगीलाई स्पष्ट निर्देश गर्नुपर्दछ ॥८-१२॥

इति ग्रहण्यां पथ्यापथ्यविधिः ॥३॥

यति ग्रहणीरोगमा अपनाउनुपर्ने पथ्यापथ्यविधि बताइयो ॥३॥

◆◆◆

३६ वैणव भन्नाले वाँसको तामा, जौ, वंशलोचन, वंशपत्र आदि वाँसबाट पाइने पदार्थ बुझिन्छ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

४
अथार्शसि पथ्यापथ्यविधिः

अर्शसि पथ्यानि–

विरेचनं लेपनमस्रमोक्षः क्षाराग्निशस्त्राचरितं च कर्म ॥
पुरातना लोहितशालयश्च सषष्टिकाश्चापि यवाः कुलत्थाः ॥१॥
गोधाखुलोपाकगवोष्ट्रकूर्मश्वावित्कुरंगाजखरौतुकीशाः ॥[३७]
तरक्षुचाषाश्वशृगालकाका ये स्वल्पमांसाः प्रसहाश्च तेऽपि ॥२॥[३८]
पटोलपत्तूररसोनवह्निपुनर्नवावास्तुकसूरणानि ॥[३९]
जीवन्तिका दन्तशठः सुरा च त्रुटिर्वयस्थानवनीततक्रम् ॥३॥
कंकोलधात्री रुचकं कपित्थमौष्ट्राणि मूत्राज्यपयांसि चापि ॥
भल्लातकं सर्षपजं च तैलम् गोमूत्रसौवीरतुषोदकानि ॥४॥
वातापहं यच्च यदग्निकारि तदन्नपानं हितमर्शसेभ्यः ॥४.५॥

अन्वयः

विरेचनम्, लेपनम्, अस्रमोक्षः, क्षारा-ग्नि-शस्त्रा-चरितं च कर्म, पुरातनाः सषष्टिकाश्चापि लोहितशालयश्च, यवाः, कुलत्थाः, गोधा-ऽऽखु-लोपाक-गवो-ष्ट्र-कूर्म-श्वावित्-कुरंगा-ज-खरौ-तु-कीशाः, तरक्षु-चाषा-श्व-शृगाल-काकाः, ये प्रसहाः स्वल्पमांसा तेऽपि च, पटोल-पत्तूर-रसोन-वह्नि-पुनर्नवा-वास्तुक-सूरणानि, जीवन्तिका, दन्तशठः, सुरा च, त्रुटिः, वयस्था, नवनीत-तक्रम्, कंकोल-धात्री, रुचकम्, कपित्थम्, औष्ट्राणि चापि मूत्रा-ज्य-पयांसि, भल्लातकम्, सर्षपजं च तैलम्, गोमूत्र-सौवीर-तुषोदकानि, यद् वातापहम् यदग्निकारि तदन्नपानम् च अर्शसेभ्यः हितम् (भवति) ॥१-४.५॥

भावार्थः

विरेचन, लेप, रक्तमोक्षण, क्षार-अग्नि-शस्त्रद्वारा उपचार, पुरानो शाली-षष्टिक धानको चामल, जौ, गहत; गोहोरो, मुसा, लोपाक (शृगालभेदः, एक किसिमको स्याल) गाई, ऊँट, कछुवा, दुम्सी, मृग, गधा, बिरालो (ओतु), वानर (कीश), भालु, नीलकण्ठ चरो, घोडा, श्याल, काग, अल्पमांस हुने प्रसह प्राणिहरू, पटोलपत्र, पत्तूर (शालिञ्चशाक), लशुन, चित्रक, पुनर्नवा, बेथे, ओल, जीवन्ती साग, कागती आदि अमिला फल, सुरा, त्रुटि (सुकुमेल), वयस्था (हर्रो), नौनी, मही, कंकोल, अमला, रुचक (सौवर्चल लवण, बिमिरो) कपित्थफल, ऊँटको दुध-घिउ-मूत्र, भलायो, सर्स्यूँको तेल, गोमूत्र, सौवीर, तुषोदक लगायत जजसले वातशमन

३७ कुरंगस्थाने कुलिंग इति भैषज्यरत्नावल्याम् ।
३८ येऽन्येऽपि मांसाः प्रसहाश्च तेऽपि इति भैषज्यरत्नावल्याम् । येऽन्येऽल्पमांसाः इति च पाठोऽन्यत्र ।
३९ पटोलवल्लूररसोनवह्नि– इति पाठान्तरम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गर्दछन् र अग्नि बढाउँछन् त्यस्ता खानपान अर्शरोगीहरूका लागि हितकारक हुन्छन् ॥१-४.५॥

अर्शसि अपथ्यानि

आनूपमामिषं मत्स्यं पिण्याकं दधि पिष्टकम् ॥५॥

माषान् करीरं निष्पावं विल्वं तुम्बीमुपोदिकाम् ।

पक्वाम्रमालुकं [४०]सर्व बिष्टंभीनि गुरूणि च ॥६॥

आतपं जलपानानि वमनं वस्तिकर्म च ।

प्राच्यवन्त्यापरावन्त्यनदीनां सलिलानि च ॥७॥

विरुद्धानि च सर्वाणि मारुतं पूर्वदिग्भवम् ।

वेगरोधं स्त्रियं पृष्ठयानमुत्कटकासनम् ॥८॥[४१]

यथास्वं दोषलं चान्नमर्शसः परिवर्जयेत् ॥८.५॥

अन्वयः

आनूपमामिषम्, मत्स्यम्, पिण्याकम्, दधि, पिष्टकम्, माषान्, करीरम्, निष्पावम्, बिल्वम्, तुम्बीम्, उपोदिकाम्, पक्वाम्रम्, आलुकं सर्वम्, विष्टंभीनि गुरूणि च, आतपम्, जलपानानि, वमनम्, वस्तिकर्म च, प्राच्यावन्त्यपरावन्त्यनदीनां सलिलानि च, विरुद्धानि च सर्वाणि, पूर्वदिग्भवम् मारुतम्, वेगरोधम्, स्त्रियम्, पृष्ठयानम्, उत्कटकासनम्, दोषलं चान्नम् अर्शसः यथास्वं परिवर्जयेत् ॥५-८.५॥

भावार्थः

आनूप मांस, माछा, पीना, दही, पिष्टक, मास, करीरफल, भटमास, बेल, लौका/ घिरौला, पवई साग, पाकेको आँप, सबै किसिमका आलु, गुरु र विष्टम्भी पदार्थ, घाम, जलपान, वमनकर्म, वस्तिकर्म, अवन्तीपूर्व र अवन्तीपश्चिमतिर वहने नदीहरूको पानी, विरुद्ध आहार विहार, पूर्वी वतास, वेगधारण, स्त्रीसंसर्ग, पृष्ठयान (घोडा, हाथी आदिका पिठिउँको सवारी), उत्कटासन, दोषकारक अन्न आदि अर्शरोगीहरूले यथोचित रूपमा त्याग गर्नुपर्दछ ॥५-८.५॥

---

४० शालुकमिति भैषज्यरत्नावल्याम् । सर्वशालूकमिति शब्दकल्पद्रुमे ।

४१ वेगावरोधं स्त्रीपृष्ठयानमुत्कटकासनमिति भैषज्यरत्नावल्याम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चर्मकीलानां पथ्यापथ्यम्–

यदुक्तमर्शसामादौ भैषज्यं पथ्यमेव च।

तदेव चर्मकीलानां कार्यं दोषादिभेदतः ॥९॥

अन्वयः

आदौ अर्शसां यद् भैषज्यं पथ्यमेव च उक्तम् दोषादिभेदतः तदेव चर्मकीलानां कार्यम् ॥९॥

भावार्थः

यसअघि अर्शरोगको जे जे औषधि र पथ्य बताइयो दोष-दूष्य आदिको भेदलाई विवेकपूर्वक विचार गरेर चर्मकील (खील पर्नु)मा पनि त्यही अनुसार पथ्यापथ्य विचार गर्नुपर्दछ ॥९॥

इत्यर्शसि चर्मकीले च पथ्यापथ्यविधिः ॥४॥

यति अर्श र चर्मकीलमा अपनाउनुपर्ने पथ्यापथ्यविधि बताइयो ॥४॥

◆◆◆

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

५
अथाजीर्णमन्दाग्नौ पथ्यापथ्यविधिः

मन्दानलेऽजीर्णे च पथ्यानि–

श्लैष्मिके वमनं पूर्वं पैत्तिके मृदुरेचनम् ।
वातिके स्वेदनं चाथ यथावस्थं हितं च यत् ॥१॥
नानाप्रकारो व्यायामो दीपनानि लघूनि च ।
बहुकालसमुत्पन्ना मुद्गा[४२] लोहितशालयः ॥२॥
विलेपी लाजमण्डश्च मण्डो मुद्गरसः सुरा ।
एणो बर्हिः शशो लावः क्षुद्रमत्स्याश्च सर्वशः ॥३॥
शांलिञ्चशाकं वेत्राग्रं वास्तुकं बालमूलकम् ।
लशुनं वृद्धकुष्माण्डं कदली नवनीतकम् ॥४॥[४३]
शोभाञ्जनं पटोलं च वृन्ताकं ललदम्बु च ।[४४]
कर्कोटं कारवेल्लं च बार्हतं च महार्द्रकम् ॥५॥
प्रसारिणी काकमाची[४५] चांगेरी सुनिषण्णकम् ।
धात्रीफलं नागरंगं[४६] दाडिमं क्षारपर्पटी ॥६॥[४७]
अम्लवेतसजम्बीरमातुलुंगानि माक्षिकम् ।
नवनीतं घृतं तक्रं सौवीरं च तुषोदकम् ॥७॥[४८]
धान्याम्लं कटुतैलं च रामठं लवणार्द्रकम् ।
यवानी मरिचं मेथी धान्यकं जीरकं दधि ॥८॥
ताम्बूलं तप्तसलिलं कटुतिक्तौ रसावपि ।
मन्दानलेऽप्यजीर्णे च पथ्यमेतन्नृणां भवेत् ॥९॥

अन्वयः

श्लैष्मिके पूर्वं वमनम्, पैत्तिके मृदुरेचनम्, वातिके स्वेदनं च अथ यथावस्थं यत् हितं च, नानाप्रकारो व्यायामः, दीपनानि लघूनि च, बहुकालसमुत्पन्ना मुद्गा लोहितशालयः, विलेपी, लाजमण्डश्च, मण्डो, मुद्गरसः, सुरा,

४२ सूक्ष्मा इति भैषज्यरत्नावल्याम् ।
४३ नवीनकदलीफलमिति भैषज्यरत्नावल्याम् ।
४४ वार्ताकुं नलदम्बु चेति भैषज्यरत्नावल्याम् । नलदाम्बु इति शब्दकल्पद्रुमे । नलदम्बु इति निम्बः, नलदाम्बु इति उशीरोदकम् ।
४५ मेषशृंगमिति भैषज्यरत्नावल्याम् ।
४६ मातुलुंगमिति शब्दकल्पद्रुमे ।
४७ दाडिमं निम्बुकं तथेति भैषज्यरत्नावल्याम् । यवपर्पटाविति शब्दकल्पद्रुमे ।
४८ सौवीरकतुषोदके इति भैषज्यरत्नावल्याम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एणो, बर्हिः, शशः, लावः, क्षुद्रमत्स्याश्च सर्वशः, शांलिञ्चशाकम्, वेत्राग्रम्, वास्तुकम्, बालमूलकम्, लशुनम्, वृद्धकुष्माण्डम्, कदली, नवनीतकम्, शोभाञ्जनम्, पटोलं च, वृन्ताकम्, ललदम्बु च, कर्कोटम्, कारवेल्लं च, बार्हतं च, महार्द्रकम्, प्रसारिणी, काकमाची, चांगेरी, सुनिषण्णकम्, धात्रीफलम्, नागरंगम्, दाडिमम्, क्षारपर्पटी, अम्लवेतसजम्बीरमातुलुंगानि, माक्षिकम्, नववीतम्, घृतम्, तक्रम्, सौवीरम् च, तुषोदकम्, धान्याम्लम्, कटुतैलं च, रामठम्, लवणार्द्रकम्, यवानी, मरिचम्, मेथी, धान्यकम्, जीरकम्, दधि, ताम्बूलम्, तप्तसलिलम्, कटुतिक्तौ रसौ अपि, मन्दानलेऽजीर्णेऽपि च, नृणां एतत् पथ्यं भवेत् ॥१-९॥

भावार्थः

कफजमा पहिले वमन गर्नुपर्छ, पित्तजमा मृदुविरेचन गर्नुपर्दछ र वातिकमा स्वेदन गर्नुपर्दछ। अवस्था अनुसार जेजस्तो हितकर हुन्छ त्यही गर्नुपर्दछ।

विभिन्न किसिमका व्यायामहहरू, दीपन पाचन तथा हलुका (लघु) गुण भएका खानेकुराहरू, पुराना मूंग र रक्तशाली, विलेपी, लाजमण्ड, मण्ड, मुद्‌गरस, सुरा, मृग, खरायो, लाभ, साना माछा, शालिञ्चनामक साग (शालिञ्चिका, पत्तूर), वेत्राग्र (टुसा), बेथे, कलिलो मूला, लशुन, छिप्पिएको कुभिण्डो, केरा, नौनी, सहिजन, परबर, भण्टा, ललदम्बु (एक किसिमको कागती), चटेलो, तिते करेलो, बिही (वृहती), महार्द्रक,[४९] प्रसारिणी (विरी/राजबला), कबई साग, चरीअमिलो, सुनिषण्णक (चारपाते चरीअमिलो), अमला, सुन्तला, दाडिम, क्षारपर्पटी, अम्लवेतस (चखेत्रो), जम्बीर (ज्यामिर), बिमिरो, मह, नौनी, घृत, मही, सौवीर (भुसरहित जौबाट सन्धान गरिएको काञ्जी/अमिलो), तुषोदक (भुससहित जौबाट बनाइएको काञ्जी), धान्याम्ल (धानको चामलबाट बनाइएको काञ्जी), तोरीको तेल (कटुतैल/कडुवा तेल), हिङ, अदुवा-नुन, ज्वानू, मरिच, मेथी, धनियाँ, जीरा, दही, पान, तातो पानी, कटुतिक्त रस यी सबै अग्निमान्द्य र अजीर्ण रोग लागेका व्यक्तिहरूका लागि पथ्य हुन्छन् ॥१-९॥

अग्निमान्द्येऽजीर्णेऽपथ्यानि–

विरेचनानि विण्मूत्रवायुवेगविधारणम्।
अतिवेलं चाध्यशनं[५०] जागरं विषमाशनम् ॥१०॥
रक्तस्रुतिं शमीधान्यं[५१] मत्स्यं मांसमुपोदिका।
जलपानं पिष्टकं च जाम्बवं सर्वमालुकम् ॥११॥[५२]
कूर्चिका मोरटं[५३]क्षीरं किलाटं च प्रपानकम्।
तालास्थिसस्यं तद्वालं स्नेहनं दुष्टवारि च ॥१२॥

४९ महार्द्रकलाई कतै अदुवा (बनअदुवा) भनिएको छ। महा आर्द्रकको रूपमा वृक्षाम्ल (भकमिलो) र तिन्तिडीक (अमिली) लाई पनि लिइएको छ।
५० अध्यशनं समशनमिति भैषज्यरत्नावल्याम्।
५१ शिम्बिधान्यम् भै.र.।
५२ सर्वशालूकमिति कल्पद्रुमे।
५३ मोदकमिति पाठान्तरम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विरूद्धासात्म्यपानान्नं विष्टम्भीनि गुरूणि च ।
अग्निमान्द्येऽप्यजीर्णे च सर्वाणि परिवर्जयेत् ॥१३॥

अन्वयः

विरेचनानि, विण्मूत्रवायुवेगविधारणम्, अतिवेलं चाध्यशनम्, जागरम्, विषमाशनम्, रक्तस्रुतिम्, शमीधान्यम्, मत्स्यम्, मांसम्, उपोदिका, जलपानम्, पिष्टकं च, जाम्बवम्, सर्वमालुकम्, कूर्चिकाम्, मोरटम्, क्षीरम्, किलाटं च, प्रपानकम्, तालास्थिसस्यम्, तद्वालम्, स्नेहनम्, दुष्टवारि च, विरूद्धासात्म्यपानान्नम्, विष्टम्भीनि गुरूणि च, अग्निमान्द्येप्यजीर्णे च सर्वाणि परिवर्जयेत् ॥१०-१३॥

भावार्थः

विरेचन, मल-मूत्र-वायुको वेग रोक्नु, अजीर्ण अवस्थामा पनि वारम्वार भोजन गर्नु (अतिरिक्त भोजन/अतिशयभोजन), धेरै मात्रामा खानु (अध्यशन), जाग्राम गर्नु, विषमाशन (असमान मात्राको भोजन/कहिले धेरै, कहिले थोरै), रक्तमोक्षण, शमीधान्य (कोशेबाली/मास,मूंगी, चना आदि), माछा, पवई साग, जलपान, पिष्टक (पिठोको एक गरिष्ठ परिकार/पिट्ठी, पुवा आदि), जामुन, सबै किसिमका आलु, कूर्चिका (कुराउनी), मोरट (बिगौते दुध), दुध/खीर, बिगौति, शीतल पेय, तालास्थिबीज वा तालफल, बालताल (कलिलो तालफल), स्नेहन, दूषित पानी, विरुद्ध र असात्म्य खानपान, विष्टम्भी (मलावरोधक/मल बाँध्ने वा रोक्ने) र गुरु पदार्थ यी सबैलाई अग्निमान्द्य र अजीर्णका रोगीहरूले परहेज गर्नुपर्दछ ॥१०-१३॥

अलसे विसूच्याञ्च–
फलवर्त्तिं वमिं स्वेदं लंघनं चापतर्पणम् ।
विशेषादलसे कुर्यात् विसूच्यामतिसारवत् ॥१४॥

अन्वयः

फलवर्त्तिम्, वमिम्, स्वेदम्, लंघनम्, अपतर्पणं च विशेषादलसे कुर्यात्, विसूच्यामतिसारवत् कुर्यात् ॥१४॥

भावार्थः

फलवर्त्ति, वमन, स्वेदन, लंघन र अपतर्पण विशेष गरी अलसक रोगमा गर्नुपर्दछ । विसूचिकामा चाहिँ अतिसारको जस्तै उपचार गर्नुपर्दछ ॥१४॥

इत्यग्निमान्द्याजीर्णालसकविसूचिकासु पथ्यापथ्यविधिः ॥५॥
यति अग्निमान्द्य, अजीर्ण, अलसक र विसूचिकामा अपनाउनुपर्ने पथ्यापथ्यविधि बताइयो ॥५॥

◆◆◆

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

६
अथ कृमिरोगे पथ्यापथ्यविधिः

कृमिरोगे पथ्यानि–

आस्थापनं कायशिरोविरेचनं धूमः कफघ्नानि शरीरशोधनम्[५४] **॥**
चिरन्तना वैणवरक्तशालयः पटोलवेत्राग्ररसोनवास्तुकम् ॥१॥
हुताशमन्दारदलानि सर्षपा नवीनमोचं वृहतीफलान्यपि ।
तिक्तानि तालीसदलानि[५५] **मौषिकं मांसं विडंगं पिचुमर्दपल्लवाः ॥२॥**
पथ्या च तैलं तिलसर्षपोद्भवं सौवीर-शुक्तं च तुषोदकं मधु ।
पचेलिमं तालमरुष्करं गवां मूत्रं च ताम्बूलमिरा[५६] **मृगाण्डजम् ॥३॥**
औष्ट्रानि मूत्राज्यपयांसि रामठं क्षारोऽजमोदा खदिरश्च वत्सकः ।
जम्बीरनीरं सुषवी यवानिका साराः सुराह्वागुरुशिंशपोद्भवाः ॥४॥
तिक्तः कषायः कटुको रसोऽप्ययं वर्गो नराणां कृमिरोगिणां सुखः ॥४.५॥

अन्वयः

आस्थापनम्, कायशिरोविरेचनम्, धूमः, कफघ्नानि, शरीरशोधनम्, चिरन्तना वैणवरक्तशालयः, पटोलवेत्राग्ररसोनवास्तुकम्, हुताशमन्दारदलानि, सर्षपाः, नवीनमोचम्, वृहतीफलान्यपि, तिक्तानि, तालीसदलानि, मौषिकं मांसम्, विडंगम्, पिचुमर्दपल्लवाः, पथ्या च, तिलसर्षपोद्भवं तैलम्, सौवीर-शुक्तं च, तुषोदकम्, मधु, पचेलिमं तालम्, अरुष्करम्, गवां मूत्रं च, ताम्बूलम्, इरा, मृगाण्डजम्, औष्ट्रानि मूत्राज्यपयांसि, रामठम्, क्षारः, अजमोदा, खदिरश्च, वत्सकः, जम्बीरनीरम्, सुषवी, यवानिका, सुराह्वा-गुरुशिंशिपोद्भवाः साराः, तिक्तः कषायः कटुका रसोऽपि अयं वर्गः कृमिरोगिणां नराणां सुखः ॥१-४.५॥

भावार्थः

आस्थापन वस्ति, विरेचन, नस्य, धूमपान/धूपन, कफनाशक उपाय, शरीरशोधन, पुराना वेणुयव आदि वंशोत्पन्न पदार्थ र रक्तशाली आदि धानका चामल, परबर, बेतका टुसा, लशुन, बेथे, चित्रक, पारिजातपत्र, सस्र्यूँ काँचो केरा, बिहीँ, तिता द्रव्यहरू, तालीसपत्र, मुसाको मासु, वायुविडंग, नीमका पालुवा, हर्रो, तिल र सस्र्यूँको तेल, सौवीर, सुक्त, तुषोदक, मह, बोटमै पाकेको फल, ताड, भलायो, गोमूत्र, पान, मदिरा, कस्तूरी, ऊँटको मूत्र-घृत-दुग्ध, हिङ, क्षार, अजमोदा, खयर, इन्द्रजौ, ज्यामीरकागतीको रस, सुषवी (करेला, कालो जीरा), ज्वानू, देवदारु-अगुरु-शिशौको सार (चुरो), तितो, टर्रो, पिरो यी सबै कृमिरोग लागेका मानिसहरूका लागि सुखदायी हुन्छन् ॥१-४.५॥

५४ शरीरमार्जनाः इति भै.र., श.क.द्रु. ।
५५ नाडीचदलानि इति भै.र. । नालीचदलानि इति श.क.द्रु. । नरिचो (पटुवा) इति नाडीचदलम्, करम इति नालीचदलम् ?
५६ इरास्थाने सुरा इति पा. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कृमिरोगेऽपथ्यानि–

छर्दिञ्च तद्वेगविधारणं च विरूद्धपानाशनमह्निनिद्राम् ॥५॥

द्रवं च पिष्टान्नमजीणभोजनम्[५७] घृतानि माषान् दधि पत्रशाकम् ।

मांसं पयोम्लं मधुरं रसं च कृमीन् जिघांसुः परिवर्जयेत्तु ॥६॥

अन्वयः

कृमीन् जिघांसुः तु छर्दिञ्च, तद्वेगविधारणं च, विरूद्धपानाशनम्, अह्निनिद्राम्, द्रवं च, पिष्टान्नम्, अजीणभोजनम्, घृतानि, माषान्, दधि, पत्रशाकम्, मांसम्, पयः, अम्लम्, मधुरं रसं च परिवर्जयेत् ॥५-६॥

भावार्थः

कृमिहरूलाई मार्न चाहने व्यक्तिहरूले वमन, वमनको वेगधारण, विरुद्ध अन्नपान, दिवाशयन, द्रव (तरल), पिठोबाट बनेका खानेकुराहरू (सेल, अनर्शा आदि), अजीर्ण हुँदाहुँदै भोजन गर्नु, घिउ, माष, दही, पत्रशाक, मासु, दुध, अमिलो र गुलियो खानेकुरा सेवन गर्नुहुँदैन ॥५-६॥

इति कृमिरोगे पथ्यापथ्यविधिः ॥६॥

यति कृमिरोगमा अपनाउनुपर्ने पथ्यापथ्यविधि बताइयो ॥६॥

◆◆◆

---

५७ पिष्टान्नमजीर्णताञ्च भै.र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

७
अथ पाण्डुरोगे पथ्यापथ्यविधिः

पाण्डुरोगे पथ्यानि–

छर्दिर्विरेचनं जीर्णा यवा गोधूम-शालयः ।
मुद्गाढकीमसूराणां यूषाः जांगलजा रसाः ॥१॥
पटोलं वृद्धकुष्माण्डं तरूणं कदलीफलम् ।
जीवन्तीक्षुरमत्स्याक्षीगुडूचीतण्डुलीयकम् ॥२॥
पुनर्नवा द्रोणपुष्पी वार्ताकुं लशुनद्वयम् ।
पक्वाम्रमभया बिम्बी शृंगी मत्स्या गवां जलम् ॥३॥
धात्री तक्रं घृतं तैलं सौवीरकतुषोदके ।
नवनीतं गन्धसारो हरिद्रा नागकेशरम् ॥४॥
यवक्षारो लोहभस्म कषायाणि च कुंकुमम् ।
दाहश्चरणयोः सन्धौ नाभेर्द्व्यंगुलकादधः[५८] ॥५॥
मस्तके हस्तयोर्मूले मध्ये च स्तनकक्षयोः ।
यथादोषमिदं पथ्यं पाण्डुरोगवतां भवेत् ॥६॥

अन्वयः

छर्दिः, विरेचनम्, जीर्णा यवा गोधूम-शालयः, मुद्गाढकीमसूराणां यूषाः, जांगलजा रसाः, पटोलम् वृद्धकुष्माण्डम्, तरूणं कदलीफलम्, जीवन्तीक्षुरमत्स्याक्षीगुडूचीतण्डुलीयकम्, पुनर्नवा, द्रोणपुष्पी, वार्ताकुं, लशुनद्वयम्, पक्वाम्रम्, अभया, बिम्बी, शृंगी, मत्स्याः, गवां जलम्, धात्री, तक्रम्, घृतम्, तैलम्, सौवीरकतुषोदके, नवनीतम्, गन्धसारः, हरिद्रा, नागकेशरम्, यवक्षारः, लोहभस्म, कषायाणि च, कुंकुमम्, चरणयोः सन्धौ नाभेर्द्व्यंगुलकादधः मस्तके हस्तयोर्मूले मध्ये च स्तनकक्षयोः दाहः इदं पाण्डुरोगवतां यथादोषं पथ्यं भवेत् ॥१-६॥

भावार्थः

वमन, विरेचन, पुरानो जौ, पुरानो गहुँ, पुरानो शालिधान, मूंग-अरहर-मुसुरोको दाल र रस (यूष), जांगल पशुपक्षीको मांसरस, परबर, छिप्पिएको कुभिण्डो, काँचो केरा, जीवन्ती (जिरी साग), इक्षुर (तालमखाना), मत्स्याक्षी (भिरंगी झार), गुर्जो, लुँडे, पुनर्नवा, द्रोणपुष्पी (गुमपाती/गाण्टेफूल), भण्टा, दुवै प्रकारका लसुन, पक्वान्न, हर्रो, बिम्बीफल (गोलकाँक्री), शृंगी (कर्कटशृंगी), माछा, गोमूत्र, अमला, मही, घिउ, तेल, सौवीर, तुषोदक, नौनी, चन्दन, हलेदो, नागकेशर, जौको क्षार, लौहभस्म, टर्रा खाने कुराहरू, केशर; खुट्टाका सन्धि, नाभिदेखि दुई अंगुल तल, शिर र हस्तमूल एवं स्तन र काखीको बीचमा गरिने दहनकर्म यति पाण्डुरोगहरूका लागि दोष अनुसार पथ्य हुन्छन् ॥१-६॥

५८ नाभेश्च द्व्यंगुलादधः भै.र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पाण्डुरोगेऽपथ्यानि–

रक्तस्रुतिं धूमपानं वमिवेगविधारणम् ।
स्वेदनं मैथुनं शिम्बी पत्रशाकानि रामठम् ।।७।।
माषोऽम्बुपानं पिण्याकस्ताम्बूलं सर्षपाः सुराः ।
मृद्भक्षणं दिवास्वप्नं तीक्ष्णानि लवणानि च ।।८।।
सह्यविन्ध्याद्रिजातानां[५९] नदीनां सलिलानि च ।
सर्वाण्यम्लानि दुष्टाम्बु[६०] विरुद्धाध्यशनानि च ।।९।।
गुर्वन्नं च विदाहीनि पाण्डुरोगवतां विषम् ।।९.५।।[६१]

अन्वयः

रक्तस्रुतिम्, धूमपानम्, वमिवेगविधारणम्, स्वेदनम्, मैथुनम्, शिम्बी, पत्रशाकानि, रामठम्, माषः, अम्बुपानम्, पिण्याकः, ताम्बूलम्, सर्षपाः, सुराः, मृद्भक्षणम्, दिवास्वप्नम्, तीक्ष्णानि लवणानि च, सह्यविन्ध्याद्रिजातानां नदीनां सलिलानि च, सर्वाण्यम्लानि, दुष्टाम्बु, विरुद्धाध्यशनानि च, गुर्वन्नम्, विदाहीनि च पाण्डुरोगवतां विषम् (भवति) ।।७-९.५।।

भावार्थः

रक्तमोक्षण, धूमपान, वमनवेगधारण, स्वेदन, मैथुन, शिम्बीधान्य (कोशे बाली), पत्रशाक, हिङ, मास, अत्यधिक पानी पिउनु, पीना, पान, सर्स्यूँ, सुरा, माटो खानु, दिउसो सुत्नु, तीखा र नूनिला खानेकुराहरू, सह्य र विन्ध्य पर्वत[६२] मुहान भएका नदीहरूको पानी, सबै किसिमका अमिला खानेकुराहरू, विरुद्धभोजन गुरु (भारी या गरिष्ठ) एवं विदाही (खाएपछि पोल्ने) खानेकुराहरू पाण्डुरोगीहरूका लागि विष बराबर हुन् ।।७-९.५।।

इति पाण्डुरोगे पथ्यापथ्यविधिः ।।७।।
यति पाण्डुरोगमा अपनाउनुपर्ने पथ्यापथ्यविधि बताइयो ।।७।।

◆◆◆

५९ सिन्धुविन्ध्याद्रिजातानामिति श.क.द्रु. ।

६० दुष्टाम्भ इति श.क.द्रु. ।

६१ वह्निमातपमायासमन्नपानञ्च पित्तलम् । मैथुनं क्रोधमध्वानं पाण्डुरोगी सदा त्यजेत् ।। इति भैषज्यरत्नावल्यामतिरिक्तः पाठो दृश्यते । आगो ताप्नु, घाम ताप्नु, थकाइ लाग्नेगरी ज्यादा परिश्रम गर्नु, पित्तवर्द्धक अन्नपान, मैथुन, क्रोध तथा पैदल यात्रा गर्नु यी कुराहरूलाई पाण्डुरोगीले सधैं त्याग गर्नुपर्दछ ।

६२ मलयपर्वत (मलयाचल) नजिकै पर्ने प्रसिद्ध पर्वत सह्य पर्वत हो । मध्यभारतमा पूर्वपश्चिम लम्बिएर रहेको प्रसिद्ध पर्वत विन्ध्यपर्वत (विन्ध्याचल) हो । महाभारतका अनुसार यी दुवै पर्वत कुलपर्वत मानिएका छन् । यस्ता कुलपर्वत (कुलाचल) सातवटा छन् । महेन्द्रो मलयः सह्यः शुक्तिमान् ऋक्षपर्वतः । विन्ध्यश्च पारियात्रश्च सप्तैते कुलपर्वताः ।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

८
अथ रक्तपित्तरोगे पथ्यापथ्यविधिः

रक्तपित्तरोगे पथ्यानि–

अधोगते च्छर्दनमूर्ध्वनिर्गमे विरेचनं स्यादुभयत्र लंघनम् ।।
पुरातनाः पष्टिकशालिकोद्भवाः प्रियंगुनीवारयवप्रसाधिकाः ।।१।।[६३]
मुद्गा मसूराश्चणकास्तुवर्यो मकुष्ठकाः शृंगिकवर्मिमत्स्याः ।।[६४]
शशः कपोतो हरिणैणलावशरारिपारावतवर्त्तकाश्च ।।२।।
वका उरभ्राश्च सकालुपुच्छाः कपिञ्जलाश्चापि कषायवर्गः ।।
गवामजायाश्च पयो घृतं च घृतं महिष्याः पनसं प्रियालम् ।।३।।
रम्भाफलं कंचटतण्डुलीयपटोलवेत्राग्रमहार्द्रकाणि ।।
पुराणकुष्माण्डफलं च पक्वतालानि तद्वीजदलानि[६५] वासा ।।४।।
स्वादूनि बिम्बानि[६६] च दाडिमानि खर्जूरधात्रीमिशिनालिकेरम् ।।
कसेरुशृंगाटकपौष्कराणि[६७] कपित्थशालूकपरूषकाणि ।।५।।
भूनिम्बशांक पिचुमर्दपत्रं तुम्बी कलिंगानि च लाजशक्तुः ।।
द्राक्षा सिता माक्षिकमिक्षवश्च[६८] शीतोदकं चौद्भिदवारि चापि ।।६।।
सेकोवगाहः शतधौतसर्पिरभ्यंगयोगः शिशिरप्रदेहः ।।
हिमानिलश्चन्दनमिन्दुपादाः कथा विचित्राश्च मनोऽनुकूलाः ।।७।।
धारागृहं वारिगृहं[६९] सुशीतं वैदूर्यमुक्तामणिधारणं च ।।
रम्भोत्पलाम्भोरुहपत्रशय्या क्षौमाम्बरं चोपवनं सुशीतम् ।।८।।
प्रियंगुकाचन्दनरूषितानामालिंगनं चापि वरांगनानाम् ।।
पद्माकराणां सरितां ह्रदानां चन्द्रोदयानां हिमसीकराणाम् ।।९।।
सुशीतलानां गिरिनिर्झराणां श्रुतिप्रशस्तानि च कीर्त्तनानि ।।
प्रतीरनीरं[७०] हिमवालुका च मित्रं नृणां शोणितपित्तरोगे ।।१०।।

---

६३ पुरातनाः षष्टिकशालिकोद्रवप्रियंगुनीवारयवप्रशातिकाः इति भै.र., श.क.द्रु. ।
६४ चिंगटवर्मिमत्स्याः इति भै.र., श.क.द्रु. च ।
६५ तद्बीजजलानि भै.र., श.क.द्रु. ।
६६ विल्वानि इति श.क.द्रु. ।
६७ कशेरुश्रृंगाटमरुष्कराणि भै.र. ।
६८ माक्षिकमैक्षवश्च भै.र., श.क.द्रु. ।
६९ भूमिगृहं भै.र., श.क.द्रु. ।
७० प्रकृष्टनीरं भै.र. । प्रवीणनीरं श.क.द्रु. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अन्वयः

अधोगतेच्छर्दनम्, ऊर्ध्वनिर्गमे विरेचनम्, उभयत्र लंघनम् स्यात् । पुरातनाः पष्टिक-शालिकोद्भवाः प्रियंगु-नीवार-यवप्रसाधिकाः, मुद्गाः, मसूराः, चणकाः, तुवर्यः, मकुष्ठकाः, शृंगिक-वर्मिमत्स्याः, शशः, कपोतः, हरिणैणलावशरारिपारावतवर्त्तकाश्च, वकाः, उरभ्राः च सकालुपुच्छाः, कपिञ्जलाश्चापि, कषायवर्गः, गवामजायाश्च पयो घृतं च, महिष्याः घृतम्, पनसम्, प्रियालम्, रम्भाफलम्, कंचटतण्डुलीयपटोलवेत्राग्रमहार्द्रकाणि, पुराणकुष्माण्डफलं च, पक्वतालानि, तद्बीजदलानि, वासा, स्वादूनि बिम्बानि च, दाडिमानि, खर्जूरधात्रीमिशिनालिकेरम्, कसेरुशृंगाटकपौष्कराणि, कपित्थशालूकपरूषकाणि, भूनिम्बशाकम्, पिचुमर्दपत्रम्, तुम्बी, कलिंगानि च, लाजशक्तुः, द्राक्षा, सिता, माक्षिकम्, इक्षवश्च, शीतोदकम्, चौद्भिदवारि चापि, सेकः, अवगाहः, शतधौतसर्पिः, अभ्यंगयोगः, शिशिरप्रदेहः, हिमानिलः, चन्दनम्, इन्दुपादाः, कथा विचित्राश्च मनोऽनुकूलाः । धारागृहम्, वारिगृहम्, सुशीतम्, वैदूर्यमुक्तामणिधारणं च, रम्भोत्पलाम्भोरुहपत्रशय्या, क्षौमाम्बरम्, चोपवनं सुशीतम्, प्रियंगुकाचन्दनरूषितानाम् वरांगनानाम् चापि आलिंगनम्, पद्माकराणां सरितां ह्रदानाम् चन्द्रोदयानां हिमसीकराणाम् सुशीतलानां गिरिनिर्झराणां श्रुतिप्रशस्तानि च कीर्त्तनानि, प्रतीरनीरम्, हिमवालुका च, शोणितपित्तरोगे नृणां मित्रम् ॥१-१०॥

भावार्थः

अधोगत रक्तपित्तमा वमन, ऊर्ध्वगत रक्तपित्तमा विरेचन र उभयगत रक्तपित्तमा लंघन गर्नुपर्दछ। पुरानो शालि र षष्टिक धानको चामल, प्रियंगु र नीवार धान तथा जौबाट सिद्ध गरिएका खाने कुराहरू; मूंग, मुसुरो, चना, अरहर र मोठका दाल तथा रस; शृंगिक र वर्मि माछा; खरायो, परेवा; हरिण, मृग, लाभ, टिटिहिरो[७१], घरपालुवा परेवा, बट्टाइ, बकुल्ला, उरभ्र (भेडा), कालपुच्छ (कालो पुच्छर हुने मृग)[७२], कपिञ्जल (गौरतित्तिरः, एक किसिमका् तित्रो, गोरो तित्रो), कषाय वर्गका आहार, गाई र बाखाको दुध-घिउ, भैंसीको घिउ, चिरौंजी, केरा, कञ्चटको साग (कानेसाग/पिर्रे), लुँडे, परबर, बेतका टुसा, महार्द्रक (वृक्षाम्ल/अमिली/अदुवा), पुरानो कुभिण्डो, पाकेको ताडफल र बीजदल, असुरो, गुलियो बिम्बफल,, दाडिम, खजुर, अमला, मिशि (शतपुष्पा, सूप), नरिवल, कसेरु, सिंघडा, पौष्कर (पुष्करमूल), कपित्थ, शालूक (कमलकन्द), परूषक (सालफुस्रो/फालसा), भूनिम्बशाक (चिराइतो), निम्बपत्र, लौका, खरबुजो, लाजाको सक्तु (सातु), दाख, मिश्री, मह, उखु र उखुबाट बनेका गुलियाहरू, चिसो पानी, जमिनमुनिको पानी, सेक, अवगाहन, शयपटक धोएको घृत, अभ्यंगयोग (घस्ने तेलहरू), शीतल प्रदेह, हिमाली हावा, चन्दन, चन्द्रकिरण, मनोनुकूलका विभिन्न कथापुराण, शीतल झरना र फोहराका घरहरू, वैदूर्य मुक्तामणि धारण, केरा र कमलपत्रको बिछौना, रेशमी पीताम्बर, शीतल उपवन, प्रियंगु र चन्दन आदिले सुसज्जित सुन्दरीहरूको आलिंगन, कमल फुलेका नदी-पोखरी-ताल-तलैया, हिमाली हावा आउने ठाउँका सुशीतल पहाडी झरनाहरू, जरुवाको पानी, हिमवालुका (कपूर, हिउँका कणहरू) यी सबै रक्तपित्त रोगीका लागि हितकारक हुन्छन् ॥१-१०॥

---

७१ शरं नीरं ऋच्छतीति शरारिः । हुटिट्याउँ, टिटिहिरो ?

७२ कालो पुच्छर हुने भँगेरो ?

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

रक्तपित्तेऽपथ्यानि–

व्यायामाध्वनिषेवणं रविकरस्तीक्ष्णानि कर्माणि च।

क्षोभो वेगविधारणं चपलता हस्त्यश्वयानानि च॥

स्वेदास्रस्रुतिधूमपानसुरतक्रोधाः कुलत्थो गुडो

वार्ताकी दधि माषसर्षपतिलक्षाराश्च कौपं पयः[७३]॥११॥

ताम्बूलं ललदम्बुमद्यलशुनं[७४] शिम्बी विरूद्धाशनम्।

कट्वम्लं लवणं विदाहि च गणस्त्याज्योऽस्रपित्ते नृणाम्॥११.५॥

अन्वयः

व्यायामाध्वनिषेवणं रविकरः, तीक्ष्णानि कर्माणि च, क्षोभः, वेगविधारणम्, चपलता, हस्त्यश्वयानानि च, स्वेदा-स्रस्रुति-धूमपान-सुरत-क्रोधाः, कुलत्थः, गुडः, वार्ताकी, दधि, माष-सर्षप-तिल-क्षाराश्च, कौपं पयः, ताम्बूलम्, ललदम्बु-मद्य-लशुनम्, शिम्बी, विरूद्धाशनम्, कट्वम्लम्, लवणम्, विदाहि च गणः अस्रपित्ते नृणाम् त्याज्यः ॥११-११.५॥

भावार्थः

व्यायाम, पैदल यात्रा, सूर्यकिरण, तीक्ष्णकर्म (साहसी र फुर्तिला कामहरू), क्षोभ, वेगधारण, चञ्चलता, हातीघोडाको सवारी, स्वेदन, रक्तमोक्षण, धूमपान, रति (मैथुन), क्रोध, गहत, गुड, भण्टा, दही, मास, सर्स्यूँ, तिल, क्षार, इनारको पानी, पान, ललदम्बु (एक प्रकारको अमिलो, कागतीको कुनै प्रकार), मद्यपान, लशुन, शिम्बीधान्य, विरुद्धभोजन, पिरो-अमिलो, नुनिलो र खाएपछि पोल्ने विदाही खाने कुराहरू रक्तपित्तरोगीका लागि त्याज्य छन् ॥११-११.५॥

इति रक्तपित्ते पथ्यापथ्यविधिः ॥८॥

यति रक्तपित्तरोगमा अपनाउनुपर्ने पथ्यापथ्यविधि बताइयो ॥८॥

◆◆◆

---

७३ वार्ताकुस्तिलमाषसर्षपदधिक्षीराणि कौपं पयः इति पाठान्तरम् भैषज्यरत्नावल्याम्।

७४ ताम्बुलं नलदाम्बु मद्यलशुनमिति भै.र., श.क.द्रु.।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

९

अथ राजयक्ष्मणि पथ्यापथ्यविधिः

क्षयरोगे पथ्यानि[७५] –

दोषाधिकस्य बलिनो मृदुशुद्धिरग्रे[७६] गोधूममुद्गचणकानि च शालयश्च ॥[७७]
छागादिमांसनवनीतपयोघृतानि क्रव्यादमांसमपि जांगलजा रसाश्च ॥१॥
मार्त्तण्डचन्द्रकिरणैः परिशोषितानि लेह्यानि पक्वबदराणि सुचूर्णितानि ॥[७८]
रागाः सकाम्बलिक-खाडव-वेशवाराः भक्ष्याः शशांककिरणाः मधुरो रसश्च ॥२॥
पक्वानि मोचपनसाम्रफलानि धात्री खर्जूरपौष्करपरूषकनालिकेरम् ॥
शोभाञ्जनं बकुलकं[७९] नवतालशस्यं द्राक्षाफलानि मिषयो पि च माणिमन्थः ॥३॥
सिंहास्यपत्रमजगोमहिषीघृतञ्च[८०] छागाश्रयश्च तदवस्करमूत्रलेपः ॥
मत्स्यण्डिकाशिखरिणीमदिरारसालाः कर्पूरकं मृगमदः सितचन्दनञ्च ॥४॥[८१]
अभ्यञ्जनानि सुरभीण्यनुलेपनानि स्नानानि वेशरचनान्यवगाहनानि ॥
हर्म्यं स्रजः स्मरकथा मृदुगन्धवाहः शीतानि लास्यमपि[८२] चन्द्ररुचो विपञ्ची ॥५॥
सन्दर्शनं मृगदृशामपि हेमचूर्णं मुक्तामणिं प्रचुरभूषणधारणञ्च ॥
होमः प्रदानममरद्विजपूजनानि दिव्यान्नपानमपि[८३] पथ्यगणाः क्षयार्त्ते ॥६॥

अन्वयः

दोषाधिकस्य बलिनः अग्रे मृदुशुद्धिः, गोधूम-मुद्ग-चणकानि च शालयश्च, छागादिमांस-नवनीत-पयोघृतानि, क्रव्यादमांसमपि, जांगलजा रसाश्च, मार्त्तण्ड-चन्द्रकिरणैः परिशोषितानि लेह्यानि, सुचूर्णितानि पक्ववदराणि, रागाः सकाम्बलिक-खाडव-वेशवाराः, भक्ष्याः शशांककिरणाः, मधुरो रसश्च, पक्वानि मोच-पनसा-म्रफलानि, धात्री, खर्जूर-पौष्कर-परूषक-नालिकेरम्, शोभाञ्जनम्, बकुलकम्, नवतालशस्यम्, द्राक्षाफलानि, मिषयो पि च, माणिमन्थः, सिंहास्यपत्रम्, अज-गो-महिषी-घृतञ्च, छागाश्रयश्च तदवस्करमूत्रलेपः, मत्स्यण्डिका-शिखरिणी-मदिरा-रसालाः, कर्पूरकम्, मृगमदः, सितचन्दनञ्च, अभ्यञ्जनानि, सुरभीण्यनुलेपनानि,

---

७५ घृतपक्वमरिचजीरकसंस्कृतलावतित्तिरजरस इति च पथ्ये पठितं विद्यते शब्दकल्पद्रुमे । तथा च भैषज्यरत्नावल्याम्– मद्यानि जांगलं पक्षिमृगमांसं विशुष्यताम् । मुद्गषष्टिकगोधूमयवशाल्यादयो हितः ॥ इति प्रारम्भिकः पाठः ।

७६ आदौ भै.र. ।

७७ गोधूममुद्गचणकारुणशालयश्च इति भैषज्यरत्नावल्याम् ।

७८ लेह्यान्यपक्वपललानि सूचूर्णितानि इति भै.र., श.क.द्रु. । काँचो मासु सुकाएर बनाएको चूर्ण ।

७९ च कुलकं भै.र. । परबर ।

८० सिंहास्यपत्रमपि गोमहिषीघृतञ्च इति भै.र. ।

८१ मृगमदासितचन्दनञ्च इति पाठश्च दृश्यते । असितचन्दम् रक्तचन्दनम् ।

८२ गीतानि नृत्यमपि इति भै.र. । गीतानि लास्यमपि श.क.द्रु. ।

८३ हृद्यान्नपानमपि इति भै.र., श.क.द्रु. । हृद्य खानपान ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्नानानि, वेशरचनानि, अवगाहनानि, हर्म्यं, स्रजः, स्मरकथा, मृदुगन्धवाहः, शी (गी)तानि, लास्यमपि, चन्द्ररुचो विपंची, सन्दर्शनं मृगदृशामपि, हेमचूर्णम्, मुक्तामणिं, प्रचुरभूषणधारणञ्च, होमः, प्रदानम्, अमर-द्विज-पूजनानि, दिव्यान्नपानमपि क्षयार्त्ते पथ्यगणाः ॥१-६॥

भावार्थः

दोषको अधिकता र बल हेरेर पहिले मृदुशोधन गर्नुपर्दछ। गहुँ, मूंग, चना, शालिधान, बोका आदिको मासु, नौनी, दुध, घिउ, हिंस्रक क्रव्याद पशुको मांस, जांगल पशुपक्षीको मांसरस, सूर्य र चन्द्रकिरणमा राखिएका अवलेह, राम्ररी चूर्ण पारिएका पाकेका बयरको धुलो, काम्बलिक-खाडव-वेशवारसहितका रागहरू, जेरी–जलेवी, मधुर रसका आहारहरू, पाकेका केरा-कटहर-आँपजस्ता फल, अमला, खजूर, कमलकन्द, फालसा, नरिवल, सहिजन, मौलसिरी, ताजा तालफल, द्राक्षाफल, मिषि (सूप), सैन्धवलवण, असुरोका पात, गाई-भैंसी-बाखाको दुध, बाखाहरूको नजिक बस्नु तिनीहरूको मलमूत्रको लेप लगाउनु, मत्स्यण्डिका[८४], शिखरिणी(दहीमा मिस्री वा सख्खर तथा मसला मिलाएर बनाएको एक परिकार), मदिरा, रसाला(दहीको पानी सफा कपडाले राम्ररी निथारेर तयार पारिएको दहीको एक स्वादिष्ट परिकार), कपूर, कस्तूरी, चन्दन, अभ्यंग र सुगन्धी अनुलेपन, स्नान, वेशरचना– शरीरको आकृतिका विभिन्न रचनाहरू या भेष रच्नु वा सुहाउँदा कपडा लगाउनु, अवगाहन, न्यानो सुविधाजनक घर, मालाहरू, प्रेमकथा, कोमल वायु, शीतल पदार्थहरू, ख्यालठट्टा, चन्द्रकिरणसहितको वाद्य या संगीत, मृगनयनीहरूको दर्शन, सुवर्णभस्म, मोती, उपयुक्त र पर्याप्त आभूषणहरूको धारण, हवन, दान, देवता र ब्राह्मणहरूको पूजा र दिव्य अन्नपान यी क्षयरोगीहरूका लागि पथ्यगण हुन् ॥१-६॥

क्षयरोगेऽपथ्यानि–

विरेचनं वेगविधारणञ्च श्रमं स्त्रियं स्वेदनमञ्जनञ्च ॥
प्रजागरं साहसकर्मसेवां रुक्षान्नपानं विषमाशनञ्च ॥७॥
ताम्बूलिकालिंगकुलत्थमाषरसोनवंशांकुररामठानि ॥[८५]
अम्लानि तिक्तानि कषायकाणि कटूनि सर्वाणि च पत्रशाकम् ॥८॥
क्षारान् विरूद्धान्यशनानि बिम्बी[८६] कर्कोटकं चापि विदाहि सर्वम् ॥
कठिल्लकं कोलमपि[८७] क्षयेषु विवर्जयेत्सन्ततमप्रमत्तः ॥९॥

---

८४ इक्षो रसो यः संपक्वो घनः किञ्चिद् द्रवान्वितः। मदवत् स्यन्दते यस्मान्मत्स्यण्डीति निगद्यते।
८५ कालिंग इत्यस्य स्थाने कालिन्द इति पाठः भै.र.। कालिंगस्त्वस्य एव पर्यायः।
८६ शिम्बी इति भै.र., श.क.द्रु।
८७ कठिल्लकं कृष्णमपि इति भै.र., श.क.द्रु.। कालो करेला।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अन्वयः

विरेचनम्, वेगविधारणं च, श्रमम्, स्त्रियम्, स्वेदनम्, अञ्जनं च, प्रजागरम्, साहसकर्मसेवाम्, रुक्षान्नपानम्, विषमाशनं च, ताम्बूलि-कालिंग-कुलत्थ-माष-रसोन-वंशाङ्कुर-रामठानि, अम्लानि, तिक्तानि, कषायकाणि, कटूनि सर्वाणि, च पत्रशाकम्, क्षारान्, विरूद्धान्यशनानि, बिम्बीम्, कर्कोटकम्, चापि विदाहि सर्वम्, कठिल्लकं कोलमपि सन्ततमप्रमत्तः क्षयेषु विर्वजयेत् ।।७-९।।

भावार्थः

विरेचन, वेगधारण, श्रम, स्त्रीसंसर्ग, स्वेदन, अञ्जन, जागरण, साहसको काम, रुक्ष अन्नपान, विषम भोजन, पान, तरबूजा, गहत, माष, लशुन, बाँसको तामा र टुसा, हिङ, अमिला-तिता-टर्रा-पिरा खानेकुराहरू, पत्रशाक, क्षारहरू, विरुद्धभोजन, बिम्बफल (गोलकाँक्री), कर्कोटक (चटेलो, चटेल करेलो), विदाही खानेकुराहरू, करेला र सानो बयर यिनीहरूलाई सधैं अप्रमत्त रहेका वैद्यले राजयक्ष्मामा वर्जित गर्नुपर्दछ ।।७-९।।

इति राजयक्ष्मणि पथ्यापथ्यविधिः ।।९।।

यति राजयक्ष्मारोगमा अपनाउनुपर्ने पथ्यापथ्यविधि बताइयो ।।९।।

◆◆◆

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

१०
अथ श्वसि पथ्यापथ्यविधिः

श्वासरोगे पथ्यानि–

विरेचनं स्वेदनधूमनस्यप्रच्छर्दनानि[८८] स्वपनं दिवा च ॥
पुरातनाः षष्टिकरक्तशालयः कुलत्थगोधूमयवाः प्रशस्ताः ॥१॥[८९]
शशाहिभुक्तित्तिरिलावदक्षशुकादयो धन्वमृगा द्विजाश्च ॥
पुरातनं सर्पिरजाप्रभूतं[९०] पयोघृतं चापि सुरा मधूनि ॥२॥
निदिग्धिकावास्तुकतण्डुलीयजीवन्तिकामूलकपोदिका च ॥[९१]
पटोलवार्त्ताकरसोनपथ्याजम्बीरविम्बीफलमातुलुंगम् ॥३॥
द्राक्षा त्रुटिः पौष्करमुष्णवारि कटुत्रयं गोजनितं च मूत्रम् ॥
अन्नानि पानानि च भोजनानि श्लेष्मानिलघ्नानि च यानि यानि ॥४॥
वक्षः प्रदेशादपि पार्श्वयुग्मे करस्थयोर्मध्यमयोर्द्वयोश्च ॥
प्रदीप्तलोहेन च कण्ठकूपे दाहोपि च श्वासिनि पथ्यवर्गः ॥५॥

अन्वयः

विरेचनम्, स्वेदन-धूम-नस्य-प्रच्छर्दनानि, दिवा स्वपनं च, पुरातनाः षष्टिक-रक्तशालयः कुलत्थ-गोधूम-यवाः प्रशस्ताः, शशा-हिभुक्-तित्तिरि-लाव-दक्ष-शुकादयः, धन्वमृगाः, द्विजाश्च, पुरातनं सर्पिरजाप्रभूतं, पयोघृतं चापि, सुरा, मधूनि, निदिग्धिका-वास्तुक-तण्डुलीय-जीवन्तिका-मूलक-पोदिका च, पटोल-वार्त्ताक-रसोन-पथ्या-जम्बीर-बिम्बीफल-मातुलुंगाः, द्राक्षा, त्रुटिः, पौष्करम्, उष्णवारि, कटुत्रयं, गोजनितं च मूत्रम्, यानि यानि च श्लेष्मानिलघ्नानि अन्नानि पानानि भोजनानि च, वक्षः प्रदेशादपि पार्श्वयुग्मे करस्थयोर्मध्यमयोर्द्वयोश्च कण्ठकूपे च प्रदीप्तलोहेन दाहोपि च श्वासिनि पथ्यवर्गः ॥१-५॥

भावार्थः

विरेचन, स्वेदन, धूमपान, नस्य, वमन, दिवाशयन, पुराना रक्तशाली-षष्टिक, उचित अवस्थाका गहत-गहुँ-जौ, खरायो, गरुड[९२], तित्रो, लाभ, दक्ष (कुखुरा), शुक (सुघा), धन्व मृग र द्विज अर्थात् जांगल पशु र पक्षी, बाख्राको पुरानो घिउ, दुध, घिउ, सुरा, मह, कण्टकारी, बेथे, लुँडे, जीवन्ति (जिरी), मूला, पोदिका (उपोदिका,

---

८८ विरेचनं स्वेदनधूमपानप्रच्छर्दनानि इति भै.र., श.क.द्रु. । नस्यस्यापथ्येऽपि पाठः । अतोयं पाठः स्वीकरणीयः ।
८९ पुरातनाः षष्टिकरक्तशालिकुलत्थगोधूमयवाः, भै.र., श.क.द्रु. ।
९० प्रसूतम्, भै.र. ।
९१ निदिग्धिकावास्तुकतण्डुलीयं जीवन्तिकामूलकपोतिका च, भै.र ।
९२ मयूर भै.र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पवई साग) परवर, भण्टा, लशुन, हर्रो, ज्यामीर, बिम्बफल (गोलकाँक्री), बिमिरो, दाख, त्रुटी (सुकुमेल), पुष्करमूल[९३], तातो पानी, त्रिकटु, गोमूत्र, कफवातशामक अन्नपान, वक्ष र पार्श्वका बीचमा, दुवै हातका माझी औंलामा र कण्ठकूपमा तातो फलामले दहनकर्म गर्नु यी सबै श्वासरोगीका लागि पथ्यवर्ग हुन् ॥१-५॥

श्वासरोगेऽपथ्यानि–

मूत्रोद्गारच्छर्दितृट्कासरोधो नस्यं वस्तिर्दन्तकाष्ठं श्रमश्च ॥

अध्वा भारो रेणवः सूर्यपादा विष्टम्भीनि ग्राम्यधर्मो विदाहि ॥६॥

आनूपानामामिषं तैलभृष्टं निष्पावाश्च श्लेष्मकारीणि माषः ॥

रक्तस्रावः पूर्ववातोऽनुपानं मेषीसर्पिर्दुग्धमम्भोऽपि दुष्टम् ॥७॥

मत्स्याः कन्दाः सर्षपाश्चान्नपानं रुक्षं शीतं गुर्वपि श्वासि वर्ज्यम् ॥७.५॥[९४]

अन्वयः

मूत्रोद्गारच्छर्दितृट्कासरोधः, नस्यम्, वस्तिः, दन्तकाष्ठम्, श्रमश्च, अध्वा, भारो, रेणवः, सूर्यपादाः, विष्टम्भीनि, ग्राम्यधर्मः, विदाहि, आनूपानामामिषम्, तैलभृष्टम्, निष्पावाश्च, श्लेष्मकारीणि, माषः, रक्तस्रावः, पूर्ववातः, अनुपानम्, मेषीसर्पिः, दुग्धम्, दुष्टम् अम्भोऽपि मत्स्याः, कन्दाः, सर्षपाः, रुक्षं शीतं गुर्वपि चान्नपानं श्वासि वर्ज्यम् ॥६-७.५॥

भावार्थः

मूत्र, डकार, वान्ता, तिर्खा, खोकीका वेगहरूलाई अवरोध गर्नु; नस्य, वस्ति, दन्तकाष्ठको प्रयोग, श्रम, पैदल यात्रा, धुलो, सूर्यकिरण, विष्टम्भी (मलावरोधक) पदार्थ, मैथुन, विदाही (दाहजनक) खानेकुराहरू, आनूप पशुपक्षीको मासु, तेलमा भुटेका खानेकुराहरू, भटमास, कफवर्द्धक आहारविहार, रक्तस्राव, पूर्वी वतासको सेवन, खानापछिको अनुपान (तरल पदार्थ) भेडाको दुध-घिउ, दूषित पानी, माछा, कन्दमूल, सर्स्यूँ, रुक्ष-शीत-गुरु अन्नपान यति श्वासरोगीहरूका लागि वर्जित छन् ॥६-७.५॥

इति श्वसि पथ्यापथ्यविधिः ॥१०॥

यति श्वासरोगमा अपनाउनुपर्ने पथ्यापथ्यविधि बताइयो ॥१०॥

◆◆◆

---

९३ कमलवीज भै.र. ।

९४ गुर्वपि श्वास्यमित्रम् भै.र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

११
अथ कासे पथ्यापथ्यविधिः

कासरोगे पथ्यानि–

स्वेदो विरेचनं छर्दिर्धूमपानं समोषिताः ।[९५]
शालिषष्टिकगोधूमश्यामाकयवकोद्रवाः ॥१॥
आत्मगुप्तामाषमुद्गकुलत्थानां रसाः पृथक् ।
ग्राम्यौदकानूपधन्वमांसानि विविधानि च ॥२॥
सुरा पुरातनं सर्पिश्छागं चापि पयोघृतम् ।
वास्तुकं वायसीशाकं वार्त्ताकं बालमूलकम् ॥३॥
कण्टकारी कासमर्दो जीवन्ती सुनिषण्णकम् ।
द्राक्षा बिम्बी मातुलुंगं पौष्करं वासकं त्रुटिः ॥४॥
गोमूत्रं लशुनं पथ्या व्योषमुष्णोदकं मधु ।
लाजा दिवसनिद्रा च लघून्यन्नानि यानि च ॥५॥
पथ्यमेतद् यथादोषमुक्तं कासगदातुरे ॥५.५॥

अन्वयः

स्वेदः, विरेचनम्, छर्दिः, धूमपानम्, समोषिताः शालि- षष्टिक- गोधूम- श्यामाक- यव- कोद्रवाः, आत्मगुप्ता- माष- मुद्ग- कुलत्थानां पृथक् रसाः, विविधानि ग्राम्यौ- दका- नूप- धन्व- मांसानि च, सुरा, पुरातनं सर्पिः, छागं चापि पयोघृतम्, वास्तुकम्, वायसीशाकम्, वार्त्ताकम्, बालमूलकम्, कण्टकारी, कासमर्दः, जीवन्ती, सुनिषण्णकम्, द्राक्षा, बिम्बी, मातुलुंगम्, पौष्करम्, वासकम्, त्रुटिः, गोमूत्रम्, लशुनम्, पथ्या, व्योषम्, उष्णोदकम्, मधु, लाजाः, दिवसनिद्रा च, लघून्यन्नानि यानि च एतत् यथादोषं कासगदातुरे पथ्यं उक्तम् ॥१-५.५॥

भावार्थः

स्वेदन, विरेचन, वमन, धूमपान, राम्ररी सुकाइएका शाली-षष्टिक-गहुँ-सामा-जौ-कोदोका परिकार; काउछो, मास, मूगी, गहतहरूका छुट्टाछुट्टै रस; विभिन्न किसिमका ग्राम्य, औदक र आनूप मृगजातिका मासुहरू; सुरा, पुरानो घिउ, बाखाको दुध र घिउ, बेथे, कबई, भण्टा, कलिलो मूला, कण्टकारी, कासमर्द, जीवन्ती (जिरी), सुनिषण्णक (चारपाते चरी अमिलो ?), दाख, बिम्बी (गोलकाँक्री), बिमिरो, पुष्करमूल[९६], असुरो, सुकुमेल, गोमूत्र, लशुन, हर्रो, त्रिकटु, तातो पानी, मह, लाजा, दिवाशयन, हलुका अन्नपान तथा दोषनुसारका आहारविहार

९५ समाशिता भै.र. । समाशनमित्यर्थः समशन अर्थमा समाशिता शब्द प्रयोग हुन्छ। यहाँ एक वर्ष पुराना अन्न भन्न खोजिएको हो। अतः समोषिताः यही शब्द उपयुक्त हुन्छ।

९६ कमलगट्टा भै.र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यी कासरोगीहरूका लागि पथ्य हुन्छन् ॥१-५.५॥

कासरोगेऽपथ्यानि–

वस्तिं नस्यमसृङ्मोक्षं व्यायामं दन्तघर्षणम् ॥६॥

आतपं दुष्टपवनं रजोमार्गनिषेवणम् ।

विष्टम्भीनि विदाहीनि रुक्षाणि विविधानि च ॥७॥

शकृन्मूत्रोद्गारकासवमिवेगविधारणम् ।

मत्स्यं कन्दं सर्षपं च तुम्बीफलमुपोदिकाम् ॥८॥

दुष्टाम्बु चान्नपानं च विरुद्धान्यशनानि च ।

गुरुं शीतं चान्नपानं कासरोगी परित्यजेत् ॥९॥

अन्वयः

वस्तिम्, नस्यम्, असृङ्मोक्षम्, व्यायामम्, दन्तघर्षणम्, आतपम्, दुष्टपवनम्, रजोमार्गनिषेवणम्, विविधानि विष्टम्भीनि विदाहीनि रुक्षाणि च, शकृन्मूत्रोद्गारकासवमिवेगविधारणम्, मत्स्यम्, कन्दम्, सर्षपं च, तुम्बीफलम्, उपोदिकाम्, दुष्टाम्बु च, अन्नपानं च, विरुद्धान्यशनानि च, गुरुं शीतं चान्नपानं कासरोगी परित्यजेत् ॥६-९॥

भावार्थः

वस्ति, नस्य, रक्तमोक्षण, व्यायाम, दन्तघर्षण, घाम, दूषित हावा, धुलो उड्ने माध्यम र मार्गको सेवन गर्नु, विभिन्न किसिमका विष्टम्भकारक-विदाहकारक र रुक्ष खाद्यपदार्थ, मल-मूत्र-डकार-खोकी-वमनका वेगहरूलाई रोक्नु, माछा, कन्दमूल, सर्स्यूँ, लौका, पवई साग, दूषित पानी, दूषित खानेकुराहरू, विरुद्धभोजन, गह्रुका र सर्दी लगाउने खालका अन्नपान यी सबैलाई कासरोगीहरूले त्याग गर्नुपर्दछ ॥६-९॥

इति कासे पथ्यापथ्यविधिः ॥११॥

यति कासरोगमा अपनाउनुपर्ने पथ्यापथ्यविधि बताइयो ॥११॥

◆◆◆

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

१२
अथ हिक्कायां पथ्यापथ्यविधि

हिक्कारोगे पथ्यानि–

स्वेदनं वमनं नस्यं धूमपानं विरेचनम् ।
निद्रा स्निग्धानि चान्नानि मृदूनि लवणानि च ॥१॥
जीर्णाः कुलत्था गोधूमाः शालयः षष्टिका यवाः ।
एणास्तित्तिरिलावाद्या जांगला मृगपक्षिणः ॥२॥
पक्वं कपित्थं लशुनं पटोलं बालमूलकम् ।
पौष्करं कृष्णतुलसी मदिरा ललदम्बु[९७] च ॥३॥
उष्णोदकं मातुलुंगं माक्षिकं सुरभीजलम् ।
अन्नपानानि सर्वाणि वातश्लेष्महराणि च ॥४॥
शीताम्बुसेकः सहसा त्रासो विस्मापनं भयम् ।
क्रोधो हर्षः प्रियोद्वेगः प्राणायामनिवेषणम् ॥५॥[९८]
दग्धसिक्तमृदाघ्राणं कुर्यात् धाराजलार्पणम् ।
नाभ्यूर्ध्वपीडनं[९९] दाहो दीपदग्धहरिद्रया ॥६॥
पादयोर्द्व्यंगुलान्नाभेरूर्ध्वं चेष्टानि हिक्किनाम् ॥६.५॥

अन्वयः

स्वेदनम्, वमनम्, नस्यम्, धूमपानम्, विरेचनम्, निद्रा, स्निग्धानि चान्नानि मृदूनि लवणानि च, जीर्णाः कुलत्थाः, गोधूमाः शालयः षष्टिका यवाः, एणास्तित्तिरिलावाद्या जांगला मृगपक्षिणः, पक्वं कपित्थम्, लशुनम्, पटोलम्, बालमूलकम्, पौष्करम्, कृष्णतुलसी, मदिरा, ललदम्बु च, उष्णोदकम्, मातुलुंगम्, माक्षिकम्, सुरभीजलम्, सर्वाणि वातश्लेष्महराणि अन्नपानानि च, शीताम्बुसेकः, सहसा त्रासः, विस्मापनम् भयम्, क्रोधः, हर्षः, प्रियोद्वेगः, प्राणायामनिवेषणम्, दग्धसिक्तमृदाघ्राणम्, धाराजलार्पणम्, नाभ्यूर्ध्वपीडनम्, पादयोर्द्व्यंगुलान्नाभेरूर्ध्वं दीपदग्धहरिद्रया दाहश्च हिक्किनाम् इष्टानि भवन्ति ॥१-६.५॥

भावार्थः

स्वेदन, वमन, नस्य, धूमपान, विरेचन, निद्रा, स्निग्ध-मृदु-लवणयुक्त खाद्यपदार्थ, पुराना गहत-गहुँ-शाली-षष्टिक-यव; मृग, तित्रो, लाभजस्ता जांगल मृगपक्षीहरू, पाकेको कैथ, लशुन,

९७ नलदाम्बु भै.र. ।
९८ प्रियस्मृतिः प्राणापाननिषेवणम्, भै.र. ।
९९ नाभ्यूर्ध्वघातनमिति भै.र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

परबर, कलिलो मूला, पुष्करमूल, कालो तुलसी, मदिरा, ललदम्बु (एक प्रकारको कागतीकुलको अमिलो फल, मुखमा पानी आउने खालका अन्य अमिला फलहरू), तातो पानी, बिमिरो, मह, गोमूत्र, वातकफहर अन्नपान, चिसो पानीको सेक; एक्कासी त्रास देखाउनु (डराइदिनु), विस्मात, डर, रिस, हर्ष, प्रियजनप्रतिको उद्वेग, प्राणायामको उचित सेवन, पोलेको माटोलाई पानीमा भिजाएर नाकले सुँघ्नु, पानीको फोहरा सेवन गर्नु, नाभिमाथि पीडन गर्नु, पाउको दुई अंगुल र नाभिमाथिको भागमा हलेदोको वर्ति बनाएर दाह गर्नु यी सबै हिक्कारोगीहरूलाई हित गर्ने कुरा हुन् ।।१-६.५।।

हिक्कारोगेऽपथ्यानि–

वातमूत्रोद्गारकासशकृद्वेगविधारणम् ।।७।।

रजोनिलातपायासान् विरुद्धान्यशनानि च ।

विष्टम्भीनि विदाहीनि रुक्षाणि कफलानि च ।।८।।

निष्पावं राजमाषं च वारिजानूपमामिषम् ।[१००]

अविदुग्धं दन्तकाष्ठं वस्तिं मत्स्यांश्च सर्षपान् ।।९।।

अम्लं तुम्बीफलं कन्दं तैलभृष्टमुपोदिकाम् ।

गुरु शीतं चान्नपानं हिक्कारोगी विवर्जयेत् ।।१०।।

अन्वयः

वातमूत्रोद्गारकासशकृद्वेगविधारणम्, रजोनिलातपायासान्, विरुद्धान्यशनानि च, विष्टम्भीनि विदाहीनि रुक्षाणि कफलानि च, निष्पावम्, राजमाषं च, वारिजानूपमामिषम्, अविदुग्धम्, दन्तकाष्ठम्, वस्तिम्, मत्स्यांश्च, सर्षपान्, अम्लम्, तुम्बीफलम्, कन्दम्, तैलभृष्टम्, उपोदिकाम्, गुरु शीतं चान्नपानम्, हिक्कारोगी विवर्जयेत् ।।७-१०।।

भावार्थः

वायु, मूत्र, डकार, खोकी, दिसाको वेग रोक्नु; धुलो, हावा, घाम र बलको काम; विरुद्धभोजन, राजमा; जलज तथा आनूप मांस, भेडीको दुध, दन्तकाष्ठको प्रयोग, वस्ति, माछा, सर्स्यूँ, अमिलो, लौका, कन्दमूल, तेलमा भुटेका या तारेका खानेकुराहरू, पवई साग, भारी र शीतल खानेकुरा र पेय यी सबैलाई हिक्कारोगीहरूले परहेज गर्नुपर्दछ ।।७-१०।।

इति हिक्कायां पथ्यापथ्यविधिः ।।१२।।

यति हिक्कारोगमा अपनाउनुपर्ने पथ्यापथ्यविधि बताइयो ।।१२।।

◆◆◆

१०० निष्पावः पिष्टकं माषः पिण्याकानूपजामिषम् । भै.र., श.क.द्रु. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

१३
अथ स्वरभेदे पथ्यापथ्यविधिः

स्वरभेदे पथ्यानि–

स्वेदो वस्तिर्धूमपानं विरेकः कवलग्रहः ।
नस्यं भालशिरावेधो यवा लोहितशालयः ॥१॥
हंसाटवीताम्रचूडकेकिमांसरसाः सुरा ।
गोकंटकः काकमाची जीवन्ती बालमूलकम् ॥२॥
द्राक्षा पथ्या मातुलुंगं लशुनं लवणार्द्रकम् ।
ताम्बूल मरिचं सर्पिः पथ्यानि स्वरभेदिनाम् ॥३॥

अन्वयः

स्वेदः, वस्तिः, धूमपानम्, विरेकः, कवलग्रहः, नस्यम्, भालशिरावेधः, यवाः, लोहितशालयः, हंसाटवी-ताम्रचूड-केकि-मांसरसाः, सुरा, गोकण्टकः, काकमाची, जीवन्ती, बालमूलकम्, द्राक्षा, पथ्या, मातुलुंगम्, लशुनम्, लवणार्द्रकम्, ताम्बूलम्, मरिचम्, सर्पिः (एतानि) स्वरभेदिनाम् पथ्यानि ॥१-३॥

भावार्थः

स्वेदन, वस्ति, धूमपान, विरेचन, कवलधारण, नस्य, निधारको शिरावेध, जौ, रक्तशाली, हंस, जंगली कुखुरा र मयूरको मांसरस, सुरा, गोक्षुर, कबई, जीवन्ती, कलिलो मूला, दाख, हर्रो, बिमिरो, लशुन, अदुवा-नुन, पान, मरिच, घिउ यी स्वरभेद रोग लागेका व्यक्तिहरूका लागि पथ्य हुन्छन् ॥१-३॥

स्वरभेदेऽपथ्यानि–

आमं कपित्थं बकुलं शालूकं जाम्बवानि च ।
तिन्दुकानि कषायाणि वमिं प्रश्नं[१०१] प्रजल्पनम् ॥४॥[१०२]
अन्नपानं[१०३] विरुद्धं च स्वरभेदी विवर्जयेत् ॥४.५॥

अन्वयः

आमं कपित्थम्, बकुलम्, शालूकम्, जाम्बवानि च, तिन्दुकानि, कषायाणि, वमिम्, प्रश्नम्, प्रजल्पनम्, विरुद्धञ्च अन्नपानम् स्वरभेदी विवर्जयेत् ॥४-४.५॥

भावार्थः

काँचो कैथ, मौलसिरी, शालूक(कमलकन्द/जलीय कन्द), जामुन, तिन्दुकफलहरू, टर्रा खानेकुराहरू, वमन, अनपेक्षित प्रश्न, फतफत बोलीरहनु, विरुद्ध भोजन यति कुरा स्वरभेद रोगका रोगीहरूले त्याग गर्नुपर्दछ ॥४-४.५॥

इति स्वरभेदे पथ्यापथ्यविधिः ॥१३॥
यति स्वरभेदरोगमा अपनाउनुपर्ने पथ्यापथ्यविधि बताइयो ॥१३॥

◆◆◆

१०१ स्वप्नम्, इति भै.र., श.क.द्रु. ।
१०२ अम्लं दधि च यत्नेन स्वरभेदी विवर्जयेत् । इति भैषज्यरत्नावल्यामतिरिक्तपाठः ।
१०३ अनुपानं इति पाठान्तरम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

१४
अथारुचौ पथ्यापथ्यविधिः

अरुचौ पथ्यानि–

वस्तिर्विरेको वमनं यथाबलं धूमोपसेवा कवलग्रहास्तथा ॥
तिक्तानि काष्ठानि च दन्तघर्षणे चित्रान्नपानानि हितैः कृतान्यपि ॥१॥
गोधूम-मुद्गारुणशालिषष्टिका मांसं वराहाजशशैणसम्भवम् ॥
चेंगो झषाण्डं मधुरालिकेल्लिशः प्रोष्ठी खलेशः कवरी (यी)[१०४] च लोहितः ॥२॥
कर्कारुवेत्राग्रनवीनमूलकं वार्ताकशोभाञ्जनमोचदाडिमम् ॥
भव्यं पटोलं रुचकं घृतं पयो बालानि तालानि रसोनसूरणम् ॥३॥
द्राक्षा रसालं ललदम्बुकाञ्जिकं[१०५] मद्यं रसालो दधि तक्रमार्द्रकम् ॥
कंकोलखर्जूरपियालतिन्दुकं पक्वं कपित्थं बदरं विकंकतम् ॥४॥
तालास्थिमज्जा हिमवालुका सिता पथ्या यवानी मरिचानि रामठम् ॥
स्वाद्वम्लतिक्तानि च देहमार्जनं वर्गोऽयमुक्तोऽरुचिकारिणां[१०६] हितः ॥५॥

अन्वयः

यथाबलम् वस्तिः, विरेकः, वमनम्; धूमोपसेवा, कवलग्रहास्तथा, तिक्तानि काष्ठानि च दन्तघर्षणम्, चित्रान्नपानानि हितैः कृतान्यपि, गोधूम-मुद्गारुणशालिषष्टिकाः, वराहाजशशैणसम्भवम् मासम्, चेंगः, झषाण्डम्, मधुरालिका, इल्लिशः, प्रोष्ठी, खलेशः, कवयी च लोहितः, कर्कारुवेत्राग्रनवीनमूलकम्, वार्ताकशोभाञ्जनमोचदाडिमम्, भव्यं, पटोलम्, रुचकम्, घृतम्, पयः, बालानि तालानि, रसोनसूरणम्, द्राक्षा, रसालम्, ललदम्बु, काञ्जिकम्, मद्यम्, रसाला, दधि, तक्रम्, आर्द्रकम्, कंकोलखर्जूरपियालतिन्दुकम्, पक्वं कपित्थम्, बदरम्, विकंकतम्, तालास्थिमज्जा, हिमवालुका, सिता, पथ्या, यवानी, मरिचानि, रामठम्, स्वाद्वम्लतिक्तानि च, देहमार्जनम् अयं वर्गः अरुचिकारिणां हितः उक्तः ॥१-५॥

भावार्थः

अवस्था र बल अनुसार वस्ति, विरेचन, वमन, धूमपान, कवलधारण, तिक्त काष्ठको दन्तमञ्जन आदिमा प्रयोग, हितकारक विभिन्न खाद्यपरिकारहरू, गहुँ, मूंगी, रक्तशाली, षष्टिक धान्य, बँदेल, बाखो, खरायो, मृगको मासु, चेंगनामक माछा, माछाको अण्डा, मधुरालिका-इल्लिश, प्रोष्ठी-खलेश-कवयी नामका लोहित माछाहरू,

---

१०४ कवरी इति तुलसीविशेषः । अत्र मत्स्यसन्दर्भात् कवयी इति पाठ उपयुक्तः । भैषज्यरत्नावल्यां शब्दकल्पद्रुमे च कवयी इत्येव पाठः ।
१०५ नलदम्बु भै.र. । नलदाम्बु श.क.द्रु. ।
१०६ अरुचिरोगिणे हितः, भै.र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

काँक्रो/कुभिण्डो, वेतका टुसा, कलिलो मूला, भण्टा, सहिजन, केरा, दाडिम, भव्यफल[१०७], परवर, बिरे नून, घिउ, दुध, कलिला तालफल, लसुन, जिमीकन्द (ओल) दाख, आँप, ललदम्बु, काञ्जी, मद्यपान, रसाला, दही, मही, अदुवा, कंकोल, खजूर, चिरौंजी, तिन्दुक (पानी जामुन), पाकेको कैथ, बयर, मयल, ताल-अस्थि, तालमज्जा, कपूर, मिश्री, हर्रो, ज्वानू, मरिच, हिङ, गुलिया, अमिला र तिता खानेकुराहरू, शरीरको परिमार्जन या सफाइ यी सबै अरुचिरोगका लागि हितकारक हुन्छन् ॥१-५॥

अरुचावपथ्यानि–

तृष्णोद्गारक्षुधानेत्रवारिवेगविधारणम् ।[१०८]

अहृद्यान्नमसृङ्मोक्षं क्रोधं लोभं भयं शुचम् ॥६॥

दुर्गन्धानुलेपसेवाञ्च[१०९] न कुर्यादरुचौ नरः ॥६.५॥

अन्वयः

अरुचो नरः तृष्णोद्गारक्षुधानेत्रवारिवेगविधारणम्, अहृद्यान्नमसृङ्मोक्षम्, क्रोधम्, लोभम्, भयम्, शुचम्, दुर्गन्धानुलेपसेवां न कुर्यात् ॥६-६.५॥

भावार्थः

तीर्खा, डकार, भोक, आँसुको वेग रोक्नु, अहृद्य (हृदयलाई प्रिय नहुने अन्न), रक्तमोक्षण, क्रोध, लोभ, भय, शोक, दुर्गन्धको सेवन अरुचि रोग भएका मानिसले गर्नुहुँदैन ॥६-६.५॥

इत्यरुचौ पथ्यापथ्यविधिः ॥१४॥

यति अरुचिरोगमा अपनाउनुपर्ने पथ्यापथ्यविधि बताइयो ॥१४॥

◆◆◆

१०७ नपुसकलिंग प्रयोग हुँदा बोहरी, पुलिंग प्रयोग हुँदा कमरख, भै.र. ।

१०८ कासोद्गार..... भै.र, श.क.द्रु.

१०९ दुर्गन्धारूपसेवाञ्च इति भै.र. । दुर्गन्धानूपसेवाञ्च इति पाठान्तरम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

१४
अथारुचौ पथ्यापथ्यविधिः

अरुचौ पथ्यानि–

वस्तिर्विरेको वमनं यथाबलं धूमोपसेवा कवलग्रहास्तथा ॥
तिक्तानि काष्ठानि च दन्तघर्षणे चित्रान्नपानानि हितैः कृतान्यपि ॥१॥
गोधूम-मुद्गारुणशालिषष्टिका मांसं वराहाजशशैणसम्भवम् ॥
चेंगो झषाण्डं मधुरालिकेल्लिशः प्रोष्ठी खलेशः कवरी (यी)[१०४] च लोहितः ॥२॥
कर्कारुवेत्राग्रनवीनमूलकं वार्ताकशोभाञ्जनमोचदाडिमम् ॥
भव्यं पटोलं रुचकं घृतं पयो बालानि तालानि रसोनसूरणम् ॥३॥
द्राक्षा रसालं ललदम्बुकाञ्जिकं[१०५] मद्यं रसालो दधि तक्रमार्द्रकम् ॥
कंकोलखर्जूरपियालतिन्दुकं पक्वं कपित्थं बदरं विकंकतम् ॥४॥
तालास्थिमज्जा हिमवालुका सिता पथ्या यवानी मरिचानि रामठम् ॥
स्वाद्वम्लतिक्तानि च देहमार्जनं वर्गोऽयमुक्तोऽरुचिकारिणां[१०६] हितः ॥५॥

अन्वयः

यथाबलम् वस्तिः, विरेकः, वमनम्; धूमोपसेवा, कवलग्रहास्तथा, तिक्तानि काष्ठानि च दन्तघर्षणम्, चित्रान्नपानानि हितैः कृतान्यपि, गोधूम-मुद्गारुणशालिषष्टिकाः, वराहाजशशैणसम्भवम् मासम्, चेंगः, झषाण्डम्, मधुरालिका, इल्लिशः, प्रोष्ठी, खलेशः, कवयी च लोहितः, कर्कारुवेत्राग्रनवीनमूलकम्, वार्ताकशोभाञ्जनमोचदाडिमम्, भव्यं, पटोलम्, रुचकम्, घृतम्, पयः, बालानि तालानि, रसोनसूरणम्, द्राक्षा, रसालम्, ललदम्बु, काञ्जिकम्, मद्यम्, रसाला, दधि, तक्रम्, आर्द्रकम्, कंकोलखर्जूरपियालतिन्दुकम्, पक्वं कपित्थम्, बदरम्, विकंकतम्, तालास्थिमज्जा, हिमवालुका, सिता, पथ्या, यवानी, मरिचानि, रामठम्, स्वाद्वम्लतिक्तानि च, देहमार्जनम् अयं वर्गः अरुचिकारिणां हितः उक्तः ॥१-५॥

भावार्थः

अवस्था र बल अनुसार वस्ति, विरेचन, वमन, धूमपान, कवलधारण, तिक्त काष्ठको दन्तमञ्जन आदिमा प्रयोग, हितकारक विभिन्न खाद्यपरिकारहरू, गहुँ, मूंगी, रक्तशाली, षष्टिक धान्य, बँदेल, बाख्रो, खरायो, मृगको मासु, चेंगनामक माछा, माछाको अण्डा, मधुरालिका-इल्लिश, प्रोष्ठी-खलेश-कवयी नामका लोहित माछाहरू,

---

१०४ कवरी इति तुलसीविशेषः । अत्र मत्स्यसन्दर्भात् कवयी इति पाठ उपयुक्तः । भैषज्यरत्नावल्यां शब्दकल्पद्रुमे च कवयी इत्येव पाठः ।
१०५ नलदम्बु भै.र. । नलदाम्बु श.क.द्रु. ।
१०६ अरुचिरोगिणे हितः, भै.र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

काँक्रो/कुभिण्डो, वेतका टुसा, कलिलो मूला, भण्टा, सहिजन, केरा, दाडिम, भव्यफल[१०७], परवर, बिरे नून, घिउ, दुध, कलिला तालफल, लसुन, जिमीकन्द (ओल) दाख, आँप, ललदम्बु, काञ्जी, मद्यपान, रसाला, दही, मही, अदुवा, कंकोल, खजूर, चिरौंजी, तिन्दुक (पानी जामुन), पाकेको कैथ, बयर, मयल, ताल-अस्थि, तालमज्जा, कपूर, मिश्री, हर्रो, ज्वानू, मरिच, हिङ, गुलिया, अमिला र तिता खानेकुराहरू, शरीरको परिमार्जन या सफाइ यी सबै अरुचिरोगका लागि हितकारक हुन्छन् ॥१-५॥

अरुचावपथ्यानि–

तृष्णोद्गारक्षुधानेत्रवारिवेगविधारणम् ।[१०८]

अहृद्यान्नमसृङ्मोक्षं क्रोधं लोभं भयं शुचम् ॥६॥

दुर्गन्धानुलेपसेवाञ्च[१०९] न कुर्यादरुचौ नरः ॥६.५॥

अन्वयः

अरुचो नरः तृष्णोद्गारक्षुधानेत्रवारिवेगविधारणम्, अहृद्यान्नमसृङ्मोक्षम्, क्रोधम्, लोभम्, भयम्, शुचम्, दुर्गन्धानुलेपसेवां न कुर्यात् ॥६-६.५॥

भावार्थः

तीर्खा, डकार, भोक, आँसुको वेग रोक्नु, अहृद्य (हृदयलाई प्रिय नहुने अन्न), रक्तमोक्षण, क्रोध, लोभ, भय, शोक, दुर्गन्धको सेवन अरुचि रोग भएका मानिसले गर्नुहुँदैन ॥६-६.५॥

इत्यरुचौ पथ्यापथ्यविधिः ॥१४॥

यति अरुचिरोगमा अपनाउनुपर्ने पथ्यापथ्यविधि बताइयो ॥१४॥

◆◆◆

१०७ नपुसकलिंग प्रयोग हुँदा बोहरी, पुलिंग प्रयोग हुँदा कमरख, भै.र. ।

१०८ कासोद्गार..... भै.र, श.क.द्रु.

१०९ दुर्गन्धारूपसेवाञ्च इति भै.र. । दुर्गन्धानूपसेवाञ्च इति पाठान्तरम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

१५
अथ छर्दिरोगे पथ्यापथ्यविधिः

वमने पथ्यानि–

विरेचनच्छर्दनलंघनानि स्नानं मृजा लाजकृतश्च मण्डः ॥
पुरातनाः षष्टिकशालिमुद्गकलायगोधूमवचा मधूनि ॥१॥
शशाहिभुक्तित्तिरिलावकाद्याः मृगद्विजा जांगलसंज्ञिताश्च ॥
मनोज्ञनानारसरूपगन्धा[११०] रसाश्च यूषा अपि खाडवाश्च ॥२॥
रागा खडाः काम्बलिकाः सुराश्च वेत्राग्रकुस्तुम्बुरुनालिकेरम् ॥
जम्बीरधात्रीसहकारकोलद्राक्षाकपित्थानि पचेलिमानि ॥३॥
हरीतकीदाडिमबीजपूरं जातीफलं बालकनिम्बवासा ॥
सिताशताह्वाकरिकेशराणि भक्ष्याः मनःप्रीतिकराः हिताश्च ॥४॥
भुक्तस्य वक्त्रे शिशिराम्बुसेकः कस्तूरिकाचन्दनमिन्दुपादाः ॥
मनोज्ञगन्धान्यनुलेपनानि पानानि पुष्पाणि फलानि चापि ॥५॥
रूपाणि शब्दाश्च रसाश्च गन्धाः स्पर्शाश्च ये यस्य मनोनुकूलाः ॥
दाहश्च नाभेस्त्रियवोपरिष्टादिदं हि पथ्यं वमनातुरस्य[१११] ॥६॥

अन्वयः

विरेचनच्छर्दनलंघनानि, स्नानम्, मृजा, लाजकृतश्च मण्डः, पुरातनाः षष्टिक-शालि-मुद्ग-कलाय-गोधूम-वचाः, मधूनि, शशा-हिभुक्-तित्तिरि-लावकाद्याः मृगद्विजा जांगलसंज्ञिताश्च, मनोज्ञनानारसरूपगन्धा, रसाश्च, यूषा अपि, खाडवाश्च, रागाः, खडाः, काम्बलिकाः, सुराश्च, वेत्राग्र-कुस्तुम्बुरु-नालिकेरम्, जम्बीर-धात्री-सहकार-कोल-द्राक्षा-कपित्थानि, पचेलिमानि, हरीतकी-दाडिम-बीजपूरम्, जातीफलम्, बालकनिम्बः, वासा, सिता-शताह्वा-करि-केशराणि, भक्ष्याः, मनःप्रीतिकराः, हिताश्च, भुक्तस्य वक्त्रे शिशिराम्बुसेकः, कस्तूरिका-चन्दन-मिन्दुपादाः, मनोज्ञगन्धान्यनुलेपनानि, पानानि, पुष्पाणि, फलानि चापि, रूपाणि, शब्दाश्च, रसाश्च, गन्धाः, स्पर्शाश्च ये यस्य मनोनुकूलाः, दाहश्च नाभेस्त्रियवोपरिष्टात् इदं हि वमनातुरस्य पथ्यम् ॥१-६॥

भावार्थः

विरेचन, वमन, लंघन, स्नान, मार्जन (सफाइ) लाजमण्ड, पुरानो षष्टिक-शाली-मूंग-केराउ, बोझो, महः, खरायो, गरुड[११२], तित्रो, लाभजस्ता जांगल पशुपक्षीहरूः, मनलाई लोभ्याउने विभिन्न रस, रूप र गन्धहरू,

११० मनोज्ञनानारसगन्धरूपाः भै.र., श.क.द्रु. ।
१११ वमनातुरेषु, भै.र. ।
११२ मयूर, भै.र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

खानेकुराका रस, यूष, खाडव, राग, खड, काम्बलिक, सुरा, वेतका टुसा, धनियाँ, नरिवल, ज्यामीर, अमला, आँप, बयर, दाख, कैथ आदि बोटमै पाकेका फल, हर्रो, दाडिम, बिमिरो, जाईफल, सुगन्धबाल, नीम, असुरो, मिश्री, सूप, नागकेशर, मनलाई प्रीति गराउने खानेकुराहरू, हितकारक खानेकुरा, खाएपछि मुखमा चिसो पानीको सेक, कस्तूरी, चन्दन, चन्द्रकिरण, मनपर्दा गन्ध र अनुलेपनहरू, पेयपदार्थ, पुष्प, फल, जजसको मनलाई जे जे अनुकूल हुन्छ त्यस्तै शब्द, रूप, रस, गन्ध, स्पर्शहरू र नाभिदेखि तीन यव (जवा, जौको नाप) माथि गरिने दहनकर्म यो वर्ग वमन रोगले ग्रस्त व्यक्तिका लागि पथ्यवर्ग हो ॥१-६॥

वमनेऽपथ्यानि–

नस्यं वस्तिं स्नेहनं स्नेहपानं रक्तस्रावं दन्तकाष्ठं द्रवान्नम् ॥

बीभत्सेक्षां भीतिमुद्वेगमुष्मं[११३] स्निग्धासात्म्याहृद्यवैरोचकान्नम्[११४]॥७॥

लम्बाबिम्बीकोशवत्यो[११५] मधूकम् चित्रां मेदां[११६] सर्षपान् देवदालीम् ।

व्यायामं चासात्म्यदुष्टान्नपानं[११७] छर्द्यां सद्यो[११८] वर्जयेदप्रमत्तः ॥८॥

अन्वयः

नस्यम्, वस्तिम्, स्नेहनम्, स्नेहपानम्, रक्तस्रावम्, दन्तकाष्ठम्, द्रवान्नम्, बीभत्सेक्षाम्, भीतिम्, उद्वेगम्, उष्मम्, स्निग्धासात्म्याहृद्यवैरोचकान्नम्, लम्बाबिम्बीकोशवत्यो, मधूकम्, चित्राम्, मेदाम्, सर्षपान्, देवदालीम्, व्यायामम्, असात्म्यदुष्टान्नपानम् च अप्रमत्तः छर्द्यां सद्यो वर्जयेत् ॥६-८॥

भावार्थः

नस्य, वस्ति, स्नेहन, स्नेहपान, रक्तमोक्षण, दन्तकाष्ठ, तरल अन्न, बीभत्स दृश्य, भय, उद्वेग, ताप, स्निग्ध-असात्म्य-अहृद्य-अरुचिप्रद अन्न, लम्बा (लाम्चो लौका), बिम्बी (गोलकाँक्री), कोशवती (कटु कोशातकी, पाटे घिरौंलो, भिंगनी) महुवा, चित्रा (जयपाल)[११९], मेदा, सर्स्यूँ, देवदाली, व्यायाम, असात्म्य र दूषित अन्न यतिलाई छर्दिरोग भएको अवस्थामा अप्रमत्त या सावधान चिकित्सकले तत्कालै वर्जित गरिदिनुपर्छ ॥६-८॥

इति छर्दिरोगे पथ्यापथ्यविधिः ॥१५॥

यति छर्दिरोगमा अपनाउनुपर्ने पथ्यापथ्यविधि बताइयो ॥१५॥

◆◆◆

---

११३ उष्णम् । भै.र., श.क.द्रु. ।

११४ वैरोधिकान्नम् । भै.र., श.क.द्रु. ।

११५ रम्भा शिम्बी, श.क.द्रु. ।

११६ चित्रामेलाम्, भै.र., श.क.द्रु. ।

११७ व्यायामञ्च छत्रिकामञ्जनञ्च, भै.र., श.क.द्रु. ।

११८ सत्याम्, भै.र. ।

११९ इन्द्रायण, भै.र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

१६
अथ तृष्णारोगे पथ्यापथ्यविधिः

तृष्णारोगे पथ्यानि–

शोधनं वमनं[१२०] निद्रा स्नानं कवलधारणम् ।[१२१]
कोद्रवाः शालयः पेया विलेपी लाजसक्तवः ॥१॥
अन्नमण्डो धन्वरसाः शर्करा रागखाडवौ ।
भृष्टैर्मुद्गैर्मसूरैर्वा चणकैर्वा कृतो रसः ॥२॥
रम्भापुष्पं तैलकूर्च[१२२] द्राक्षापर्पटपल्लवम् ।
कपित्थं कोलमम्लीका कूष्माण्डकमुपोदिका ॥३॥
खर्ज्जूरं दाडिमं धात्री कर्कटी[१२३] ललदम्बु[१२४]च ।
जम्बीरं करमर्दश्च बीजपूरं गवां पयः ॥४॥
मधूकपुष्पं ह्रीबेरं तिक्तानि मधुराणि च ।
बालतालाम्बु शीताम्बु पयः पेटी प्रपानकम् ॥५॥
माक्षिकं सारसीतोयं शताह्वा नागकेशरम् ।
एला जातीफलं पथ्या कुस्तुम्बुरु च चन्दनम्[१२५] ॥६॥
घनसारो गन्धसारः कौमुदी शिशिरानिलः ।
चन्दनार्द्रप्रियाश्लेषो रत्नाभरणधारणम् ॥७॥
हिमानुलेपनं च स्यात् पथ्यमेतत् तृषातुरे ॥७.५॥[१२६]

अन्वयः

शोधनम्, वमनम्, निद्रा, स्नानम्, कवलधारणम्, कोद्रवाः, शालयः, पेया, विलेपी, लाजसक्तवः, अन्नमण्डः, धन्वरसाः, शर्करा, रागखाडवौ, भृष्टैर्मुद्गैर्मसूरैर्वा चणकैर्वा कृतो रसः, रम्भापुष्पम्, तैलकूर्चम्, द्राक्षा, पर्पटपल्लवम्, कपित्थम्, कोलम्, अम्लीका, कूष्माण्डकम्, उपोदिका, खर्ज्जूरम्, दाडिमम्, धात्री, कर्कटी, ललदम्बु च, जम्बीरम्, करमर्दश्च, बीजपूरम्, गवां पयः, मधूकपुष्पम्, ह्रीबेरम्, तिक्तानि, मधुराणि च,

१२० शमनं भै.र., श.क.द्रु.।
१२१ जिह्वाधःसिरयोर्दाहो दीपदग्धहरिद्रया । इत्यरिक्तपाठः, भै.र.।
१२२ तक्रकूर्चं, भै.र. ।
१२३ कर्करी, भै.र. ।
१२४ नलदाम्बु, भै.र., श.क.द्रु. । खसको पानी । जलदम्बु इति च पाठान्तरम् ।
१२५ टंकणं भै.र., श.क.द्रु. ।
१२६ भैषज्यरत्नावल्यां पृथक् पाठक्रमं दृश्यते । यथा–शोधनं शमनं निद्रां स्नानं कवलधारणम् । जिह्वाधःसिरयोर्दाहो दीपदग्धहरिद्रया ॥ कोद्रवाः शालयः पेया विलेपी लाजसक्तवः । अन्नमण्डं धन्वरसाः शर्करा रागषाडवौ ॥ एला जातिफलं पथ्या कुस्तुम्बुरु च टंकणम् । घनसारो गन्धसारः कौमुदी शिशिरानिलः ॥ बालतालाम्बु शीताम्बु पयःपेटी प्रमानकम् । माक्षिकं सरसां तोयं शताह्वा नागकेशरम् ॥ चन्दनार्द्रप्रियाश्लेषो रत्नाभरणधारणम् । हिमानुलेपनञ्च स्यात् पथ्यमेतत्तृषातुरे ॥ रम्भापुष्पं तक्रकूर्चं द्राक्षा पर्पटपल्लवाः । भृष्टैर्मुद्गैर्मसूरैर्वा चणकैर्वा कृतो रसः ॥ कपित्थं कोलमम्लीका कूष्माण्डकमुपोदिका । खर्जूरं दाडिमं धात्री कर्करी नलदाम्बु वा ॥ जम्बीरं करमर्दं च बीजपूरं गवां पयः । मधूकपुष्पं ह्रीबेरं तिक्तानि मधुराणि च ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

बालतालाम्बु, शीताम्बु, पयः पेटी, प्रपानकम्, माक्षिकम्, सारसं तोयम्, शताह्वा, नागकेशरम्, एला, जातीफलम्, पथ्या, कुस्तुम्बुरु च, चन्दनम्, घनसारः, गन्धसारः, कौमुदी, शिशिरानिलः, चन्दनार्द्रप्रियाश्लेषः, रत्नाभरणधारणम्, हिमानुलेपनम् च एतत् तृषातुरे पथ्यं स्यात् ॥१-७.५॥

भावार्थः

शोधन, वमन, निद्रा, स्नान, कवलधारण, कोदो, शालीधान, पेया, विलेपी, लाजसक्तु, अन्नमण्ड (धान्यरस, भातको माड) धन्व आदि जांगल पशुपक्षीको मांसरस, शर्करा (सख्खर, मिश्री), राग-खाडव (मुरब्बा-चटनी), भुटेको मूग-मुसुरो-चना आदिको संस्कृतरस, रम्भापुष्प (केराको बुंगो), तैलकूर्च (ढडेको तेल, डढुल्लो, काती ?) द्राक्षा, पर्पटपल्लव (पित्तपापडाको मुना/पात) कपित्थ, बयर, अमिली, कुभिण्डो, पवई साग, खजूर, दाडिम, अमला, काँक्रो, कागतीजस्ता अमिला फल, ज्यामीर, करमर्द (पनेर), बिमिरो, गाईको दुध, महुवाको फूल, ह्रीबेर (सुगन्धबाल), तिता वस्तु, गुलिया वस्तु, काँचो तालफलको रस (ताडी), चिसो पानी, नरिवल, शीतल पेय, मह, तलाउको पानी, सूप, नागकेशर, अलैंची, जाईफल, हर्रो, धनियाँ, चन्दन, कपूर, श्रीखण्ड, चाँदनी, शीतल पवन, चन्दनको लेप लगाएकी प्रियतमासितको आलिंगन, रत्नका आभूषण लगाउनु, शीतल अनुलेप यी सबै तीर्खा लाग्ने (तृषा)रोगले सताइएका व्यक्तिका लागि पथ्य हुन्छन् ॥१-७.५॥

तृष्णारोगेऽपथ्यानि–

स्वेदाञ्जनस्नेहनधूमपानं व्यायामनस्यातपदन्तकाष्ठम् ॥
गुर्वन्नमम्लं लवणं कषायं कटुत्रयं दुष्टजलानि तीक्ष्णम् ॥८॥
एतानि सर्वाणि हिताभिलाषी तृषातुरो नैव भजेत्कदाचित् ॥८.५॥

अन्वयः

हिताभिलाषी तृषातुरः स्वेदा-ञ्जन-स्नेहन-धूमपानम्, व्यायाम-नस्या-तप-दन्तकाष्ठम्, गुर्वन्नम्, अम्लम्, लवणम्, कषायम्, कटुत्रयम्, दुष्टजलानि, तीक्ष्णम् एतानि सर्वाणि एव कदाचित् न भजेत् ॥८-८.५॥

भावार्थः

कहिल्यै पनि तृष्णारोगले ग्रस्त हिताभिलाषी व्यक्तिले स्वेदन, अञ्जन, स्नेहन, धूमपान, आतपसेवन, व्यायाम, नस्य, दन्तकाष्ठ, गुरु अन्न, अमिलो, नुनिलो, टर्रो, कटुत्रय(त्रिकटु–सुठो, मरिच, पिप्ला), दूषित पानी र तिख्खर पदार्थहरूको सेवन गर्नुहुँदैन ॥८-८.५॥

इति तृष्णारोगे पथ्यापथ्यविधिः ॥१६॥
यति तृष्णारोगमा अपनाउनुपर्ने पथ्यापथ्यविधि बताइयो ॥१६॥

◆◆◆

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

१७

अथ मूर्च्छारोगे पथ्यापथ्यविधिः

मूर्च्छारोगे पथ्यानि–

सेकावगाहौ मणयः सहाराः शीताः प्रदेहाः व्यजनानिलाश्च ॥
शीतानि पानानि च गन्धवन्ति धारागृहं शीतमरीचिरोचिः ॥१॥[१२७]
धूपोऽञ्जनं[१२८] नावनमस्रमोक्षो[१२९] दाहश्च सूचीपरितोदनानि,
लोम्नां त्वचानामपि[१३०] लुञ्छनानि नखान्तपीडा दशनोपदंशः ॥२॥
नासामुखद्वारमरुन्निरोधो विरेचनच्छर्दनलंघनानि ॥
क्रोधो भयं दुःखकरी च शय्या कथा विचित्राः सुमनोहराश्च[१३१]॥३॥
छाया नभोम्भः शतधौतसर्पिर्मृदूनि तीक्ष्णानि[१३२] च लाजमण्डाः ॥
जीर्णा यवा लोहितशालयश्च कौम्भं हविर्मुद्‌गसतीनयूषाः ॥४॥
धन्वोद्‌भवा मांसरसाश्च रागाः सखाडवाः गव्यपयः सिता च ॥
पुराणकुष्माण्डपटोलमोचहरीतकीदाडिमनालिकेरम् ॥५॥
मधूकपुष्पाणि च तण्डुलीयमुपोदिकान्नानि लघूनि चापि ॥
प्रतीरनीरं सितचन्दनानि कर्पूरनीरं हिमबालुका च ॥६॥
अत्युच्चशव्दोऽद्‌भुतदर्शनानि गीतानि वाद्यान्यपि चोत्कटानि ।
श्रमः स्मृतिश्चिन्तनमात्मबोधो धैर्यञ्च मूर्च्छावति पथ्यवर्गः ॥७॥[१३३]

अन्वयः

सेकावगाहौ, सहाराः मणयः, शीताः प्रदेहाः, व्यजनानिलश्च, शीतानि गन्धवन्ति च पानानि, धारागृहम्, शीतमरीचिरोचिः, धूपोऽञ्जनम्, नावनम्, अस्रमोक्षः, सूचीपरितोदनानि दाहश्च, लोम्नां त्वचानामपि लुञ्छनानि, नखान्तपीडा, दशनोपदंशः, नासामुखद्वारमरुन्निरोधः, विरेचनच्छर्दनलंघनानि, क्रोधः, भयम्, दुःखकरी च शय्या, विचित्राः सुमनोहराश्च कथाः, छाया, नभोम्भः, शतधौतसर्पिः, मृदूनि तीक्ष्णानि च, लाजमण्डः, जीर्णा यवाः, लोहितशालयश्च, कौम्भं हविः, मुद्‌गसतीनयूषाः, धन्वोद्‌भवाः मांसरसाश्च, रागाः सखाडवाः, गव्यपयः, सिता

१२७ शीतमरीचिरोचिः चन्द्रकिरणको सेवन ।
१२८ धूमोऽञ्जनं, श.क.द्रु. ।
१२९ लावणं श.क.द्रु. ।
१३० कचानामपि । श.क.द्रु । कचाः केशाः ॥
१३१ मनोहराणि, भै.र. ।
१३२ तिक्तानि इति पा. ।
१३३ भैषज्यरत्नावल्यां मूर्च्छारोगे पथ्यानि यथा– छाया नभोऽम्भः शतधौतसर्पिर्मृदूनि तिक्तानि च लाजमण्डाः । जीर्णा यवा लोहितशालयश्च कौम्भं हविर्मुद्‌गसतीनयूषाः ॥ धन्वोद्‌भवाः मांसरसाश्च रागाः सषाडवा गव्यपयः सिता च । पुराणकुष्माण्डपटोलमोचहरीतकीदाडिमनारिकेलम् ॥ अत्युच्चशब्दोऽद्‌भुतदर्शनञ्च गीतानि वाद्यान्यपि चोत्कटानि । श्रमः स्मृतिश्चिन्तनमात्मबोधो धैर्यञ्च मूर्च्छावति पथ्यवर्गः ॥ नासामुखद्वारमरुन्निरोधो विरेचनच्छर्दनलंघनानि । क्रोधो भयं दुःखकरी च शय्या कथा विचित्रा च मनोहराणि ॥ मधूकपुष्पाणि च तण्डुलीयमुपोदिकान्नानि लघूनि चापि । प्रतीरनीरं सितचन्दनानि कर्पूरनीरं हिमबालुका च ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

च, पुराणकुष्माण्डपटोलमोचहरीतकीदाडिमनालिकेरम्, मधूकपुष्पाणि च, तण्डुलीयम्, उपोदिका, लघूनि अन्नानि चापि, प्रतीरनीरम्, सितचन्दनानि, कर्पूरनीरम्, हिमबालुका च, अत्युच्चशब्दः, अद्भुतदर्शनानि, उत्कटानि गीतानि, वाद्यान्यपि चोत्कटानि, श्रमः, स्मृतिः, चिन्तनम्, आत्मबोधः, धैर्यञ्च मूर्च्छावति पथ्यवर्गः ॥१-७॥

भावार्थः

सेक, अवगाहन, मणि र हारको धारण (हारमा सजाइएका मणिहरू), शीतल प्रदेह, पंखाको हावा, शीतल सुगन्धित पेय, फोहरा घर, शीतल किरणको प्रभा (चन्द्रकिरण), धूपन/धूमपान, अञ्जन, नस्य, रक्तमोक्षण, सूचीको सहायताले परितोदन (सियोले घोचेर दुखाइदिनु) तथा दहन (पोलेर दुखाइदिनु), रोम तथा त्वचामा खिचाव (चिमोट्नु/लुछ्नु), नङ्ले कोतर्नु, दाँतले टोक्नु, नाक र मुखको द्वारबाट वायुको निरोध गर्नु, विरेचन, वमन, लंघन, क्रोध, भय, कडा विछौना (बिछ्याउने ओछ्यान), विभिन्न किसिमका मनोहर कथाहरू, छाया, आकाशको पानी, शतधौत घृत, मृदु र तीक्ष्ण पदार्थहरू, लाजमण्ड, पुरानो जौ, रक्तशाली, कौम्भ घृत (दश वर्ष पुरानु घृत)[१३४], मूंगी र केराउको यूष, धन्व आदि जांगल पशुपक्षीको मांसरस, राग, खाडव, गाईको दुध, मिश्री, पुरानो कुभिण्डो, परबर, केरा, हर्रो, दाडिम, नरिवल, महुवाको फूल, लुँडेको साग, पवई साग, हलुका अन्न, जरुवाको पानी, चन्दन, कपूरपानी, हिउँको धुलो/चिसो बालुवा, चर्को आबाज, अद्भुत दर्शन (अनौठो दृश्य देखाउनु), गीत, तीव्र बाजा घन्काउनु, श्रम, स्मृति, अध्यात्मचिन्तन र आत्मबोध, धैर्य यी मूर्च्छा हुनेहरूका लागि पथ्य हुन् ॥१-७॥

मूर्च्छारोगेऽपथ्यानि–

ताम्बूलं पत्रशाकानि दन्तघर्षणमातपम् ।
विरुद्धान्यन्नपानानि व्यवायं स्वेदनं कटु ॥८॥
तृण्निद्रयोर्वेगरोधं तक्रं मूर्च्छामयी त्यजेत् ॥८.५॥

अन्वयः

मूर्च्छामयी ताम्बूलम्, पत्रशाकानि, दन्तघर्षणम्, आतपम्, विरुद्धान्यन्नपानानि, व्यवायम्, स्वेदनम्, कटु, तृण्निद्रयोर्वेगरोधम् तक्रम्, त्यजेत् ॥८-८.५॥

भावार्थः

मूर्च्छारोगीले पान, पत्रशाक, दन्तघर्षण, घाम, विरुद्ध अन्नपान, व्यवाय, स्वेदन, कटु, तीर्खा र निद्राको वेग रोक्नु, महीको सेनव यति कुरालाई त्याग गर्नुपर्छ ॥८-८.५॥

इति मूर्च्छायां पथ्यापथ्यविधिः ॥१७॥

यति मूर्च्छारोगमा अपनाउनुपर्ने पथ्यापथ्यविधि बताइयो ॥१७॥

◆◆◆

१३४ उग्रगन्धं पुराणं स्यात् लाक्षारसनिभं च यत् । दशवर्ष स्थितं सर्वं कौम्भः सर्पिस्तदुच्यते ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

१८
अथ मदात्यये पथ्यापथ्यविधिः

मदात्यये पथ्यानि–

संशोधनं संशमनं स्वपनं लंघनं श्रमः ।
सम्वत्सरसमुत्पन्नाः शालयः षष्टिका यवाः[१३५] ॥१॥
मुद्गाश्च माषा[१३६] गोधूमाः सतीना[१३७] रागखाडवौ ।
एणतित्तिरिलावाजदक्षवर्हिशशामिषम् ॥२॥
वेसवारो विचित्रान्नं हृद्यं मद्यं पयः सिता ।
तण्डुलीयपटोलं च मातुलुंगं परूषकम् ॥३॥
खर्जूरं दाडिमं धात्री नालिकेरं च गोस्तनी ।
सर्पिः पुराणं कर्पूरं प्रतीरं शिशिरोऽनिलः ॥४॥[१३८]
धारागृहं चन्द्रपादा मणयो मित्रसंगमः ।
क्षौमाम्बरं प्रियाश्लेषो गीतं वादित्रमुद्धतम् ॥५॥
शीताम्बु चन्दनं स्नानं पथ्यमेतन्मदात्यये ॥५.५॥

अन्वयः

संशोधनम्, संशमनम्, स्वपनम्, लंघनम्, श्रमः, सम्वत्सरसमुत्पन्नाः शालयः षष्टिका यवाः मुद्गाश्च माषा गोधूमाः सतीनाः, रागखाडवौ[१३९], एणतित्तिरिलावाजदक्षवर्हिशशामिषम्, वेसवारः[१४०], विचित्रान्नम्, हृद्यम्, मद्यम्, पयः, सिता, तण्डुलीयपटोलं च, मातुलुंगम्, परूषकम्, खर्जूरम्, दाडिमम्, धात्री, नालिकेरम्, गोस्तनी च, पुराणं सर्पिः, कर्पूरम्, प्रतीरम्, शिशिरोऽनिलः, धारागृहम्, चन्द्रपादाः, मणयः, मित्रसंगमूः, क्षौमाम्बरम्, प्रियाश्लेषः, गीतम्, वादित्रमुद्धतम्, शीताम्बु, चन्दनम्, स्नानम् एतत् मदात्यये पथ्यम् ॥१-५.५॥

भावार्थः

संशोधन, संशमन, स्वपन (सुत्नु), लंघन, श्रम, एक वर्ष पुराना शाली, षष्टिक, जौ, कुलत्थ, मूंग, मास, गहुँ, केराउहरू, राग, खाडव, मृग, तित्रो, लाभ, बोको, सुघा, मयूर, खरायो आदिको मासु, वेसवार, विचित्र अन्न,

१३५ शालयः षष्टिकैः सह, भै.र. ।
१३६ मुद्गगाः माषाश्च, भै.र. ।
१३७ सतीलाः, श.क.द्रु. ।
१३८ अयं श्लोकः भैषज्यरत्नावल्यां न पठितः ।
१३९ आममाम्रं त्वचाहीनं द्विस्त्रिर्वा खण्डितं ततः । भृष्टमाज्ये मनागस्तं खण्डपाकेऽथ युक्तितः ॥ सुपक्वं च समुत्तीर्य मरिचैलेन्दुवासितम् । स्थापितं स्निग्धमृद्भाण्डे रागषाडवसंज्ञितम् ॥ सितारुचकसिन्धूत्थैः सवृक्षाम्लपरूषकैः । जम्बूफलरसैर्युक्तो रागो राजिकया कृतः । षाडवो मधुराम्लादिरससंयोगसम्भवः ॥ योगरत्नाकरः ॥
१४० शुण्ठीमरिचपिप्पल्यो धान्यकाजाजिदाडिमम् । पिप्पलीमूलसंयुक्तं वेसवार इति स्मृतः ॥ योगरत्नाकरः ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

हृद्य मद्य, दुध, मिश्री, लुँडेको साग, परवर, बिमिरो, फालसा, खजूर, दाडिम, अमला, नरिवल, दाख, पुराण घृत, कपूर, नदीको किनार, शीतल वायु, फोहराघर, चन्द्रकिरण, मणि, मित्रसंगम, रेशमी कपडा, प्रियालिंगन, चर्को आबाजका गीत तथा वाद्य, चिसो पानी, चन्दन, स्नान यति मदात्ययमा पथ्य हुन्छन् ॥१-५.५॥

मदात्ययेऽपथ्यानि–

स्वेदोऽञ्जनं धूमपानं नावनं दन्तघर्षणम् ।
ताम्बूलं चाप्यपथ्यं स्यान्मदात्ययविकारिणाम् ॥६॥

अन्वयः

स्वेदः, अञ्जनम्, धूमपानम्, नावनम्, दन्तघर्षणम्, ताम्बूलम् चापि मदात्ययविकारिणां अपथ्यं स्यात् ॥६॥

भावार्थः

स्वेदन, अञ्जन, धूमपान, नस्य, दन्तघर्षण, पान यी मदात्यय रोगीका लागि अपथ्य हुन् ॥६॥

इति मदात्यये पथ्यापथ्यविधिः ॥१८॥

यति मदात्ययरोगमा अपनाउनुपर्ने पथ्यापथ्यविधि बताइयो ॥१८॥

◆◆◆

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

१९

अथ दाहे पथ्यापथ्यविधिः

दाहे पथ्यानि–

शालयः षष्टिकाः मुद्गाः मसूराश्चणकाः यवाः ।
धन्वमांसरसाः लाजमण्डस्तत्सक्तवः सिता ॥१॥
शतधौतघृतं दुग्धं नवनीतं पयोभवम् ।
कुष्माण्डं कर्कटी मोचं पनसं स्वादु दाडिमम् ॥२॥[१४१]
पटोलं पर्पटो द्राक्षा धात्रीफलपरूषकम् ।
बिम्बी[१४२] तुम्बी पयः पेटी खर्जूरं धान्यकं मिसि ॥३॥
बालतालं प्रियालं च शृंगाटककसेरुकम् ।
मधूकपुष्पं ह्रीबेरं पथ्या तिक्तानि सर्वशः ॥४॥
शीताः प्रदेहा भूवेश्म सेकोऽभ्यंगोऽवगाहनम् ।
पद्मोत्पलदलक्षौमशय्या, शीतलकाननम् ॥५॥
कथा विचित्रा गीतानि शिशवो मञ्जुभाषिणः ।[१४३]
उशीरचन्दनालेपः शीताम्बु शिशिरानिलः ॥६॥
धारागृहं प्रियास्पर्शः प्रतीरं[१४४] हिमबालुका ।
सुधांशुरश्मयः स्नानं मणयो मधुरो रसः ॥७॥
यानि यानि पुरोक्तानि[१४५] पित्तहारीणि तानि च ।
इति दाहवतां नृणां पथ्यवर्ग उदाहृतः ॥८॥

अन्वयः

शालयः, षष्टिकाः, मुद्गाः, मसूराः, चणकाः, यवाः, धन्वमांसरसाः, लाजमण्डः, तत्सक्तवः, सिता, शतधौतघृतम्, दुग्धम्, पयोभवं नवनीतम्, कुष्माण्डम्, कर्कटी, मोचम्, पनसम्, स्वादु दाडिमम्, पटोलम्, पर्पटः, द्राक्षा, धात्रीफल-परूषकम्, बिम्बी, तुम्बी, पयः पेटी, खर्जूरम्, धान्यकम्, मिसि, बालतालम्, प्रियालं च, शृंगाटक-कसेरुकम्, मधूकपुष्पम्, ह्रीबेरम्, पथ्या, तिक्तानि सर्वशः, शीता प्रदेहाः, भूवेश्म, सेकः, अभ्यंगः, अवगाहनम्, पद्मोत्पलदलक्षौमशय्या, शीतलकाननम्, कथा विचित्रा, गीतानि, मञ्जुभाषिणः शिशवः, उशीरम्,

---

१४१ भैषज्यरत्नावल्यां एकोतिरिक्तः पाठश्च ।
धारावेश्म तथा सुशीतलशशिज्योत्स्ना तु पानानि च । वातः शीतलचन्दनञ्च कमलं प्रेमानुबन्धस्तथा ॥ रामागूडनमर्दनं स्तनयुगे शुक्लार्द्रवस्त्राणि च । क्षीरं शर्करशंखलोहरजतं दाहप्रशान्त्यै हितम् ॥

१४२ शिम्बी, श.क.द्रु ।

१४३ शिशिरं मञ्जुभाषणम्, भै.र.।

१४४ प्रनीरं भै.र., श.क.द्रु. ।

१४५ पुरा यानि विधेयानि, भै.र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चन्दनालेपः, शीताम्बु-शिशिरानिलः, धारागृहम्, प्रियास्पर्शः, प्रतीरम्, हिमबालुका, सुधांशुरश्मयः, स्नानम्, मणयः, मधुरो रसः, यानि यानि पुरोक्तानि पित्तहारीणि तानि च, इति दाहवतां नृणां पथ्यवर्ग उदाहृतः ॥१-८॥

भावार्थः

शालीधान, षष्टिकधान, मूंग, मुसुरो, चना, जौ, धन्व मृग आदि जांगल पशुपक्षीको मांसरस, लाजमण्ड, लाजसक्तु, मिश्री, शतधौत घृत, दुधबाट निकालिएको नौनी (मक्खन), कुभिण्डो, काँक्रो, केरा, रुखकटहर, गुलियो दाडिम, परबर, पित्तपापडा, दाख, अमला, फालसा, गोलकाँक्री, लौका, काँचो नरिवल[१४६], खजूर, धनियाँ, मिसि (सूप), कलिलो तालफल, चिरौंजी, सिंगडा, कसेरु, महुवाको फूल, ह्रीबेर (खस, सुगन्धबाल), हर्रो, तिता खाने कुराहरू, शीतल प्रदेह, भूगृह स्वेदन, अभ्यंग, अवगाहन, कमलको पातको नरम शय्या, शीतल जंगलको सेवन, विभिन्न कथाहरू, गीतहरू, मीठो बोल्ने शिशुहरू, उशीर र चन्दनको लेप, चिसो पानी, चिसो हावा, फोहरा घर, प्रियाको स्पर्श, नदीको किनार, हिउँको धुलो वा चिसो चिसो बालुवा, चन्द्रमाको किरण, स्नान, मणि, मधुर रस, पहिले बताइएका पित्तनाशक आहार विहारहरू यी सबै दाहरोग लागेका व्यक्तिहरूका लागि पथ्य हुन् ॥१-८॥

दाहेऽपथ्यानि–

विरुद्धान्यन्नपानानि क्रोधो वेगविधारणम्।
गजाश्वयानमध्वानं क्षारं पित्तकराणि च ॥९॥
व्यायाममातपं तक्रं ताम्बूलं मधु रामठम्।
व्यवायं कटुतिक्तोष्णं दाहवान्परिवर्जयेत् ॥१०॥

अन्वयः

विरुद्धानि अन्नपानानि, क्रोधः, वेगविधारणम्, गजाश्वयानम्, अध्वानम्, क्षारम्, पित्तकराणि च, व्यायामम्, आतपम्, तक्रम्, ताम्बूलम्, मधु, रामठम्, व्यवायम्, कटुतिक्तोष्णम्, दाहवान्परिवर्जयेत् ॥९-१०॥

भावार्थः

विरुद्ध अन्नपान, क्रोध, वेगधारण, हातीघोडाको सवारी, पैदल यात्रा, क्षार, पित्तवर्द्धक आहारविहार, व्यायाम, घाम, मही, पान, मह, हिङ, मैथुन, पिरो, तितो र तातोको सेवन दाह भएका व्यक्तिले त्याग गर्नुपर्दछ ॥९-१०॥

इति दाहे पथ्यापथ्यविधि ॥ १९ ॥
यति दाहरोगमा अपनाउनुपर्ने पथ्यापथ्यविधि बताइयो ॥१९॥

◆◆◆

---

१४६ जलपेटी (Bath tub) इत्यपि भैषज्यरत्नावल्याम्। सन्दर्भतः न समीचीनम्। प्रभावतस्तूचितम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

२०
अथोन्मादे पथ्यापथ्यविधिः

उन्मादे पथ्यानि–

स्वेदो विरेको वमनं च पूर्वं क्रमान्मरुत्पित्तकफोत्तरेषु ।
ततः परं वस्तिविधिश्च नस्यं संतर्जनं ताडनमञ्जनञ्च ॥१॥
आश्वासनत्रासनबन्धनानि भक्ष्याणि[१४७] दानानि[१४८] च घर्षणानि[१४९] ॥
धूमो वधो[१५०] विस्मरणं प्रदेहः शिराव्यधः संशमनं च सेकः ॥२॥
आश्चर्यकर्माणि च धूमपानं धीधैर्यसत्वात्मनिवेदनानि ।
अभ्यञ्जनं स्वापनमासनानि निद्रा सुशीतान्यनुलेपनानि ॥३॥[१५१]
गोधूममुद्गारुणशालयश्च धारोष्णदुग्धं शतधौतसर्पिः ।
घृतं नवीनं च पुरातनं च कूर्मामिषं धन्वरसा रसालम्[१५२] ॥४॥
पुराणकुष्माण्डफलं पटोलं ब्राह्मीदलं वास्तुकतण्डुलीयम् ।
खराश्वमूत्रं गगनाम्बु पथ्या सुवर्णचूर्णानि च नालिकेरम् ॥५॥
द्राक्षा कपित्थं पनसं च वैद्यैर्विधेयमुन्मादगदेषु पथ्यम् ॥५.५॥

अन्वयः

पूर्वं स्वेदः विरेकः वमनं च क्रमान्मरुत्पित्तकफोत्तरेषु, ततः परम् वस्तिविधिश्च, नस्यम्, संतर्जनम्, ताडनम्, अञ्जनञ्च, आश्वासनत्रासनबन्धनानि, भक्षाणि, दानानि च, घर्षणानि, धूमः, वधः, विस्मरणम्, प्रदेहः, शिराव्यधः, संशमनं च सेकः, आश्चर्यकर्माणि च, धूमपानम्, धी-धैर्य-सत्वा-त्म-निवेदनानि, अभ्यञ्जनम्, स्वापनमासनानि, निद्रा, सुशीतान्यनुलेपनानि, गोधूम-मुद्गा-रुणशालयश्च, धारोष्णदुग्धम्, शतधौतसर्प्पिः, घृतं नवीनं च पुरातनं च, कूर्मामिषम्, धन्वरसाः, रसालम्, पुराणकुष्माण्डफलम्, पटोलम्, ब्राह्मीदलम्, वास्तुक-तण्डुलीयम्, खराश्वमूत्रम्, गगनाम्बु, पथ्या, सुवर्णचूर्णानि च, नालिकेरम्, द्राक्षा, कपित्थम्, पनसम् च वैद्यैः उन्मादगदेषु पथ्यम् विधेयम् ॥१-५.५॥

भावार्थः

पहिले स्वेदन, विरेचन, वमन यी तीन उपचारविधि क्रमशः वात, पित्त र कफ दोषको अधिकतामा गर्नुपर्दछ । त्यसपछि वस्तिविधि, नस्य, संतर्जन (गाली गरेर डराइदिनु), ताडन (पिट्नु), अञ्जन, आश्वासन, त्रासन (तर्साउनु), बन्धन (पाता कस्नु), भक्ष (खाने कुरा खान दिनु), दान (केही दिएर फकाउनु), घर्षण (मालिस घस्नु), धूम (धूपन), वध (वधोद्यम, धम्क्याउनु), विस्मरण (भुलाउनु), प्रदेह (आयुर्वेदोक्त उष्ण लेप), शिराव्यध (शिराबाट रक्तविश्रावण गराउनु), संशमन, सेक, आश्चर्यका काम, धूमपान, बुद्धि-धैर्य-सत्व-

१४७ भयानि, भै.र., श.क.द्रु. ।
१४८ स्नानानि इति पाठान्तरम् ।
१४९ हर्षणानि, भै.र., श.क.द्रु. ।
१५० धूपो दमो भै.र., श.क.द्रु. । धूमपानस्यापि पाठत्वात् धूप एव ग्रहणीयः ।
१५१ अस्य श्लोकार्द्धस्य भैषज्यरत्नावल्यां न पाठः ।
१५२ धन्वरसालशालम्, धन्वरसा रसाला इति पाठान्तरम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

आत्मनिवेदन, अभ्यंग, स्वापन (सुताउनु), आसन (बसाउनु) निद्रा, सुशीतल अनुलेपन, गहुँ, मूंगी, रक्तशाली, दुहुँदादुहुँदैको तातो दुध (तताएको दुध होइन), शतधौत घृत, नयाँ र पुरानो घृत, कछुवाको मासु, जांगल धन्व आदि पशुपक्षीको मांसरस, आँप, पुरानो कुभिण्डो, परबर, ब्राह्मीपत्र, बेथे, लुँडे, गदहा र घोडाको मूत्र, वर्षाको पानी, हर्रो, सुवर्ण भष्म, नरिवल, दाख, कैथ, रुखकटहर यी सबैलाई वैद्यहरूले उन्माद रोगमा पथ्यको रूपमा लिनुपर्दछ ॥१-५.५॥

कामशोकदेवादिकृतोन्मादे पथ्यानि

कामशोकभयक्रोधदुःखैर्वा मोहसम्भवान्।[१५३]

परस्परप्रतिद्वन्द्वैरेभिरेव शमं नयेत् ॥६॥

इष्टद्रव्यविनाशात्तु मनो यस्योपहन्यते।

तस्य तस्येष्टलाभेन शान्तिर्व्याधेः प्रजायते ॥७॥[१५४]

देवर्षिपितृगन्धर्वैरुन्मत्तस्य च बुद्धिमान्।

त्यजेन्नस्याञ्जनादीनि तीक्ष्णानि क्रूरकर्म च ॥८॥

अन्वयः

कामशोकभयक्रोधदुःखैर्वा मोहसम्भवान् (उन्मादान्), परस्परप्रतिद्वन्द्वैरेभिरेव शमं नयेत्, यस्य तु मनः इष्टद्रव्यविनाशात् उपहन्यते, तस्य तस्येष्टलाभेन व्याधेः शान्तिः प्रजायते, देवर्षिपितृगन्धर्वैरुन्मत्तस्य च बुद्धिमान् नस्याञ्जनादीनि तीक्ष्णानि क्रूरकर्म च त्यजेत् ॥६-८॥

भावार्थः

काम, शोक, भय, क्रोध, दुःख, मोहबाट उन्माद रोग पैदा हुन्छ, र यिनका परस्पर प्रतिद्वन्द्वीभाव (क्रोध, हर्ष, उत्साह, अनुत्साह आदि)[१५५]ले शमन गर्दछन् । इष्ट द्रव्यको विनाशले गर्दा जसको मनलाई हानि पुऱ्याएको हुन्छ त्यसैको लाभले शान्ति पनि पैदा हुन्छ। देव, ऋषि, पितृ, गन्धर्वको कारणले उत्पन्न उन्माद होभने बुद्धिमान् वैद्यले नस्य, अञ्जन जस्ता क्रूरकर्म गर्नुहुँदैन (आगन्तुक उन्मादको उपाय गर्नसकिन्छ) ॥६-८॥

आगन्तुकोन्मादे पथ्यानि–

पूजाबल्युपहारशान्तिविधयो होमेष्टिमन्त्रक्रिया।

दानं स्वस्त्ययनं व्रतानि नियमः सत्यं जपो मंगलम् ॥

प्रायश्चित्तविधानमञ्जलिविधी[१५६] रत्नौषधेर्धारणम्।

भूतानामधिपस्य विष्टपपते[१५७] गौरीपतेरर्चनम् ॥९॥

---

१५३ कामशोकभयक्रोधहर्षेर्ष्यालोभसम्भवान्, भै.र. ।

१५४ तस्य तत्सदृशप्राप्त्या सान्त्वाश्वास्यैश्च तं जयेत्, भै.र. ।

१५५ कामको सट्टा निस्काम, शोकको सट्टा हर्ष, भयको सट्टा अभय, क्रोधको सट्टा धैर्य वा अक्रोध, दुःखको सट्टा सुख, मोहको सट्टा यथार्थ ज्ञान ।

१५६ मज्जनविधी, भै.र. ।

१५७ भूतानामनुरूपमिष्टचरणम्, भै.र. । देव, ऋषि, पितृ आदि उन्मादकारक भावहरूको अनुकूल आचरण वा मानमानितो, शान्तिस्वस्ति आदि कर्म ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ये च स्युर्भुवि गुह्यकाः प्रमथकास्तेषां[१५८] समाराधनम्।
देवब्राह्मणपूजनं च शमयेदुन्मादमागन्तुकम् ॥९.५॥

अन्वयः

पूजाबल्युपहारशान्तिविधयः, होमेष्टिमन्त्रक्रिया, दानम्, स्वस्त्ययनम्, व्रतानि, नियमः, सत्यम्, जपः, मंगलम्, प्रायश्चित्तविधानम्, अञ्जलिविधिः, रत्नौषधेर्धारणम्, भूतानामधिपस्य, विष्टपपतेः गौरीपतेः अर्चनम्, ये च भुवि गुह्यकाः प्रमथकाः स्युः तेषां समाराधनम्, देवब्राह्मणपूजनम् च, आगन्तुकं उन्मादं शमयेत् ॥९-९.५॥

भावार्थः

पूजा, बलि, उपहार, शान्तिस्वस्तिका विधिहरू, होम, यज्ञ, मन्त्र, क्रिया, दान, स्वस्तिकामना, व्रत, नियम, सत्य, जप, मंगल, प्रायश्चित्तविधान, बद्धाञ्जलिविधि (नमस्कार), रत्न र औषधको धारण, प्राणिहरूका अधिपति र समस्त लोकका पति एवं गौरीका पति भगवान् शंकरको अर्चना, पृथ्वीमा जुन जुन गुह्यक (देवयोनि)र प्रमथकहरू (पारिषद् गण) छन् तिनीहरूको आराधना, देवता, ब्राहमणको पूजन यी उपायले आगन्तुक उन्मादको शमन हुन्छ ॥९-९.५॥

उन्मादेऽपथ्यानि–

मद्यं विरूद्धाशनमुष्णभोजनं निद्राक्षुधातृट्कृतवेगधारणम् ॥१०॥
व्यायाममाषाढफलं कठिल्लकं शाकानि पत्रप्रभवानि सर्वशः ॥
तिक्तानि तीक्ष्णानि[१५९] भिषक् तमादिशेदुन्मादरोगेषु विगर्हितानि ॥११॥

अन्वयः

मद्यम्, विरूद्धाशनम्, उष्णभोजनम्, निद्रा-क्षुधा-तृट्-कृतवेगधारणम्, व्यायाम-माषाढफलम्, कठिल्लकम्, शाकानि पत्रप्रभवानि सर्वशः, तिक्तानि, तीक्ष्णानि, भिषक् उन्मादरोगेषु विगर्हितानि तमादिशेद् ॥१०-११॥

भावार्थः

मद्य, विरुद्धाशन, उष्णभोजन, निद्रा, भोक, तिर्खाको वेग रोक्नु, व्यायाम, आषाढफल (आषाढ महिनामा मात्र फल्ने काँक्रोजस्ता फल), करेला, पत्रशाक, तिता र तीखा खाने कुराहरूलाई चिकित्सकले उन्मादरोगमा वर्जित गरिदिनुपर्छ ॥१०-११॥

इत्युन्मादे पथ्यापथ्यविधिः ॥२०॥
यति उन्मादरोगमा अपनाउनुपर्ने पथ्यापथ्यविधि बताइयो ॥२०॥

◆◆◆

१५८ गुह्यकाश्च प्रमथास्तेषाम्, भै.र.।
१५९ विम्वीञ्च भै.र., श.क.द्रु.।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

२१
अथापस्मारे पथ्यापथ्यविधिः

वस्तिर्वातोद्भवे पूर्वं पैत्तिके च विरेचनम्।
वमनं श्लैष्मिके चापि, परं धूपनमञ्जनम् ॥१॥[१६०]
नस्यं शिराव्यधो दानं त्रासनं बन्धनं भयम्।
तर्जनं ताडनं हर्षो धूमपानं च विस्मयः ॥२॥
धीधैर्यात्मादिविज्ञानं स्नानमभ्यञ्जनानि च।
लोहिताः शालयो मुद्गा गोधूमाः प्रतनं हविः ॥३॥
कूर्मामिषं धन्वरसा दुग्धं ब्राह्मीदलं वचा।
पटोलं वृद्धकुष्माण्डं वास्तुकं स्वादुदाडिमम् ॥४॥
शोभाञ्जनं पयः पेटी द्राक्षा धात्री परूषकम्।
तैलं खराश्वगोमूत्रं[१६१] गगनाम्बु हरीतकी ॥५॥
अपस्मारगदे नृणां पथ्यमेतदुदीरितम् ॥५.५॥

अन्वयः

पूर्वं वातोद्भवे वस्तिः, पैत्तिके च विरेचनम्, श्लैष्मिके वमनं चापि, परं धूपनम्, अञ्जनम्, नस्यम्, शिराव्यधः, दानम्, त्रासनम्, बन्धनम्, भयम्, तर्जनम्, ताडनम्, हर्षः, धूमपानं च, विस्मयः, धीधैर्यात्मादिविज्ञानम्, स्नानम्, अभ्यञ्जनानि च, लोहिताः शालयः, मुद्गाः, गोधूमाः, प्रतनं हविः, कूर्मामिषं, धन्वरसाः, दुग्धं, ब्राह्मीदलं, वचा, पटोलम्, वृद्धकुष्माण्डम्, वास्तुकम्, स्वादुदाडिमम्, शोभाञ्जनम्, पयः पेटी, द्राक्षा, धात्री, परूषकम्, तैलम्, खराश्वगोमूत्रम्, गगनाम्बु, हरीतकी– एतत् नृणां अपस्मारगदे पथ्यं उदीरितम् ॥१-५.५॥

भावार्थः

वातदोषका कारणले भएको अपस्मारमा पहिले वस्ति, पित्तदोषका कारणले भएको अपस्मारमा विरेचन र कफदोषका कारणले भएको अपस्मारमा वमन गर्नुपर्दछ। त्यसपछि धूपन, अञ्जन, नस्य, शिरावेधन, दान, त्रासन (तर्साउनु), बन्धन (बाँध्नु), भय, तर्जन (धम्काउनु), ताडन (हिर्काउनु), हर्ष, धूमपान, विस्मय, बुद्धि, धैर्य आदि आध्यात्मिक चेतना, स्नान, अभ्यंग, रक्तशालि, मूंग, गहुँ, पुरानो घिउ, कछुवाको मासु, धन्व आदि जांगल मृग र पक्षी आदिको मांसरस, दुध, ब्राह्मीका पत्र, बोझो, परवर, पुरानो छिप्पिएको कुभिण्डो, बेथे, गुलियो अनार, सहिजन, नरिवल, दाख, अमला, फालसा, तिलको तेल, गदहा-घोडा र गाईको मूत्र, वर्षाको पानी, हर्रो

---

१६० पद्यमिदं भैषज्यरत्नावल्यां न दृश्यते।
१६१ खराश्वमूत्रञ्च भै.र., श.क.द्रु.।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यी मनुष्यहरूलाई अपस्माररोग लागेको बेलामा दिनुपर्ने पथ्य हुन् ॥१-५.५॥

अपस्मारेऽपथ्यानि–

चिन्ता शोकं भयं क्रोधमशुचीन्यशनानि च ॥६॥
मद्यं मत्स्यं विरुद्धान्नं तीक्ष्णोष्णगुरुभोजनम् ।
अतिव्यवायमायासं पूज्यपूजाव्यतिक्रमम् ॥७॥
पत्रशाकानि सर्वाणि बिम्बीमाषाढजं फलम् ।
[१६२]क्षुधातृषास्वप्नवेगानपस्मारी परित्यजेत् ॥८॥

अन्वयः

चिन्ता, शोकम्, भयम्, क्रोधम्, अशुचीन्यशनानि च, मद्यम्, मत्स्यम्, विरुद्धान्नम्, तीक्ष्णोष्णगुरुभोजनम्, अतिव्यवायम्, आयासम्, पूज्य-पूजा-व्यतिक्रमम्, पत्रशाकानि सर्वाणि, बिम्बीम्, आषाढजं फलम्, क्षुधातृषास्वप्नवेगान् अपस्मारी परित्यजेत् ॥६-८॥

भावार्थः

चिन्ता, शोक, भय, क्रोध, अपवित्र भोजन, मद्य, मत्स्य, विरुद्धभोजन, तिखो-तातो र गरिष्ठ भोजन, ज्यादा मैथुन गर्नु, ज्यादा व्यायाम या परिश्रम गर्नु, पूज्य र पूजाको सम्बन्धमा विपरीत व्यवहार हुनु अर्थात् मान्यजनलाई मान नदिनु र अमान्यलाई बढी महत्त्व दिनु, सबै किसिमका पत्रशाकहरू, बिम्बीफल र आषाढ-फल, भोक-तीर्खा र निद्राको वेग यी सबैलाई अपस्मार-रोगीहरूले परित्याग गर्नुपर्दछ ॥६-८॥

इत्यपस्मारे पथ्यापथ्यविधिः ॥२१॥
यति अपस्माररोगमा अपनाउनुपर्ने पथ्यापथ्यविधि बताइयो ॥२१॥

◆◆◆

---

१६२ तृषानिद्राक्षुधावेगम्, भै.र., श.क.द्रु ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

२२
अथ वातव्याधौ पथ्यापथ्यविधिः

[१६३]वातव्याधौ पथ्यानि–

अभ्यंगो मर्दनं वस्तिः स्नेहः स्वेदोऽवगाहनम् ।
संवाहनं संशमनं प्राक्प्रवातविवर्जनम् ॥१॥
अग्निकर्मोपनाहश्च भूशय्या स्नानमासनम् ।
तैलद्रोणी शिरोवस्तिः शयनं नस्यमातपः ॥२॥
सन्तर्पणं बृहणं च किलाटं दधि कूर्चिका ।
सर्पिस्तैलं वसा मज्जा स्वाद्वम्ललवणा रसाः ॥३॥
नवीनास्तिलगोधूममाषाः सम्वत्सरोषिताः ।
शालयः षष्टिकाश्चापि कुलत्थानां रसाः सुराः ॥४॥
ग्राम्या गोश्वतरोष्ट्राश्च रासभाश्छागलादयः ।
आनूपा कोलमहिषन्यङ्कुखड्गिगजादयः ॥५॥
औदका हंसकादम्बचक्रमद्गुवकादयः ।
विलेशयाः भेकगोधानकुलश्वाविदादयः ॥६॥
चटकः कुक्कुटो वर्हिस्तित्तिरिश्चेति जांगलाः ।
शिलीन्ध्रःपर्वतो नक्रो गर्गरः कवयील्लिशः ॥७॥
एरण्डश्चुलुकी कूर्मः शिशुमारस्तिमिंगिलः ।
रोहितो मुद्गरः श्रृंगी वर्मी च खुड्डिशो झषः ॥८॥
पटोलं शिग्रुवार्ताकं लशुनं दाडिमद्वयम् ।
पक्वतालं रसालं च ललदम्बु[१६४] परूषकम् ॥९॥
जम्बीरं बदरं द्राक्षा नागरंगं मधूकजम् ।
प्रसारणी गोक्षुरकः शुक्राक्षी पारिभद्रकः ॥१०॥
पयांसि च पयः पेटी रुवुतैलं गवां जलम् ।
मत्स्यण्डिका च ताम्बूलं धान्याम्लं तिन्तिडीफलम् ॥११॥
स्निग्धोष्णानि च भोज्यानि स्निग्धोष्णं चानुलेपनम् ।

१६३ भैषज्यरत्नावल्याम्– अभ्यंगो मर्दनं वस्तिः स्नेहः स्वेदोऽवगाहनम् । संवाहनं संशमनं प्राक्प्रवातप्रवर्जनम् ॥ कुलत्थमाषा गोधूमा रक्ताभाः शालयो हिताः । पटोलं शिग्रुवार्ताकं दाडिमञ्च परूषकम् ॥ मत्स्यण्डिका घृतं दुग्धं किलाटं दधि कूर्चिका । बदरं लशुनं द्राक्षा ताम्बूलं लवणं तथा ॥ चटकः कुक्कुटो बर्हिस्तित्तिरिश्चेति जांगलाः । शिलीन्द्रः पर्वतो नक्रो गर्गरः खुडिशो झषः ॥ यथाश्रयं यथावस्थं यथाचरणमेव च । वातव्याधौ समुत्पन्ने पथ्यमेतन्नृणां भवेत् ॥ इत्येव पाठः ॥

१६४ नलदाम्बु, श.क.द्रु. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यी मनुष्यहरूलाई अपस्माररोग लागेको बेलामा दिनुपर्ने पथ्य हुन् ॥१-५.५॥

अपस्मारेऽपथ्यानि–

चिन्ता शोकं भयं क्रोधमशुचीन्यशनानि च ॥६॥
मद्यं मत्स्यं विरुद्धान्नं तीक्ष्णोष्णगुरुभोजनम् ।
अतिव्यवायमायासं पूज्यपूजाव्यतिक्रमम् ॥७॥
पत्रशाकानि सर्वाणि बिम्बीमाषाढजं फलम् ।
[१६२]क्षुधातृषास्वप्नवेगान्नपस्मारी परित्यजेत् ॥८॥

अन्वयः

चिन्ता, शोकम्, भयम्, क्रोधम्, अशुचीन्यशनानि च, मद्यम्, मत्स्यम्, विरुद्धान्नम्, तीक्ष्णोष्णगुरुभोजनम्, अतिव्यवायम्, आयासम्, पूज्य-पूजा-व्यतिक्रमम्, पत्रशाकानि सर्वाणि, बिम्बीम्, आषाढजं फलम्, क्षुधातृषास्वप्नवेगान् अपस्मारी परित्यजेत् ॥६-८॥

भावार्थः

मूत्रको वेग धारण गर्नु, धूमपान, स्वेदन, रक्तमोक्षण, एकै ठाउँमा बसिरहनु, दिउसो सुत्नु, नयाँ अन्न, दही, आनूप पशुपक्षीको मासु, भटमास, मिठाइ, मैथुन, सौवीरक, सुरा, सुक्त, तेल, दुध, घिउ, गुड, तुम्बी (लौका), तालको अस्थिमज्जा, विरुद्धभोजन, कुभिण्डो, उखु, दूषित पानी, गुलियो, अमिलो, नुनिलो र अभिष्यन्दी खानेकुराहरू प्रमेहरोगीले यत्नपूर्वक परित्याग गनुपर्दछ ॥६-८.५॥

इति प्रमेहे पथ्यापथ्यविधिः ॥३३॥
यति प्रमेहरोगमा अपनाउनुपर्ने पथ्यापथ्यबारे बताइयो ॥३३॥

◆◆◆

२२३ एतत्पद्यं भैषज्यरत्नावल्यां न पठितमस्ति ।
२२४ पिष्टान्नानि, भै.र. ।
२२५ पद्यार्धमेतत् भै. रत्नावल्यां न पठितम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ मेदोरोगे पथ्यापथ्यविधिः

मेदोरोगे पथ्यानि–

चिन्ता श्रमो जागरणं व्यवायः प्रोद्वर्त्तनं लंघनमातपश्च ॥
हस्त्यश्वयानभ्रमणं विरेकः प्रच्छर्द्दनं चाप्यपतर्पणं च ॥१॥
पुरातनाः वैणवकोरदूषश्यामाकनीवारप्रियंगुजूर्णाः ॥[२२६]
यवाः कुलत्थाश्चणका मसूरा मुद्‌गास्तुवर्योपि मधूनि लाजाः ॥२॥
कटूनि तिक्तानि कषायकाणि तक्रं सुरा चिंगटमत्स्य एव ॥
दग्धानि वार्त्ताकुफलानि चापि फलत्रयं गुग्गुलुरायसं च ॥३॥[२२७]
कटुत्रयं सर्षपतैलमेला रूक्षाणि सर्वाणि च मुख्यतैलम् ॥
पत्रोत्थशाकागुरुलेपनानि प्रतप्तनीराणि शिलाजतुश्च ॥४॥[२२८]
एतानि सर्वाणि निसेवितानि मेदोगदं सत्वरमुत्क्षिपन्ति ॥४.५॥

अन्वयः

चिन्ता, श्रमः, जागरणम्, व्यवायः, प्रोद्वर्त्तनम्, लंघनम्, आतपश्च, हस्त्यश्वयानभ्रमणम्, विरेकः, प्रच्छर्द्दनम्, चाप्यपतर्पणं च, पुरातनाः वैणवकोरदूषश्यामाकनीवारप्रियंगुजूर्णाः, यवाः, कुलत्थाः, चणकाः, मसूराः, मुद्‌गाः, तुवर्योपि, मधूनि, लाजाः, कटूनि, तिक्तानि, कषायकाणि, तक्रम्, सुरा, चिंगर मत्स्य एव, दग्धानि वार्त्ताकुफलानि चापि, फलत्रयम्, गुग्गुलुः, आयसं च, कटुत्रयम्, सर्षपतैलम्, एला, रुक्षाणि सर्वाणि च, मुख्यतैलम्, पत्रोत्थशाकम्, अगुरुलेपनानि, प्रतप्तनीराणि, शिलाजतुश्च, एतानि सर्वाणि निसेवितानि मेदोगदं सत्वरमुत्क्षिपन्ति ॥१-४.५॥

भावार्थः

चिन्ता, परिश्रम, जागरण, मैथुन, उद्‌वर्त्तन, लंघन, घाम, हात्ती र घोडा चढेर भ्रमण गर्नु, विरेचन, वमन, अपतर्पण, पुरानो वाँसको जौ, कोदो, सामा, नीवार धान, कागुनो, जुनेलो, जौ, गहत, चना, मुसुरो, मूंगी, अरहर, मह, लाजा, तिता खानेकुरा, टर्रा खानेकुरा, मही, चिंगर (चिंगट/झिगुवा, झिंगे माछा) नामक मत्स्य, पोलेको भण्टा, त्रिफला, गुग्गुल, लौंहभस्म, त्रिकटु, सर्स्यूंको तेल, अलैंची, रुखो आहारविहार, खाने तेल, पत्रोत्थ (अगस्ति/हरीतकी) साग, अगुरुको लेप, तातो पानी र शिलाजित यिनीहरूको सेवन गरेमा मेदोरोग नाश हुन्छ ॥१-४.५॥

---

२२६ प्रियंगवश्च, भै.र.
२२७ फलत्रयं, यवासकम्, शिरीषलोध्रहरीतकीनां चूर्णेन गात्रविलेपनम् इति शब्दकल्पद्रुमेतिरिक्तपाठः ।
२२८ शिलाजतूनि, भै.र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मेदोरोगेऽपथ्यानि–

स्नानं रसायनं शालीन् गोधूमान् सुखशीलताम्।
क्षीरेक्षुविकृतीन् माषान् सौहित्यं स्नेहनानि च ॥५॥
मत्स्यं मांसं दिवानिद्रां स्रुग्गन्धान्मधुराणि च।[३]
अतिमात्रं तूपचिते विशेषाद् वमनक्रियाम् ॥६॥
स्वभावस्थत्वमन्विच्छन्[२२९] मेदस्वी परिवर्जयेत् ॥६.५॥

अन्वयः

मेदस्वी स्वभावस्थत्वमन्विच्छन् स्नानम्, रसायनम्, शालीन्, गोधूमान्, सुखशीलताम्, क्षीरेक्षुविकृतीन्, माषान्, सौहित्यम्, स्नेहनानि च, मत्स्यम्, मांसम्, दिवानिद्राम्, स्रग्गन्धान्, मधुराणि च, अतिमात्रं तूपचिते विशेषाद् वमनक्रियाम् परिवर्जयेत् ॥५-६.५॥

भावार्थः

मेदस्वी पुरुषले आफ्नो पूर्व अवस्था अर्थात् स्वभावमा स्थित रहने इच्छा राख्दै स्नान, रसायन, शालीधान, गहूँ, आरामी जीवनशैली, दुधका विकार मिठाइहरू र उखुका विकार गुड, चाकु आदि, मास, सुविधायुक्त जीवनचर्या, स्नेहन र चिल्लो भएका खानेकुराहरू, माछा, मासु, दिउसो सुत्नु, माला र सुगन्ध धारण गर्नु, गुलिया खानेकुरा खानु र ज्यादै मोटाएको अवस्थामा वमनक्रिया गर्नु यी सबै कुरालाई परहेज गर्नुपर्दछ ॥५-६.५॥

इति मेदोरोगे पथ्यापथ्यविधिः ॥३४॥
यति मेदोरोगमा अपनाउनुपर्ने पथ्यापथ्यविधिवारे बताइयो ॥३४॥

◆◆◆

२२९ समभावत्वमन्विच्छन्, भै.र. ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

३५
अथोदररोगे पथ्यापथ्यविधिः

उदररोगे पथ्यानि–

विरेचनं लंघनमब्दसम्भवाः कुलत्थमुद्गारुणशालयो यवाः ॥
मृगद्विजाः जागलसंज्ञयान्विताः पेयासुरामाक्षिकसीधुमाधवाः ॥१॥
तक्रं रसोनो रुवुतैलमार्द्रकं शालिञ्चशाकं कुलकं कठिल्लकम् ॥
पुनर्नवा शिग्रुफलं हरीतकी ताम्बूलमेला यवशूकमायसम् ॥२॥[२३०]
अजागवोष्ट्रीमहिषीपयोजलं[२३१] लघूनि तिक्तानि[२३२] च दीपनानि ॥[२३३]
वस्त्रेण संवेष्टनमग्निकर्मता विषप्रयोगोहितो[२३४] यथायथम् ॥३॥
विशेषतः प्लीहसमुद्भवे पुनर्वामे प्रवाहौ धमनीव्यधः परम् ॥
बद्धाह्वये चोदरजे क्षतोत्थिते[२३५] नाभेरधः शस्त्रविधिर्यथाविधिः ॥४॥
समीरणोत्थे घृतपानमादितः साभ्यञ्जनं चाप्यनुवासनं तथा ॥
यथामलं पथ्यगणोऽयमाश्रितः सखा नृणां स्यादुदरामये सति ॥५॥

अन्वयः

विरेचनम्, लंघनम्, अब्दसम्भवाः कुलत्थमुद्गारुणशालयो यवाः, मृगद्विजाः जागलसंज्ञयान्विताः, पेयाः, सुरामाक्षिकसीधुमाधवाः, तक्रम्, रसोनः, रुवुतैलम्, आर्द्रकम्, शालिंचशाकम्, कुलकम्, कठिल्लकम्, पुनर्नवा, शिग्रुफलम्, हरीतकी, ताम्बूलम्, एला, यवशूकम्, आयसम्, अजागवोष्ट्रीमहिषीपयो जलम्, लघूनि तीक्ष्णानि च दीपनानि, वस्त्रेण संवेष्टनम्, अग्निकर्मता, विषप्रयोगोत्रयुतो यथायथम्, पुनः विशेषतः प्लीहसमुद्भवे वामे प्रवाहौ धमनीव्यधः परम्, बद्धाह्वये चोदरजे क्षतोत्थिते नाभेरधः शस्त्रविधिर्यथाविधिः तथा समीरणोत्थे आदितः घृतपानम् साभ्यञ्जनं चाप्यनुवासनम्, उदरामये सति यथामलं आाश्रितः अयं पथ्यगणः नृणां सखा स्यात् ॥१-५॥

भावार्थः

विरेचन, लंघन; एक वर्ष पुराना गहत, मूंग, रक्तशाली, जौ; जांगल पशुपक्षीहरू, पेया; सुरा, मह, सीधू र माध्विक; मही, लशुन, एरण्डतैल, अदुवा, शालिञ्चशाक (पत्तूर), खेसरी, करेला, पुनर्नवा, सहिजन, हर्रो, पान, अलैंची, जौ, लौहभस्म, बाखा-गाई-ऊँट-भैंसीको दुध र मूत्र, लघु र तीक्ष्ण तथा दीपन गुण भएका

२३० यवशूकजायसम्, भै.र. ।
२३१ अजागवोष्ट्रीप्रभवं पयोजलम्, इति पाठान्तरम् ।
२३२ तीव्राणि इति पाठान्तरम् । तीक्ष्णानि इति च पाठान्तरम् ।
२३३ दीपनान्यपि, भै.र. ।
२३४ विषप्रयोगोऽनुयुतो, भै.र. ।
२३५ बद्धोदरे चौदकजे क्षतोत्थिते, भै.र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

खानेकुराहरू, कपडाले ढाक्नु, अग्निकर्म, विषको यथाविधि प्रयोग, प्लीहागत कारणले भएको उदररोगमा देब्रे हातको शिरावेधन, बद्धोदर र क्षतोदरमा नाभिमुनि यथाविधि शस्त्रकर्म गर्नु, वातोदरमा पहिला घृतपान गराएर अभ्यंग र अनुवासन गर्नु यी सबै उदररोग लागेको अवस्थामा पथ्य हुन्छन् ॥१-५॥

उदररोगेऽपथ्यानि–

सस्नेहनं धूमपानं जलपानं शिराव्यधम् ।
छर्दिं यानं दिवास्वप्नं व्यायामं पिष्टवैकृतम् ॥६॥
औदकानूपमांसानि पत्रशाकांस्तिलानपि ।
उष्णानि च विदाहीनि लवणान्यशनानि च ॥७॥
महेन्द्रगिरिजातानां सरितां सलिलानि च ।
शमीधान्यं विरूद्धान्नं दुष्टनीरं गुरूणि च ॥८॥[२३६]
विष्टम्भीनि विशेषात्तु स्वेदं विष्टम्भसम्भवे[२३७] ।
वर्जयेदुदरव्याधौ वैद्यो रक्षेन्निजं यशः ॥९॥

अन्वयः

सस्नेहनम्, धूमपानम्, जलपानम्, शिराव्यधम् छर्दिम्, यानम्, दिवास्वप्नम्, व्यायामम्, पिष्टवैकृतम्, औदकानूपमांसानि, पत्रशाकम्, तिलानपि, उष्णानि च विदाहीनि लवणान्यशनानि च, महेन्द्रगिरिजातानां सरितां सलिलानि च, शमीधान्यम्, विरूद्धान्नम्, दुष्टनीरम्, गुरूणि विष्टम्भीनि च, विशेषात्तु विष्टम्भसम्भवे उदरव्याधौ स्वेदं वर्जयेद् वैद्यो निजं यशः रक्षेत् ॥६-९॥

भावार्थः

स्नेहन, धूमपान, जलपान, शिरावेध, वमन, यात्रा, दिउसो सुत्नु, व्यायाम, पिठाका विकार सेल-अर्शा-अनर्शा आदि, औदक र आनूप मांस, पत्रशाक, तिल, तातो र विदाही खाने कुरा, नूनिला खानेकुरा, महेन्द्रगिरिबाट बहेका नदीको जल, शमीधान्य, विरुद्धभोजन, दूषित पानी, भारी र विष्टम्भी खाने कुरा, विष्टम्भाजीर्णका कारणले भएको उदररोगमा स्वेदन गर्नु यी सबै उदररोगीका लागि वर्जनीय छन् । यिनको परहेज गराएर चिकित्सकले आफ्नो यशको रक्षा गनुपर्दछ ॥६-९॥

इत्युदररोगे पथ्यापथ्यविधिः ॥३५॥
यति उदरोगमा अपनाउनुपर्ने पथ्यापथ्यविधिबारे बताइयो ॥३५॥

◆◆◆

२३६ शिम्बीधान्यं विरुद्धान्नं दुष्टनीरं गुरूणि च । महेन्द्रगिरिजातानां सरितां सलिलानि च ॥ इति भै.र. पाठक्रमः ।
२३७ छिद्रसमुद्भवे, श.क.द्रु. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

३६
अथ शोथरोगे पथ्यापथ्यविधिः

शोथरोगे पथ्यानि–

संशोधनं लंघनमस्रमोक्षः स्वेदः प्रलेपः परिसेचनं च ॥
पुरातनाः शालियवाः कुलत्था मुद्गाश्च गोधापि च शल्लकोऽपि ॥१॥
भुजंगभुक्तित्तिरिताम्रचूडलावादयो जांगलविष्किराश्च ॥
कूर्मोथ शृंगी प्रपुराणसर्पिस्तक्रं सुरा माक्षिकमासवश्च ॥२॥
निष्पावकाठिल्लकरक्तशिग्रुरसोनकर्कोटकबालमूलम्[२३८] ॥
सुवर्चला गृञ्जनकः पटोलं वेत्राग्रधात्रीफलमूलकानि ॥३॥[२३९]
पुनर्नवाचित्रकपारिभद्रश्रीपर्णनिम्बेक्षुरपल्लवानि ॥
एरण्डतैलं कटुका हरिद्रा हरीतकी क्षारनिषेवणं[२४०] च ॥४॥
भल्लातकं गुग्गुलुरायसं च कटूनि तिक्तानि च दीपनानि ॥
मूत्राणि गोजामहिषीभवानि कस्तूरिका चापि शिलाजतूनि ॥५॥
यत्पाण्डुरोगेष्वपि[२४१] वह्निकर्म पुरा प्रदिष्टं च तदेव चापि ॥
यथामलं पथ्यमिदं निरुक्तं शोथामयं सत्वरमुच्छिनत्ति ॥६॥

अन्वयः

संशोधनम्, लघनम्, अस्रमोक्षः, स्वेदः, प्रलेपः, परिसेचनं च, पुरातनाः शालियवाः कुलत्था मुद्गाश्च, गोधापि च शल्लकोऽपि भुजंगभुक् तित्तिरि-ताम्रचूड-लावादयो जांगल-विष्किराश्च, कूर्मोथ, श्रृंगी, प्रपुराणसर्पिः तक्रम्, सुरा, माक्षिकम्, आसवश्च, निष्पाव-काठिल्लक-रक्तशिग्रु-रसोन-कर्कोटक-बालमूलम्, सुवर्चला, गृञ्जनकः, पटोलम्, वेत्राग्र-धात्रीफल-मूलकानि, पुनर्नवा-चित्रक-पारिभद्र-श्रीपर्ण-निम्बे-क्षुरपल्लवानि, एरण्डतैलम्, कटुका, हरिद्रा, हरीतकी, क्षारनिषेवणं च, भल्लातकम्, गुग्गुलुः, आयसं च, कटूनि तिक्तानि च दीपनानि, मूत्राणि गो-जा-महिषीभवानि, कस्तूरिका चापि, शिलाजतूनि, पुरा यत्पाण्डुरोगेष्वपि वह्निकर्म च प्रदिष्टं तदेव चापि, इदं यथामलं निरुक्तम् पथ्यं शोथामयं सत्वरम् उच्छिनत्ति ॥१-६॥

---

२३८ मानमूलम्, भै.र., श.क.द्रु. । अतः परं मूलकानि इति शब्दो दृश्यते । अतः मानमूलमेव पठितव्यमत्रेति प्रतिभाति । अस्मिन्नेव पद्ये रसोनस्थाने रसाल इति भैषज्यरत्नावली पठति । शब्दकल्पद्रुमस्तु रसोन एव ।

२३९ धात्रीफल इति शब्दस्थाने वार्तिगन इति भैषज्यरत्नावली पठति । शब्दकल्पद्रुमे तु वाडिंगनम् ।

२४० क्षीरनिषेवणम्, भै.र. ।

२४१ रोगिष्वपि, भै.र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भावार्थः

संशोधन, लंघन, रक्तमोक्षण, स्वेदन, प्रलेप, परिसेचन; पुराना शालिधान, जौ, गहत, मूंगी; गोहोरो, शालक, गरुड[२४२], तित्रा, कुखुरा, लाभ आदि जांगल र विष्किर मांस, कछुवा, सिंघी माछा, पुरानो घृत, मही, सुरा, मह, आसव, भटमास, करेला, रातो सहिजन (मधुशिग्रु), लशुन, कर्कोटक (चटेल करेलो/चटेलो), कलिलो मूला, सुवर्चला (हुहुरे), गाजर, परवर, वेतका टुसा, अमला, मूला, पुनर्नवा, चित्रक, पारिजात, अग्निमन्थ, नीम, गोक्षुरपल्लव, एरण्डतैल, कुटकी, बेसार, हर्रो, क्षारको सेवन, भलायो, गुग्गुल, लौहभस्म, पिरा र तिता तथा दीपन खाने कुराहरू, गाई, बाखा र भैंसीको मूत्र, कस्तूरी, शिलाजित, पहिले पाण्डुरोग अन्तर्गत बताइएको अग्निकर्म, यी सबै रोगको तथा दोषको अवस्थानुसार बताइएका हुन् । यस गणको पथ्यको सेवन गरेमा शोथरोगको उच्छेद हुन्छ ॥१-६॥

शोथरोगेऽपथ्यानि–

[२४३]ग्राम्यानूपं पिशितलवणं शुष्कशाकं नवान्नम् ।
गौडं पिष्टं दधि सकृशरं[२४४] विज्जलं मद्यमस्रम् ॥[२४५]
धाना वल्लूरमशनमथो गुर्वसात्म्यं विदाहि ।
स्वप्नोऽरात्रौ[२४६] श्वयथुगदवान् वर्जयेन्मैथुनं च ॥७॥

अन्वयः

श्वयथुगदवान् ग्राम्यानूपम्, पिशितलवणम्, शुष्कशाकम्, नवान्नम्, गौडम्, पिष्टम्, दधि सकृशरम्, विज्जलम्, मद्यम्, अस्रम्, धाना-वल्लूरमशनमथो गुर्वसात्म्यम्, विदाहि, स्वप्नोऽरात्रौ, मैथुनं च वर्जयेत् ॥७॥

भावार्थः

शोथ रोग लागेको व्यक्तिले ग्राम्य आनूप मांस, नुन-मासु, सुकाएको साग, नयाँ अन्न, गुड अर्थात् सखखरको विकार, पिष्टविकार, कृशरासहितको दही, सुख्खा, मद्य, रक्त, धाना (भुटेको अन्न), सुकुटी मासु, गुरु र असात्म्य पदार्थ, विदाही खानेकुरा, दिनमा सुत्नु, मैथुन गर्नु यति कुराको वर्जन गर्नुपर्दछ ॥७-८॥

इति शोथरोगे पथ्यापथ्यविधिः ॥३६॥
यति शोथरोगमा अपनाउनुपर्ने पथ्यापथ्यविधिः ॥३६॥

◆◆◆

---

२४२ अहिभुक् या भुजंगभुक् शब्दलाई मयूरको अर्थमा पनि लिइएको छ ।

२४३ नित्यं दुष्टं पवनसलिलं वेगरोधं विरुद्धम् । सर्वं पानं विषममशनं मृत्तिकाभक्षणं च ॥ भैषज्यरत्नावल्यां श.क.द्रुमे चेति पाठातिरिक्तः । शोथरोगीले कहिल्यै पनि दूषित वायु, दूषित जल, वेगधारण, विरुद्धभोजन, विषमभोजन र मृत्तिकाभक्षण गर्नुहुँदैन ।

२४४ गौडं पिष्टान्नदधिकृशरम्, भै.र., श.क.द्रु. ।

२४५ निर्जरं मद्यमम्लम् इति भै.र. । विज्जलं मद्यमम्लम् इति श.क.द्रु. ।

२४६ स्वप्नश्चाह्नि, भै.र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

३८
अथ ब्रध्नवृद्धिरोगे पथ्यापथ्यविधिः

ब्रध्नवृद्धिरोगे पथ्यानि–

संशोधनं वस्तिरसृग्विमोक्षः स्वेदः प्रलेपोऽरुणशालयश्च ।
एरण्डतैलं सुरभीजलं च धन्वामिषं शिग्रुफलं पटोलम् ॥१॥
पुनर्नवागोक्षुरकाग्निमन्थं ताम्बूलपथ्या सकणा रसोनाः[२४७] ।
वातिगनं[२४८] गृञ्जनकं मधूनि शुभं घृतं तप्तजलं च तक्रम् ॥२॥
यदामवातापहमग्निकारी तदन्नपानं च सुराः पुराणाः[२४९] ।
अर्द्धेन्दुवद् वंक्षणयोश्च दाहो व्यत्यासतो बाहुशिराव्यधश्च ॥३॥
यथाश्रुतं[२५०] शस्त्रविधिश्च वर्गः स्याद् ब्रध्नवृद्ध्यामयिनां सुखाय ॥३.५॥

अन्वयः

संशोधनम्, वस्तिः, असृग्विमोक्षः, स्वेदः, प्रलेपः, अरुणशालयश्च, एरण्डतैलम्, सुरभीजलं च, धन्वामिषम्, शिग्रुफलम्, पटोलम्, पुनर्नवा-गोक्षुरका-ग्निमन्थ-ताम्बूल-पथ्याः, सकणा रसोनाः, वातिंगनम्, गृञ्जनकम्[२५१], मधूनि, शुभं घृतम्, तप्तजलं च, तक्रम्, यदामवातापहमग्निकारी तदन्नपानं च, सुराः पुराणाः, अर्द्धेन्दुवद् वंक्षणयोश्च दाहो व्यत्यासतो बाहुशिराव्यधश्च यथाश्रुतं शस्त्रविधिश्च (एषः)वर्गः ब्रध्नवृद्ध्यामयिनां सुखाय स्यात् ॥१-३.५॥

भावार्थः

शोधन, वस्ति, रक्तमोक्षण, स्वेदन, प्रलेप, रक्तशालि, एरण्डतैल, गोमूत्र, धन्वमांस, सहिजनको फल, परवर, पुनर्नवा, गोक्षुर, अरणी, पान, हर्रो, पिप्ला मिलाएको लशुन, भण्टा, गाजर, मह, घिउ, तातो पानी, आमवातहर र अग्निवर्द्धक अन्नपान, पुराना सुरा, वंक्षणमा अर्द्धचन्द्राकार दाह तथा विपरीत क्रमले बाहुशिरामा शस्त्रकर्म (शिरावेध) यी सबैको वर्ग वृद्धिरोगीहरूको सुखका लागि हुन् ॥१-३.५॥

---

२४७ ताम्बूलपथ्यारसना रसोनम्, भै.र. । ताम्बूलपथ्यासरला रसोनम्, श.क.द्रु. । सरणा रसोना चेति पाठान्तरम् ।

२४८ शब्दकल्पद्रुमः वाडिंगनम् इति पठति ।

२४९ भैषज्यरत्नावली पद्यार्थमेतन्न पठति ।

२५० यथामयम्, भै.र. ।

२५१ राजनिघण्टुमा महाकन्द रसोनलाई गृञ्जन भनिएको छ । भावप्रकाशमा गृञ्जनं गाजरं प्रोक्तं तथा नारंगवर्णकम् भनेर सुन्तला रंगको गाजरलाई जनाइएको छ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

व्रध्नवृद्धिरोगेऽपथ्यानि–

[२५२]आनूपमांसानि दधीनि माषा पिष्टानि दुष्टान्नमुपोदिका च[२५३] ।
गुरूणि शुक्रोत्थितवेगरोधाः स्युर्व्रध्नवृद्ध्यामयिनाममित्राः ॥४॥

अन्वयः

आनूपमांसानि, दधीनि, माषाः, पिष्टानि, दुष्टान्नम्, उपोदिका च, गुरूणि, शुक्रोत्थितवेगरोधाः व्रध्नवृद्ध्यामयिनाम् अमित्राः स्युः ॥४॥

भावार्थः

आनूप मांस, दही, मास, पिष्टनिर्मित पक्वान्न, दूषित पानी, पवई साग, गुरु आहार, प्रवृत्त शुक्रको वेग रोक्नु यी व्रध्न र वृद्धि दुवै रोगका लागि अमित्र/अपथ्य हुन् ॥४॥

इति व्रध्नवृद्ध्यामये पथ्यापथ्यविधिः ॥३७॥
यति व्रध्न र वृद्धिरोगमा अपनाउनुपर्ने पथ्यापथ्यविधिबारे बताइयो ॥३७॥

◆◆◆

२५२ विरुद्धपानान्नम्, असात्म्यसेवा, संक्षोभणम्, हस्तिहयादियानम् चापथ्ये गृहीतं दृश्यते शब्दकल्पद्रुमे ।
२५३ उष्णानि पिष्टान्नमुपोदिका च इति पाठान्तरम् । दुग्धानि पिष्टान्नमुपोदिका च, श.क.द्रु. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

३८

अथ गलगण्डगण्डमालापचीग्रन्थ्यर्वुदादिरोगे पथ्यापथ्यविधिः

गलगण्डगण्डमालापचीग्रन्थ्यर्वुदादिरोगे पथ्यानि–

छर्दिर्विरेचनं नस्यं स्वेदो धूमः शिराव्यधः ।
अग्निकर्म क्षारयोगः प्रलेपो लंघनानि च ॥१॥
पुराणघृतपानं च जीर्णलोहितशालयः ।
यवाः मुद्गाः पटोलं च रक्तशिग्रुः कठिल्लकम् ॥२॥
शालिञ्चशाकं वेत्राग्रं रुक्षाणि च कटूनि च ।
दीपनानि च सर्वाणि गुग्गुलुश्च शिलाजतु ॥३॥
विशेषाद् गलगण्डेषु छित्वा जिह्वातले शिरे ।
कुर्याद् वा मणिबन्धोर्ध्वेन्दुलेखां स्त्र्यंगुलार्द्धकाम् ॥४॥[२५४]
गलगण्डगण्डमालापचीग्रन्थ्यर्बुदातुरे ।
यथादोषं यथावस्थं पथ्यमेतत् प्रवर्त्तते[२५५] ॥५॥

अन्वय

छर्दिः, विरेचनम्, नस्यम्, स्वेदः, धूमः, शिराव्यधः, अग्निकर्म, क्षारयोगः, प्रलेपः, लंघनानि च, पुराणघृतपानं च, जीर्ण-लोहितशालयः, यवाः, मुद्गाः, पटोलं च, रक्तशिग्रुः, कठिल्लकम्, शालिञ्च-शाकम्, वेत्राग्रम्, रुक्षाणि च कटूनि च, दीपनानि च सर्वाणि, गुग्गुलुश्च, शिलाजतु । विशेषाद्, गलगण्डेषु जिह्वातले शिरे छित्वा वा मणिवन्धोर्ध्वे स्त्र्यगुलार्द्धकां इन्दुलेखां कुर्याद् । गलगण्ड-गण्डमाला-पची-ग्रन्थ्या-र्वुदा-तुरे यथादोषं यथावस्थं एतत् पथ्यम् प्रवर्त्तते ॥१-५॥

भावार्थः

वमन, विरेचन, नस्य, स्वेदन, धूम, शिरावेधन, अग्निकर्म, क्षारयोग, प्रलेप, लंघन, पुरानो घृतको पान, पुरानो रक्तशाली, जौ, मूंग, परवर, रातो सहिजन, करेला, शालिञ्चशाक (पत्तूर), वेतका टुसा, रुक्ष र कटु एवं दीपन आहार, गुगुल र शिलाजतु गलगण्ड आदिका रोगीलाई पथ्य हुन्छन् । विशेष गरी गलगण्डमा जिह्वातलको शिरा छेदन गरेर अथवा मणिबन्धमाथि साढे तीन अंगुलको इन्दुलेखा बनाएर उपचार गरिन्छ । गलगण्ड, गण्डमाला, अपची, ग्रन्थी, अर्वुदका विरामीहरूका लागि दोष र अवस्थाको विचार गरेर यो पथ्य निर्धारण गरिएको हो ॥१-५॥

---

२५४ पद्यमेतन्न दृश्यते भै.रत्नावल्याम् । कुर्याद् वा मणिबन्धोर्ध्वरेखास्तिस्रोऽऽगुलान्तराःइति पाठो ऽपि दृश्यते ।

२५५ प्रकीर्तितम्, भै.र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गलगण्डगण्डमालापचीग्रन्थ्यर्बुदादिरोगेऽपथ्यानि–

दुग्धेक्षुविकृताः[२५६] सर्वाः मांसं चानूपसम्भवम् ।
पिष्टान्नमम्लं मधुरं गुर्वभिष्यन्दकारि च ॥६॥
गलगण्डगण्डमालापचीग्रन्थ्यर्बुदामयान् ।
चिकित्सन्नगदंकारो यशोर्थी परिवर्जयेत् ॥७॥

अन्वयः

सर्वाः दुग्धेक्षुविकृताः, आनूपसम्भवम् मांसं च, पिष्टान्नम्, अम्लम्, मधुरम्, गुरु, अभिष्यन्दकारि च, गलगण्ड-गण्डमाला-ऽपची-ग्रन्थ्य-र्बुदा-ऽऽमयान् चिकित्सन् यशोर्थी अगदंकारः (एतानि अपथ्यानि) परिवर्जयेत् ॥६-७॥

भावार्थः

सबै दुधका विकृति र उखुका विकृति (दही, नौनी, खुवा, पेडा, खुँदो, सख्खर, चाकु, पुष्टकारी आदि), आनूपमांस, पिष्टान्न (सेल, अर्शा, पुवा, मालपुवा आदि), अमिलो, गुलियो, भारी र अभिष्यन्दी खानेकुराहरू गलगण्ड, गण्डमाला, अपची, ग्रन्थी, अर्वुदका विरामीहरूका लागि अपथ्य हुन्छन् । यी रोगहरूको चिकित्सा गर्दा यश चाहने अगदंकार (चिकित्सक)ले यी अपथ्यहरूको परहेज गर्नुपर्दछ ॥६-७॥

इति गलगण्डगण्डमालापचीग्रन्थ्यर्वुदादिरोगे पथ्यापथ्यविधिः ॥३८॥

यति गलगण्ड-गण्डमाला-अपची-ग्रन्थी-अर्बुदादिरोगमा
अपनाउनुपर्ने पथ्यापथ्यविधिबारे बताइयो ॥३८॥

◆◆◆

२५६ क्षीरेक्षुविकृतीः, भै.र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

३९

अथ श्लीपदरोगे पथ्यापथ्यविधिः

श्लीपदरोगे पथ्यानि–

प्रच्छर्दनं लंघनमस्रमोक्षः स्वेदो विरेकः परिलेपनं च।[२५७]

पुरातनाः षष्टिकशालयश्च यवाः कुलत्थाः लशुनं पटोलम् ॥१॥

वार्त्ताकुशोभाञ्जनकारवेल्लम् पुनर्नवामूलकपोदिका च।[२५८]

एरण्डतैलं सुरभीजलं च कटूनि तिक्तानि च दीपनानि ॥२॥[२५९]

गुल्फोपरिष्टात् चतुरंगुले च वातोद्भवे गुल्फतले तु पैत्ते।

अंगुष्ठमूले कफजे विशेषाञ्छिराव्यधश्चापि यथाविधानम् ॥३॥[२६०]

एतानि पथ्यानि भवन्ति पुसां रोगे सति श्लीपदनामधेये ॥३.५॥

अन्वयः

प्रच्छर्दनम्, लंघनम्, अस्रमोक्षः, स्वेदः, विरेकः, परिलेपनं च, पुरातनाः षष्टिकशालयश्च, यवाः, कुलत्थाः, लशुनम्, पटोलम्, वार्त्ताकुशोभाञ्जनकारवेल्लम्, पुनर्नवामूलकपोदिका च, एरण्डतैलम्, सुरभीजलं च, कटूनि तिक्तानि च दीपनानि। विशेषात्, वातोद्भवे गुल्फोपरिष्टात् चतुरंगुले च, पैत्ते तु गुल्फतले, कफजे अंगुष्ठमूले यथाविधानम् शिराव्यधश्चापि। पुसां श्लीपदनामधेये रोगे सति एतानि पथ्यानि भवन्ति ॥१-३.५॥

भावार्थः

वमन, लंघन, रक्तमोक्षण, स्वेदन, विरेचन, प्रलेप, पुराना षष्टिक र शालीधानका चामल, जौ, गहत, लशुन, परवर, भण्टा, सहिजन, करेला, पुनर्नवा, मूला, पवई साग, एरण्डतैल, गोमूत्र, कटु-तिक्त र दीपन आहार यी श्लीपदरोगमा पथ्य हुन्छन्। विशेष गरी वातदोषले गर्दा भएको श्लीपदमा गोलीगाँठाभन्दा चार अंगुल माथि, पैत्तिक श्लीपदमा गुल्फतलमा र कफज श्लीपदमा बुढीऔलाको फेदमा विधिपूर्वक शिरावेध पनि गरिन्छ। मानिसहरूलाई श्लीपद अर्थात् हातीपाइले रोग लागेको अवस्थामा यी सबै पथ्य हुन्छन् ॥१-३.५॥

---

२५७ एतन्न पठति भै.र.।

२५८ कटूनि तिक्तानि च दीपनानि। इति पदान्तरम्, भै.र.।

२५९ पुनर्नवा मूलकपोतिका च, भै.र.। पूतिका, श.क.द्रु.।

२६० पद्यमेतदपि न पठति भै.र.।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

श्लीपदरोगेऽपथ्यानि–

पिष्टान्नं दुग्धविकृतिं गुडमानूपमामिषम् ॥४॥

स्वादुरसं पारियात्रसिन्धुविन्ध्यनदीजलम् ।[२६१]

पिच्छिलं गुर्वभिष्यन्दि श्लीपदी परिवर्जयेत् ॥५॥

अन्वयः

श्लीपदी पिष्टान्नम्, दुग्धविकृतिम्, गुडम्, आनूपमामिषम्, स्वादुरसम्, पारियात्र-सिन्धु-विन्ध्य-नदी-जलम्, पिच्छिलम्, गुर्वभिष्यन्दि परिवर्जयेत् ॥४-५॥

भावार्थः

श्लीपदका रोगीले पिष्टान्न, दुग्धविकार, गुड, आनूपमांस, गुलियो तथा पारियात्रपर्वत, सिन्धुपर्वत र विन्ध्याचलपर्वतका नदीहरूको जल, चिप्ला वस्तुहरू (पिच्छिल) एवं भारी र अभिष्यन्दी खानेकुराहरूको परहेज गर्नुपर्दछ ॥४-५॥

इति श्लीपदरोगे पथ्यापथ्यविधिः ॥३९॥

यति श्लीपदरोगमा अपनाउनुपर्ने पथ्यापथ्यविधिबारे बताइयो ॥३९॥

◆◆◆

२६१ स्वादुरसं महेन्द्रोत्थं सह्यविन्ध्यनदीजलम् । इति भै.र.।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

४०
अथ विद्रधिरोगे पथ्यापथ्यविधिः

विद्रधिरोगे पथ्यानि–

आमावस्थे रेचनानि लेपः स्वेदोऽस्रमोक्षणम्।
जीर्णाः श्यामाककलमाः कुलत्था लशुनानि च ॥१॥
रक्तशिग्रुं च निष्पावं कारवेल्लं पुनर्नवा।
श्रीपर्णी चित्रकं क्षौद्रं शोथोक्तानि च सर्वशः ॥२॥
पक्वावस्थे शस्त्रकर्म पुराणा रक्तशालयः।
घृतं तैलं मुद्‌गरसो विलेपी धन्वजा रसाः ॥३॥
शालिंचशाकं कदलं पटोलं हिमवालुका।
चन्दनं तप्तशीताम्बु सर्वं चापि व्रणोदितम् ॥४॥
नराणां विद्रधौ व्याधौ यथावस्थं यथामलम्।
पथ्यान्येतानि सर्वाणि निर्दिष्टानि महर्षिभिः ॥५॥

अन्वयः

आमावस्थे रेचनानि, लेपः, स्वेदः अस्रमोक्षणम्, जीर्णाः श्यामाककलमाः कुलत्थाः, लशुनानि च, रक्तशिग्रुं च, निष्पावम्, कारवेल्लम्, पुनर्नवा, श्रीपर्णी, चित्रकम्, क्षौद्रम् शोथोक्तानि च सर्वशः।

पक्वावस्थे शस्त्रकर्म, पुराणा रक्तशालयः, घृतम्, तैलम्, मुद्‌गरसः, विलेपी, धन्वजा रसाः, शालिंचशाकम्, कदलम्, पटोलम्, हिमवालुका, चन्दनम्, तप्तशीताम्बु, सर्वं चापि व्रणोदितम्।

यथावस्थं यथामलम् नराणां विद्रधौ व्याधौ एतानि सर्वाणि पथ्यानि महर्षिभिः निर्दिष्टानि (सन्ति)॥१-५॥

भावार्थः

आमावस्थामा विरेचन, लेप, स्वेदन, रक्तमोक्षण; पुराना सामाधान, मार्सीधान, गहत; लशुन रातो सहिजन, भटमास-बोडी, करेलो, पुनर्नवा, अग्निमन्थ (गिनेरी), चित्रक, मह र शोथरोगमा बताइएका सबै पथ्यहरू दिन सकिन्छ।

पक्वावस्थामा शस्त्रकर्म, पुरानो रक्तशाली, घृत, तैल, मूंगको रस, विलेपी, धन्वज मांसरस, शालिञ्चशाक, केरा, परवर, हिउँको धुलो(Ice pack?) वा चिसो बालुवा, चन्दन, तताएर सेलाएको पानी र व्रणमा बताइएका सबै पथ्यहरू दिन सकिन्छ।

दोष र अवस्था अनुसार मानिसहरूमा लागेको विद्रधि रोगका लागि महर्षिहरूले यी पथ्यहरू निर्धारण गरेका हुन् ॥१-५॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विद्रधिरोगेऽपथ्यानि–

शोथिनां यान्यपथ्यानि व्रणिनामहितानि च ।

क्रमादामे च पक्वे च विद्रधौ वर्जयेन्नरः ॥६॥

अन्वयः

आमे च पक्वे च विद्रधौ नरः क्रमाद् शोथिनां यान्यपथ्यानि, व्रणिनामहितानि च (तानि) वर्जयेत् ॥६॥

भावार्थः

आम र पक्व अवस्थाका विद्रधिमा मानिसले क्रमानुसार शोथरोगीहरूका लागि जे जे अपथ्य बताइएको छ र व्रणमा जेजे अहितकारी बताइएको छ ती ती आहारविहारलाई परहेज गर्नुपर्दछ ॥६॥

इति विद्रधिरोगे पथ्यापथ्यविधिः ॥४०॥

यति विद्रधिरोगमा अपनाउनुपर्ने पथ्यापथ्यविधिबारे बताइयो ॥४०॥

◆◆◆

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

४१
अथ शोथव्रणसद्योव्रणनाडीव्रणरोगेषु पथ्यापथ्यविधिः

शोथव्रणसद्योव्रणनाडीव्रणरोगेषु पथ्यानि–

विम्लापनं रक्तमुक्तिरुपनाहो विपाटनम् ।
शोधनं रोपणं षष्ठं पुराणाः सितशालयः ॥१॥
यवषष्टिकगोधूमा जांगला मृगपक्षिणः ।
विलेपी लाजमण्डश्च कटुतैलं घृतं मधु ॥२॥
तैलं[२६२] मसूरतुवरीमुद्गयूषाश्च शर्कराः ।
आषाढफलवार्त्ताकुकर्कोटकपटोलकम् ॥३॥
कारवेल्लं निम्बपत्रं वेत्राग्रं बालमूलकम् ।
सुनिषण्णकशालिञ्चतण्डुलीयकवास्तुकम् ॥४॥
त्रिफला पनसं मोचं दाडिमं कटुकाफलम् [२६३]।
जीवन्ती सैन्धवं द्राक्षा स्वादुतिक्तकषायकाः ॥५॥
समस्तमेतदग्रं तु स्निग्धमुष्णं द्रवोत्तरम् ।[२६४]
उशीरं बालव्यजनं चन्दनं तिललेपनम् ॥६॥
तप्तशीताम्बुकर्पूरं वैकृतापहृतिः परा[२६५] ।
एतत्पथ्यं नरैः सेव्यं यथावस्थं यथामलम् ॥७॥
व्रणशोथे व्रणे सद्योव्रणे नाडीव्रणेऽपि च ॥७.५॥

अन्वयः

विम्लापनम्, रक्तमुक्तिः, उपनाहः, विपाटनम्, शोधनम्, रोपणम् षष्ठम् ।

पुराणाः सितशालयः, यव-षष्टिक-गोधूमाः, जांगला मृगपक्षिणः, विलेपी, लाजमण्डश्च, कटुतैलम्, घृतम्, मधु, तैलम्, मसूर-तुवरी-मुद्ग-यूषाश्च, शर्कराः, आषाढफल-वार्त्ताकु-कर्कोटक-पटोलकम्, कारवेल्लं निम्बपत्रं, वेत्राग्रं, बालमूलकम्, सुनिषण्णक-शालिञ्च-तण्डुलीयक-वास्तुकम्, त्रिफला, पनसम्, मोचम्, दाडिमम्, कटुकाफलम्, जीवन्ती, सैन्धवम्, द्राक्षा, स्वादुतिक्तकषायकाः, स्निग्धमुष्णं द्रवोत्तरं एतत्समस्तमन्नम्, उशीरम्, बालव्यजनम्, चन्दनम्, तिललेपनम्, तप्तशीताम्बु, कर्पूरम्, वैकृतापहृतिः परा ।

नरैः यथावस्थं यथामलम् व्रणशोथे, व्रणे, सद्योव्रणे, नाडीव्रणेऽपि च एतत्पथ्यं सेव्यम् ॥१-७.५॥

---

२६२ तिलम्, भै.र. ।

२६३ कटुकीफलम्, भै.र. ।

२६४ एषणं शमनं दाहः स्वेदनं बन्धनक्रिया । व्रणावचूर्णनं लेपो धूपनं पत्रधारणम् । भै. रत्नावल्यां, श.क.द्रुमे च ।

२६५ तथैव वैकृतापहम्, भै.र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भावार्थः

विम्लापन, रक्तमोक्षण, उपनाह, पाटन, शोधन र छैटौं रोपण यी व्रणका चिकित्साक्रम हुन् ।

पुरानो सेतो शालीधान, जौ, षष्टिक चामल, गहुँ, जांगल पशुपक्षीको मांसरस, विलेपी, लाजमण्ड, तोरीसर्स्यूँको तेल, घिउ, मह, तिलको तेल, मुसुरो-अरहर-मूंगको रस-यूष, सख्खर, आषाढफल, भण्टा, कर्कोटक, परवर, तिते करेला, निम्बपत्र, बेतका टुसा, कलिलो मूला, सुनिषण्णक, शालिञ्च, लुँडे, बेथे, त्रिफला, रुखकटहर, केरा, दाडिम, कटुकाफल[२६६], जीवन्ती, सैन्धवलवण, दाख, गुलिया, तिता र टर्रोखालका अन्न, चिल्ला ताता झोलिला (तरल) खानेकुराहरू, उशीर, चम्मर, चन्दन, तिललेपन, तताएर सेलाएको पानी, कपूर र सबभन्दापछिल्लो व्रणको सातौं उपक्रम (वैकृतापह) यी चिकित्साक्रम र पथ्य हुन् ।

मानिसहरूले दोष र अवस्थानुसार व्रणशोथमा, व्रणमा, सद्योव्रणमा र नाडीव्रणमा समेत यहाँ बताइएको पथ्य सेवन गर्नुपर्दछ ॥१-७.५॥

शोथव्रणसद्योव्रणनाडीव्रणरोगेष्वपथ्यानि–

नवानि धान्यानि तिलान् कषायान्[२६७] माषान् कुलत्थान् कृशरान् हिमाम्भः ।
क्षीरेक्षुजातान् विविधान् विकारानम्लानि[२६८] शाकानि च पत्रवन्ति ॥८॥
अजांगलं मांसमसात्म्यमन्नम् विदाहि विष्टम्भि गुरूणि चापि ।
कट्वम्लशीतं लवणं व्यवायमायासमुच्चैः परिभाषणं च ॥९॥
प्रियासमालोकनमन्हिनिद्रां प्रजागरं चंक्रमणं नितान्तम् ।
सदास्थितिं द्रागधिरोपणं[२६९] च नस्यानि ताम्बूलमजीर्णतां च ॥१०॥
प्रचण्डवातातपधूमवृष्टिरजोभयक्रोधवमिप्रमेहान् ।
शोकं विरुद्धाशनमम्बुपानं तीक्ष्णानि रुक्षाणि[२७०] विघट्टनं च ॥११॥
कण्डूयनं काष्ठनखादितोदं निरन्नभावं विषमोपचारम् ।
वैद्यश्चिकित्सन् व्रणशोथरोगं व्रणं च सद्योव्रणमामयं च ॥१२॥
नाडीव्रणं चापि यशोऽभिलाषी विवर्जयेत्सन्ततमप्रमत्तः ॥१२.५॥

अन्वयः

नवानि धान्यानि, तिलान्, कषायान्, माषान्, कुलत्थान्, कृशरान्, हिमाम्भः, क्षीरेक्षुजातान् विविधान् विकारान्, अम्लानि, शाकानि च पत्रवन्ति, अजांगलं मांसम्, असात्म्यमन्नम्, विदाहि विष्टम्भि गुरूणि चापि, कट्वम्लशीतम्, लवणम्, व्यवायम्, आयासम्, उच्चैः परिभाषणं च, प्रियासमालोकनम्,

२६६ कुटकी वा तितो गोलकाँक्री ।
२६७ कलायान्, भै.र., श.क.द्रु. ।
२६८ मद्यानि, भै.र., श.क.द्रु ।
२६९ प्राग्गधिरोपणं च । भै. र., श.क.द्रु. ।
२७० तीक्ष्णोष्णरुक्षाणि, भै.र., श.क.द्रु. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अन्हिनिद्राम्, प्रजागरम्, चंक्रमणं नितान्तम्, सदास्थितिम्, द्रागधिरोपणं च, नस्यानि, ताम्बूलम्, अजीर्णतां च, प्रचण्डवातातपधूमवृष्टिरजोभयक्रोधवमिप्रमेहान्, शोकम्, विरुद्धाशनम्, अम्बुपानम्, तीक्ष्णानि, रुक्षाणि, विघट्टनं च, कण्डूयनम्, काष्ठनखादितोदम्, निरन्नभावम्, विषमोपचारम्, व्रणशोथरोगम्, व्रणं च, सद्योव्रणमामयं च, नाडीव्रणं चापि चिकित्सन् यशोभिलाषी सन्ततमप्रमत्तः वैद्यः (एतानि अपथ्यानि) विवर्जयेत् ॥८-१२.५॥

भावार्थः

नयाँ धान, तिल, टर्रो खानेकुरा, मास, गहत, खिचडी, चिसो पानी, दुध र उखुबाट बनाइएका विभिन्न परिकारहरू, अमिलो, पात भएका सागहरू, आनूप र ग्राम्य मांस, असात्म्य अन्न, विदाही र विष्टम्भी तथा गुरु आहार विहार, पिरो र अमिलो, चिसो, नुनिलो, मैथुन, ज्यादा प्रयास, चर्को आबाजले बोल्नु, प्रियलाई हेरिरहनु, दिउसो निदाउनु, राती बिउँझिनु, एक्लै टहल्नु, एकठाउँमा बसिरहनु, झट्टै निको पार्नु (संशोधन आदि नगरी चाँडै व्रण रोपण गर्नु), नस्य, पान, अजीर्ण, प्रचण्ड वायु, घाम, धुवाँ, वर्षा र धुलो भएको ठाउँमा रहनु, भय, क्रोध, वमन र मधुमेह, शोक, विरुद्धभोजन, ज्यादा पानी पिउनु, तीक्ष्ण र रुक्ष आहार, चिलाउनु, भुइँ घोट्नु, सिनका र नङ्ले कोट्याउनु, निरन्नभाव/भोकभोकै रहनु, विषम उपचार गर्नु यी सबै अपथ्यहरूको व्रणशोथ, व्रण, सद्योव्रण, नाडीव्रण चिकित्सा गर्ने वैद्यले कहिल्यै पनि होश नगुमाई परहेज गर्नुपर्दछ ॥८-१२.५॥

इति शोथव्रणसद्योव्रणनाडीव्रणरोगेषु पथ्यापथ्यविधिः ॥४१॥

यति शोथ-व्रण-सद्योव्रण-नाडीव्रण-रोगमा अपनाउनुपर्ने पथ्यापथ्यविधिबारे बताइयो ॥४१॥

◆◆◆

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

४२
अथ भग्ने पथ्यापथ्यविधिः

भग्ने पथ्यानि–

शीताम्बुसेचनं पंकप्रदेहो वमनक्रिया।
शालिप्रियंगुगोधूमा यूषो मुद्गसतीनयोः ॥१॥[२७१]
नवनीतं घृतं क्षीरं तैलं मांसरसो मधुः।
पटोलं लशुनं शिग्रुः पत्तूरो बालमूलकः ॥२॥
द्राक्षा धात्री वज्रवल्ली लाक्षा यच्चापि बृंहणम्।
तत्सर्वं भिषजा देयं नित्यं भग्नाय जानता ॥३॥

अन्वयः

शीताम्बुसेचनम्, पंकप्रदेहः, बन्धनक्रिया, शालिप्रियंगुगोधूमाः, मुद्गसतीनयोः यूषः, नवनीतम्, घृतम्, क्षीरम्, तैलम्, मांसरसः, मधु, पटोलम्, लशुनम्, शिग्रुः, पत्तूरः, बालमूलकः, द्राक्षा, धात्री, वज्रपर्णी, लाक्षा, यच्चापि बृंहणं तत्सर्वं नित्यं जानता भिषजा भग्नाय देयम् ॥१-३॥

भावार्थः

चिसो पानीको सेचन, पंकप्रदेह (मृत्तिकालेप), बन्धनक्रिया, शालीधान, कागुनो, गहुँ, मूंग र केराउको यूष, नौनी, घिउ, दुध, तिलको तेल, मांसरस, मह, परवर्, पत्तूर (शालिञ्च), कलिलो मूला, दाख, अमला, वज्रवल्ली (हडजोड/अस्थिश्रृंखला/अस्थिसंहारी) लाहा र वृंहण गुण भएको औषधि र आहार भग्न बारेका जानकार चिकित्सकले रोगीलाई सेवन गर्न दिनुपर्दछ ॥१-३॥

भग्नेऽपथ्यानि–

लवणं कटुकं क्षारमम्लं मैथुनमातपम्।
व्यायामं च न सेवेत भग्ने रुक्षान्नमेव च ॥४॥

अन्वयः

लवणम्, कटुकम्, क्षारम्, अम्लम्, मैथुनम्, आतपम्, व्यायामं च, रुक्षान्नम् एव च भग्ने न सेवेत ॥४॥

भावार्थः

नुनिलो, पिरो, क्षार, अमिलो, मैथुन, घाम, व्यायाम र रुखो अन्नपान भग्नमा अपथ्य हुने भएकाले सेवन गर्नुहुँदैन ॥४॥

इति भग्ने पथ्यापथ्यविधिः ॥४२॥

यति भग्नमा अपनाउनुपर्ने पथ्यापथ्यविधिबारे बताइयो ॥४२॥

◆◆◆

---

२७१ मुद्गसतीलयोः, श.क.द्रु.।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

४३
अथ भगन्दरे पथ्यापथ्यविधि:

भगन्दरे पथ्यानि–

आमे संशोधनं लेपो लंघनं रक्तमोक्षणम्।

पक्वे पुनः शस्त्रविधिस्तथा क्षाराग्निकर्म च ॥१॥[२७२]

सर्वत्र शालयो मुद्गा विलेपी जांगलो रसः।

पटोलं शिग्रु वेत्राग्रं पत्तूरो बालमूलकम् ॥२॥

तिलसर्षपयोस्तैलं तिक्तवर्गो घृतं मधु।

एतत्पथ्यं नरैः सेव्यं यथादोषं भगन्दरे ॥३॥

अन्वयः

आमे संशोधनं लेपो लंघनं रक्तमोक्षणम्। पक्वे पुनः शस्त्रविधिस्तथा क्षाराग्निकर्म च। सर्वत्र शालयः, मुद्गाः, विलेपी, जांगलो रसः, पटोलम्, शिग्रुः, वेत्राग्रम्, पत्तूरः, बालमूलकम्, तिल-सर्षपयोस्तैलम्, तिक्तवर्गः, घृतम्, मधु। नरैः भगन्दरे यथादोषं एतत्पथ्यं सेव्यम् ॥१-३॥

भावार्थः

आम भगन्दरमा संशोधन, लेप, लंघन र रक्तमोक्षण गर्नुपर्दछ। पक्व भगन्दरमा शस्त्रविधि, क्षारकर्म र अग्निकर्म गर्नुपर्दछ। सबै किसिमका भगन्दरमा शालिधानको चामल, मूंग, विलेपी, जांगल पशुपक्षीको मांसरस, परवर, सहिजन, वेतका नरम टुसा, शालिञ्चशाक, कलिलो मूला, तिल र सर्स्यूंको तेल, तिक्त वर्गका औषधिहरू, घिउ, मह पथ्य हुन्छन्। भगन्दररोग लागेको मानिसले दोष र अवस्था अनुसार यो पथ्य सेवन गर्नुपर्दछ ॥१-३॥

---

२७२ भै.र. न पठति श्लोकमिदम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भगन्दरेऽपथ्यानि–

[२७३]**व्यायामं मैथुनं युद्धं पृष्ठयानं गुरूणि च ।**

सम्वत्सरं परिहरेदपि रूढव्रणो नरः ॥४॥[२७४]

अन्वयः

अपि रूढव्रणो नरः व्यायामम्, मैथुनम्, युद्धम्, पृष्ठयानम्, गुरूणि च सम्वत्सरं परिहरेत् ॥४॥

भावार्थः

भगन्दरको व्रण निको भइसकेको भएपनि रोगीले एकवर्षसम्म व्यायाम, मैथुन, युद्ध, हातीघोडा आदिको पिठिउँमा चढेर गर्ने यातायात र गुरु अर्थात् भारी आहारविहार छोड्नुपर्दछ ॥४॥

इति भगन्दरे पथ्यापथ्यविधिः ॥४३॥

यति भगन्दररोगमा अपनाउनुपर्ने पथ्यापथ्यविधिबारे बताइयो ॥४३॥

◆◆◆

---

२७३ विरुद्धान्यन्नपानानि, विषमाशनम्, आतपः इति च श.क.द्रु. पठति ।

२७४ सम्वत्सरं परिहरेद्यावद् रूढव्रणो नरः, भै.र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

४४
अथोपदंशरोगे पथ्यापथ्यविधिः

उपदंशरोगे पथ्यानि–

छर्दिर्विरेको ध्वजमध्यनाडीवेधो जलौकापरिपातनं च।
सेकः प्रलेपो यवशालयश्च धन्वामिषं मुद्गरसो घृतानि॥१॥
कठिल्लकं शिग्रुफलं पटोलं शालिञ्चशाकं नवमूलकं च।
तिक्तं कषायं मधु कूपवारि तैलं च हन्यादुपदंशरोगम्॥२॥

अन्वयः

उपदंशरोगे छर्दिः, विरेकः, ध्वजमध्यनाडीवेधः, जलौकापरिपातनं च, सेकः, प्रलेपः, यवशालयश्च, धन्वामिषम्, मुद्गरसः, घृतानि, कठिल्लकम्, शिग्रुफलम्, पटोलम्, शालिञ्चशाकम्, नवमूलकं च, तिक्तम्, कषायम्, मधु, कूपवारि, तैलं च उपदंशरोगं हन्यात्॥१-२॥

भावार्थः

उपदंश रोगमा वमन, विरेचन, प्रजननांगको मध्यमा रहेको नाडीको वेध, जलौकालाई चुसाउनु, सेक, प्रलेप, जौ, शालिधान आदिको भोजन, जांगल धन्व आदि मृगपक्षीको मासु, मूंगीको रस, घिउ, करेला, सहिजन, परवर, शालिञ्चशाक (पत्तूर), कलिलो मूला, तितो, टर्रो, मह, इनार/कुवाको पानी र तैल पथ्य हुन्छन्॥१-२॥

उपदंशेऽपथ्यानि–

दिवानिद्रां मूत्रवेगं गुर्वन्नं मैथुनं गुडम्।
आयासमम्लं तक्रं च वर्जयेदुपदंशवान्॥३॥[२७५]

अन्वयः

दिवा-निद्राम्, मूत्र-वेगम्, गुर्वन्नम्, मैथुनम्, गुडम्, आयासम्, अम्लम्, तक्रं च उपदंशवान् वर्जयेत्॥३॥

भावार्थः

दिउसो सुत्नु, मूत्रको वेग रोक्नु, भारी अन्नपान गर्नु, मैथुन गर्नु, गुडको सेवन, ज्यादा परिश्रम, अमिलो खानेकुरा र मही यी अपथ्यहरूलाई उपदंशरोगीले परहेज गर्नुपर्दछ॥३॥

इत्युपदंशरोगे पथ्यापथ्यविधिः॥४४॥

यति उपदंशरोगमा अपनाउनुपर्ने पथ्यापथ्यविधिबारे बताइयो॥४४॥

◆◆◆

२७५ भै.र. न पठति उपदंशरोगस्यापथ्यम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

४५
अथ शूकदोषे पथ्यापथ्यविधिः

शूकदोषे पथ्यानि–

लेपो विरेकोऽसृङ्मोक्षः[२७६] सर्पिष्पानं च शालयः ।
यवा जांगलमांसानि मुद्गयूषः कठिल्लकः ॥१॥
पटोलं शिग्रु कर्कोटं पत्तूरं बालमूलकम् ।
वेत्राग्रमाषाढफलं दाडिमं सैन्धवं वरा[२७७] ॥२॥
कूपोदकं गन्धसारः कस्तूरी हिमवालुका ।
तिक्तं कषायं तैलं च स्यात्पथ्यं शूकदोषिणाम् ॥३॥

अन्वयः

लेपः, विरेकः, असृङ्मोक्षः सर्पिष्पानं च, शालयः, यवाः, जांगलमांसानि, मुद्गयूषः, कठिल्लकः, पटोलम्, शिग्रु, कर्कोटम्, पत्तूरम्, बालमूलकम्, वेत्राग्रम्, आषाढफलम्, दाडिमम्, सैन्धवम्, वरा, कूपोदकम्, गन्धसारः, कस्तूरी, हिमवालुका, तिक्तम्, कषायम्, तैलं च शूकदोषिणाम् पथ्यं स्यात् ॥१-३॥

भावार्थः

लेप, विरेचन, रक्तमोक्षण, घृतपान, शालिधान, जौ, जांगल पशुपक्षीको मांस, मूंगको यूष/रस, तिते करेला, परवर, सहिजन, कर्कोट, पत्तूर, कलिलो मूला, वेतको टुसा, आषाढफल, अनार, सिधे नुन, त्रिफला, कुवाको पानी, कपूर, कस्तूरी, हिमकण/कपूर, तितो, टर्रो र तेल यति शूकदोष हुने व्यक्तिका लागि पथ्य हुन्छन् ॥१-३॥

शूकदोषेऽपथ्यानि–

मूत्रवेगं दिवानिद्रां व्यायामं मैथुनं गुडम् ।
विदाहि गुरु तक्रं च शूकदोषी परित्यजेत्[२७८] ॥४॥

अन्वयः

शूकदोषी मूत्र-वेगम्, दिवा-निद्राम्, व्यायामम्, मैथुनम्, गुडम्, विदाही, गुरु, तक्रं च परित्यजेत् ॥४॥

भावार्थः

शूकदोष भएको व्यक्तिले मूत्रको वेग धारण, दिवाशयन, व्यायाम, मैथुन, गुड, विदाही आहारविहार, गुरु या भारी अन्नपान र मही यति अपथ्यलाई परित्याग गर्नुपर्दछ ॥४॥

इति शूकदोषे पथ्यापथ्यविधिः ॥४५॥
यति शूकदोषमा अपनाउनुपर्ने पथ्यापथ्यविधिवारे बताइयो ॥४५॥

◆◆◆

२७६ लेपो विसेकोऽसृङ्मोक्षः इति पाठान्तरम् ।
२७७ वचा, श.क.द्रु. ।
२७८ शूकदोषामयी त्यजेत्, भै.र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

४६
अथ कुष्ठरोगे पथ्यापथ्यविधिः

कुष्ठरोगे पथ्यानि–

पक्षात्पक्षाच्छर्दनानि मासान्मासाद् विरेचनम् ।
नस्यं त्र्यहात् त्र्यहान्मासात् षष्ठे षष्ठेऽस्रमोक्षणम् ॥१॥
सर्पिर्लेपश्चिरोत्पन्ना यवगोधूमशालयः ।
मुद्गाढकीमसूराश्च माक्षिकं जांगलामिषम् ॥२॥
आषाढफलवेत्राग्रं पटोलं बृहतीफलम् ।
काकमाची निम्बपत्रं लशुनं हिलमोचिका ॥३॥
पुनर्नवा मेषश्रृंगी चक्रमर्ददलानि च ।
भल्लातकं पक्वतालं खदिरश्चित्रको वरा[२७९] ॥४॥
जातीफलं नागपुष्पं कुंकुमं प्रतनं हविः ।
कोशातकी करञ्जो वा तिलसर्षपनिम्बजम् ॥५॥
तैलं तथेंगुदोत्थं च लघून्यन्यानि यानि च ।
स्नेहाः सरलदेवाह्वशिंशपागुरुसंभवाः ॥६॥
मूत्राणि गोखरोष्ट्राश्वमहिषीजनितानि च ।
कस्तूरिका गन्धसारस्तिक्तानि क्षारकर्म च ॥७॥
यथादोषं समस्तानि पथ्यान्येतानि कुष्ठिनाम् ॥७.५॥

अन्वयः

पक्षात्पक्षात् छर्दनानि, मासात् मासाद् विरेचनम्, त्र्यहात् त्र्यहात् नस्यम्, मासात् षष्ठे षष्ठेऽस्रमोक्षणम्। सर्पिः लेपः चिरोत्पन्ना यव-गोधूम-शालयः, मुद्गा-ऽऽढकी-मसूराश्च, माक्षिकम्, जांगलामिषम्, आषाढफल-वेत्राग्र-पटोलम्, बृहतीफलम्, काकमाची, निम्बपत्रम्, लशुनम्, हिलमोचिका, पुनर्नवा, मेषश्रृंगी, चक्रमर्ददलानि च, भल्लातकम्, पक्वतालम्, खदिरः, चित्रकः, वरा, जातीफलम्, नागपुष्पम्, कुंकुमम्, प्रतनं हविः, कोशातकी, करञ्जो वा, तिल-सर्षप-निम्बजं तथेंगुदोत्थं च तैलम्, लघून्यन्यानि यानि च, स्नेहाः सरल-देवाह्व-शिंशपा-ऽगुरुसम्भवाः, गो-खरो-ष्ट्रा-ऽश्व-महिषी-जनितानि मूत्राणि च, कस्तूरिका, गन्धसारः, तिक्तानि, क्षारकर्म च, यथादोषं एतानि समस्तानि पथ्यानि कुष्ठिनाम् (भवन्ति) ॥१-७.५॥

---

२७९ खदिरश्चित्रको वरः इति पाठान्तरम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भावार्थः

पन्ध्रपन्ध्र दिनमा वमन, महिनामहिनामा विरेचन, तीनतीन दिनमा नस्य र छ-छ महिनामा रक्तमोक्षण कुष्ठरोगीका लागि आवश्यक हुन्छ । घिउ, लेप, पुराना जौ, गहुँ र शालि-धान; मूंगी, अरहर र मुसुरोको दाल; मह, जागल पशुपक्षीको मासु, आषाढफल, वेतका टुसा, परवर, बिर्हीं, कबई, निमका पात, लशुन, हिलमोचिका (हुहुरे)[२८०]; पुनर्नवा, अजश्रृंगी, चक्रमर्द (टाप्रे) का पात; भलायो, पाकेको ताड, खयर, चित्रक, त्रिफला, जाईफल, नागपुष्प, केशर, नियमित घृतको सेवन, घिरौंला, करञ्ज; तिल, सर्स्यूं, निम र इंगुदी (चिउली/चिउरी)को तेल; अरू हलुका खालका तेल; सल्लो, देवदारु, शिसौ, अगुरुबाट निकालिएका तैलीय स्नेह; गाई, गदहा, ऊँट, घोडा र भैंसीको मूत्र; कस्तूरी, कपूर, तिता वस्तुहरू र क्षारकर्म यी सबै कुष्ठरोगीहरूका लागि पथ्य हुन्छन् ॥१-७.५॥

कुष्ठरोगेऽपथ्यानि–

स्वेदं व्यवायं वमिवेगमिक्षुं व्यायाममम्लानि तिलांश्च माषान् ॥
आनूपमांसं दधिदुग्धमद्यं गुडं च कुष्ठामयिनस्त्यजेयुः ॥८॥[२८१]

अन्वयः

कुष्ठामयिनः स्वेदम्, व्यवायम्, वमिवेगम्, इक्षुम्, व्यायामम्, अम्लानि, तिलांश्च, माषान्, आनूपमांसम्, दधिदुग्धमद्यम्, गुडं च त्यजेयुः ॥८॥

भावार्थः

कुष्ठरोगीले स्वेदन, मैथुन, वमनको वेग धारण, उखु, व्यायाम, अमिलो, तिल, माष, आनूपमांस, दही, दुध र मद्य त्याग्नुपर्दछ ॥८॥

इति कुष्ठरोगे पथ्यापथ्यविधिः ॥४६॥
यति कुष्ठरोगमा अपनाउनुपर्ने पथ्यापथ्यविधिबारे बताइयो ॥४६॥

◆◆◆

---

२८० वास्तुक, बेथे – कोषनाथ देवकोटा, नेपाली निघण्टु ।

२८१ पापानि कर्माणि कृतघ्नभावं निन्दां गुरूणां गुरुधर्षणं च । विरुद्धपानाशनमह्निनिद्रां चण्डांशुतापं विषमाशनं च ॥ स्वेदं रतं वेगनिरोधमिक्षुं व्यायाममम्लानि तिलांश्च माषान् । द्रवान्नगुर्वान्ननवान्नभुक्तं विदाहि विष्टम्भि च मूलकानि ॥ सह्याद्रिविन्ध्याद्रिसमुद्भवानां तरंगिणीनामुदकानि चापि । आनूपमांसं दधिदुग्धमद्यं गुडं च कुष्ठामयिनस्त्यजेयुः ॥– भै.र. ॥ श.क.द्रु. च ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

४७
अथ शीतपित्तोदर्दकोठे पथ्यापथ्यविधिः

शीतपित्तोदर्दकोठे पथ्यानि–

छर्दिर्विरेचनं लेपोऽसृङ्मोक्षो जीर्णशालयः।
जांगलैणामिषैर्मुद्गैः कुलत्थैर्वा कृतो रसः ॥१॥
कर्कोटकं कारवेल्लं शिग्रुमूलकपोतिकाः।
शालिञ्चशाकं वेत्राग्रं दाडिमं त्रिफला मधु ॥२॥[२८२]
कटुतैलं तप्तनीरं पित्तश्लेष्महराणि च।
कटुतिक्तकषायाणि सर्वाणीतिगणः सखा ॥३॥
शीतपित्तोदर्दकोठरोगिणां स्याद्यथामलम् ॥३.५॥

अन्वयः

छर्दिः, विरेचनम्, लेपः, असृङ्मोक्षः, जीर्णशालयः, जांगलैणामिषैर्मुद्गैः कुलत्थैर्वा कृतो रसः, कर्कोटकम्, कारवेल्लम्, शिग्रु-मूलक-पोतिकाः, शालिञ्चशाकम्, वेत्राग्रम्, दाडिमम्, त्रिफला, मधु, कटुतैलम्, तप्तनीरम्, पित्तश्लेष्महराणि च, कटुतिक्तकषायाणि सर्वाणि इति गणः यथामलं शीतपित्तो-दर्द-कोठ-रोगीणां सखा स्यात् ॥१-३.५॥

भावार्थः

वमन, विरेचन, लेप, रक्तमोक्षण, जीर्ण शालीधान, जांगल मृग-पक्षीको मांस र मूंगी, गहत पकाएर बनाएको रस, कर्कोटक, तिते करेला, सहिजन, पतूरको साग, वेतका टुसा, अनार, त्रिफला, मह, तोरी-सर्स्यूको तेल, तातो पानी, पित्तकफनाशक र कटुतिक्तकषायरसभएका खानेकुराहरू यी सबै दोष र अवस्था अनुसार शीतपित्त, उदर्द र कोठ रोग भएका व्यक्तिहरूका लागि साथीजस्तै हितकारक हुन्छन् ॥१-३.५॥

---
२८२ एतत्पर्यन्तमेव भै.र. पठति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शीतपित्तोदर्दकोठेऽपथ्यानि–

क्षीरेक्षुजाता विविधा विकाराः मत्स्यौदकानूपभवामिषाणि ।

नवीनमद्यं वमिवेगधारणम्[२८३] प्राग्दक्षिणाशापवनोऽन्हिनिद्रा ॥४॥

स्नानं विरुद्धाशनमातपञ्च स्निग्धं तथाम्लं मधुरं व्यवायः ।

गुर्वन्नपानानि च शीतपित्त–कोठामयोदर्दवतां विषाणि ॥५॥

अन्वयः

क्षीरे-क्षु-जाता विविधा विकाराः, मत्स्यौ-दका-ऽऽनूपभवा-मिषाणि, नवीन-मद्यम्, वमिवेग-धारणम्, प्राग्दक्षिणाशापवनः, अह्निनिद्रा, स्नानम्, विरुद्धाशनम्, आतपञ्च, स्निग्धम्, तथाम्लम्, मधुरम्, व्यवायः, गुर्वन्नपानानि च शीतपित्त-कोठामयो-दर्द-वतां विषाणि ॥४-५॥

भावार्थः

दुध र उखुबाट बनेका विविध परिकार, माछा आदि औदक र आनूप वर्गका मांसपरिकार, नयाँ मद्य, वमनको वेग धारण गर्नु, पूर्व र दक्षिण दिशाको वायु, दिनमा सुत्नु, स्नान, विरुद्धभोजन, घाम ताप्नु, स्निग्धपदार्थ, अमिलो, गुलियो, मैथुन, भारी वा गरिष्ठभोजन र पेय यी शीतपित्त, कोठ र उदर्द भएका विरामीहरूका लागि विषसरह हुन्छन् ॥४-५॥

इति शीतपित्तोदर्दकोठे पथ्यापथ्यविधिः ॥४७॥

यति शीतपित्त-उदर्द-कोठरोगमा अपनाउनुपर्ने पथ्यापथ्यबारे बताइयो ॥४७॥

◆◆◆

२८३ वमिवेगरोधः, भै.र. । श.क.द्रु. च ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

४८
अथाम्लपित्ते पथ्यापथ्यविधिः

अम्लपित्ते पथ्यानि–

ऊर्ध्वगे वमनं पूर्वमधोगे च विरेचनम्।
सर्वत्रान्वासनं[२८४] पश्चाद् निरूहश्चापि शालयः ॥१॥
यवगोधूममुद्गाश्च पुराणा जांगला रसाः।
जलानि तप्तशीतानि शर्करा मधुशक्तवः ॥२॥
कर्कोटकं कारवेल्लं पटोलं हिलमोचिका।
वेत्राग्रं वृद्धकुष्माण्डं रम्भापुष्पं च वास्तुकम् ॥३॥
कपित्थं दाडिमं धात्री तिक्तानि सकलानि च।
पानान्नानि समस्तानि कफपित्तहराणि च ॥४॥
अम्लपित्तामये नित्यं सेवितव्यानि मानवैः ॥४.५॥

अन्वयः

पूर्वम्, ऊर्ध्वगे वमनम्, अधोगे च विरेचनम्, सर्वत्रान्वासनं पश्चाद् निरूहश्चापि। शालयः, यव-गोधूम-मुद्गाश्च पुराणाः, जांगला रसाः, तप्तशीतानि जलानि, शर्करा, मधुशक्तवः, कर्कोटकम्, कारवेल्लम्, पटोलम्, हिलमोचिका, वेत्राग्रम्, वृद्धकुष्माण्डम्, रम्भापुष्पं च, वास्तुकम्, कपित्थम्, दाडिमम्, धात्री, तिक्तानि सकलानि च, समस्तानि कफपित्तहराणि पानान्नानि च अम्लपित्तामये मानवैः नित्यं सेवितव्यानि ॥१-४.५॥

भावार्थः

पहिले ऊर्ध्वभागको अम्लपित्त भए वमन गराउनुपर्दछ, अधोभागको अम्लपित्त भए विरेचन गराउनुपर्दछ र यदि सबै भाग वा उभयभागको अम्लपित्त भए अनुवासन वस्ति दिएर त्यसपछि निरूह वस्ति पनि दिनुपर्दछ। पुरानो शालीधान, जौ, गहुँ, मूंग; जांगल पशुपक्षीको मांसरस, तताएर सेलाएको पानी, सख्खर, मह, सातू; कर्कोटक, कारवेल्ल, पटोल, हिलमोचिका (हुहुरे), वेत्राग्र, वृद्धकुष्माण्ड, कदलीपुष्प, वास्तुक, कपित्थ, दाडिम, आमलकी; सबै खालका तिता खानेकुराहरू, कफपित्तनाशक अन्नपान यी सबैलाई अम्लपित्तरोग लागेका मानिसले नित्य सेवन गर्नुपर्दछ ॥१-४.५॥

---

२८४ सर्वत्र शस्यते, भै.र.। सर्वत्रान्नाशनम्, श.क.द्रु.।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अम्लपित्तेऽपथ्यानि

[२८५]**वमिवेगं तिलान् माषान् कुलत्थांस्तैलभक्षणम् ॥५॥**

अविदुग्धं च धान्याम्लं[२८६] लवणाम्लकटूनि च ।

गुर्वन्नं दधि मत्स्यञ्च वर्जयेदम्लपित्तवान् ॥६॥

अन्वयः

अम्लपित्तवान् वमिवेगम्, तिलान्, माषान्, कुलत्थान्, तैलभक्षणम्, अविदुग्धम् च, धान्याम्लम्, लवणाऽम्ल-कटूनि च, गुर्वन्नम्, दधि, मत्स्यञ्च वर्जयेत् ॥५-६॥

भावार्थः

अम्लपित्तरोगीले वमनको वेग, तिल, मास, गहत, तैलभक्षण– तेल पिउनु र तैलमा बनाइएका परिकार खानु, भेडाको दुध, धान्याम्ल, नुनिलो, अमिलो, पिरो, गरिष्ठभोजन, दही, माछा यी सबै अपथ्यलाई परहेज गर्नुपर्दछ ॥५-६॥

इत्यम्लपित्ते पथ्यापथ्यविधिः ॥४८॥

यति अम्लपित्तरोगमा अपनाउनुपर्ने पथ्यापथ्यविधिबारे बताइयो ॥४८॥

◆◆◆

२८५ नवान्नानि विरुद्धानि पित्तकोपकराणि च । भै.र., श.क.द्रु. च ।

२८६ अविदुग्धं वचा धान्या, पाठान्तरम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

४९
अथ विसर्परोगे पथ्यापथ्यविधिः

विसर्परोगे पथ्यानि–

विरेको वमनं लेपो लंघनं रक्तमोक्षणम् ।
पुराणयवगोधूमकंगुषष्ठिकशालयः ॥१॥[२८७]
मुद्गाः मसुराश्चणकास्तुवर्यो जांगलो रसः ।
नवनीतं घृतं द्राक्षा दाडिमं कारवेल्लकम् ॥२॥
वेत्राग्रं कुलकं धात्री खदिरो नागकेशरम् ।
लाक्षा शिरीषः कर्पूरं चन्दनं तिललेपनम् ॥३॥[२८८]
यथादोषं पथ्यमिदं सेवितव्यं विसर्पिभिः ॥३.५॥

अन्वयः

विरेकः, वमनम्, लेपः, लंघनम्, रक्तमोक्षणम्, पुराणयवगोधूमकंगुषष्टिकशालयः, मुद्गाः, मसुराः, चणकाः, तुवर्यः, जांगलो रसः, नवनीतम्, घृतम्, द्राक्षा, दाडिमम्, कारवेल्लकम्, वेत्राग्रम्, कुलकम्, धात्री, खदिरः, नागकेशरम्, लाक्षा, शिरीषः, कर्पूरम्, चन्दनम्, तिललेपनम् विसर्पिभिः यथादोषं इदं पथ्यं सेवितव्यम् ॥१-३.५॥

भावार्थः

विरेचन, वमन, लेप, लंघन, रक्तमोक्षण; पुराना जौ गहुँ, कागुनू, सठिया, मार्सी धान; मूंगी, मुसुरो, चना, अरहर; जांगल पशुपक्षीको मांसरस; नौनी, घिउ, दाख, दाडिम, करेलो, वेतका टुसा, कुलक (परवर), अमला, खयर, नागकेशर, लाहा, शिरीष, कपूर, चन्दन, तिलको लेप यी सबैलाई विसर्परोगीले दोषको अवस्थानुसार पथ्यको रूपमा सेवन गनुपर्दछ ॥१-३.५॥

---

२८७ एतन्न पठति भै.र. ।

२८८ तिलचन्दनलेपनमिति भै.र. । इतः परम्– रक्तशुद्धिकरं तिक्तं पानान्नविदाहि च । अनुद्वेगकरं यत्स्यात् तच्च सेव्यं विसर्पिभिः ॥ च पठति भैषज्यरत्नावली ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विसर्परोगेऽपथ्यानि–

व्यायाममन्हिशयनं सुरतं प्रवातं क्रोधं शुचं वमनवेगमसूयनं च ॥

शाकं विरुद्धमशनं दधिकूर्चिकाञ्च सौवीरमासुतमनेकविधं किलाटम् ॥४॥[२८९]

गुर्वन्नपानमखिलं लशुनं कुलत्थान् माषांस्तिलान् सकलमांसमजांगलञ्च ॥

स्वेदं विदाहि लवणाम्लकटूनि मद्यमर्कप्रभामपि विसर्पगदी त्यजेत्तु ॥५॥

अन्वयः

व्यायामम्, अन्हि-शयनम्, सुरतम्, प्रवातम्, क्रोधम्, शुचम्, वमन- वेगम्, असूयनं च, शाकम्, विरुद्धमशनम्, दधिकूर्चिकाञ्च, सौवीरम्, आसुतम्, अनेकविधं किलाटम्, गुर्वन्नपानमखिलम्, लशुनम्, कुलत्थान्, माषान्, तिलान्, अजांगलं सकलमांसञ्च, स्वेदम्, विदाहि, लवणा-ऽम्ल-कटूनि, मद्यम्, अर्कप्रभामपि विसर्पगदी तु त्यजेत् ॥४-५॥

भावार्थः

व्यायाम, दिवाशयन, मैथुन, ज्यादा हवाको सेवन, क्रोध, शोक, वमनको वेगधारण, ईर्ष्या/निन्दा गर्नु, सागपात, विरुद्धभोजन, दधिकूर्च (दही हालेर तताएको दुध), सौवीर, आसुत (आसव), किलाट (पनीर/बिगौति) गरिष्ठ अन्नपान, लशुन, गहत, माष, तिल, जांगल बाहेक अर्थात् आनूप र ग्राम्य मांस, स्वेदन, विदाही, नुनिलो, अमिलो, पिरो, मद्य र सूर्यकिरणको सेवन यी सबैलाई विसर्परोगीले त्याग गर्नुपर्दछ ॥४-५॥

इति विसर्परोगे पथ्यापथ्यविधिः ॥४९॥

यति विसर्परोगमा अपनाउनुपर्ने पथ्यापथ्यविधि बताइयो ॥४९॥

◆◆◆

२८९ भैषज्यरत्नावलीतः गृहित्वा परिपूरितम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

५०
अथ विस्फोटे पथ्यापथ्यविधिः

विस्फोटे पथ्यानि–

विरेचनं छर्दनलेपलंघनं पुरातनाः षष्टिकशालयो यवाः ॥

मुद्गाः मसूराश्चणकाः मकुष्ठका धन्वामिषं गव्यघृतं कठिल्लकम् ॥१॥

वेत्राग्रमाषाढफलं पटोलकं ज्योतिष्मतीनिम्बदलानि चन्दनम् ॥

तैलं सिताभ्रं तिललेपनं घनं बालं च विस्फोटगदं विनाशयेत् ॥२॥[२९०]

अन्वयः

विरेचनम्, छर्दन-लेप-लंघनम्, पुरातनाः षष्टिक-शालयो यवाः, मुद्गाः, मसूराः, चणकाः, मकुष्ठकाः, धन्वामिषम्, गव्यघृतम्, कठिल्लकम्, वेत्राग्रम्, आषाढफलम्, पटोलकम्, ज्योतिष्मती-निम्बदलानि, चन्दनम्, तैलम्, सिताभ्रम्, तिललेपनम्, घनं बालं च विस्फोटगदं विनाशयेत् ॥१-२॥

भावार्थः

विरेचन, वमन, लेप, लंघन; पुराना सठिया, मार्सी धान, जौ, मूंग, मुसुरो, चना, मोठ; घन्वमांस, गाईको घिउ, तिते करेलो, वेतका टुसा, आषाढफल, परवर, ज्योतिष्मती, निम्बपत्र, चन्दन, तिलको तेल, सिताभ्र (कपूर), तिलको लेप र घना (मुस्तक) बाल (सुगन्धवाल) यी सबैले विस्फोटरोगलाई नाश गर्दछन् ॥१-२॥

विस्फोटेऽपथ्यानि–

स्वेदं व्यवायं व्यायामं क्रोधं गुर्वन्नमातपम् ।

वमिवेगं पत्रशाकं प्रवातं शयनं दिवा ॥३॥

ग्राम्यौदकानूपमांसं विरूरुद्धान्यशनानि च ।

तिलान् माषान् कुलत्थांश्च लवणाम्लगुरूणि च ॥४॥[२९१]

विदाहि रुक्षमुष्णञ्च विस्फोटी सम्परित्यजेत् ॥४.५॥[२९२]

---

२९० तथा च– जीर्णशालिर्यवो मुद्गो मसूरश्चाढकी तथा । एतान्यन्नानि विस्फोटे हितानि मुनयोऽब्रुवन् ॥ भै.र. ।

२९१ लवणाम्लकटूनि च, भै.र. । श.क.द्रु. च ।

२९२ परिवर्जयेत्, भै.र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अन्वयः

स्वेदम्, व्यवायम्, व्यायामम्, क्रोधम्, गुर्वन्नम्, आतपम्, वमिवेगम्, पत्रशाकम्, प्रवातम्, शयनं दिवा, ग्राम्यौदकानूपमांसम्, विरुद्धान्यशनानि च, तिलान्, माषान्, कुलत्थांश्च, लवणाम्लगुरूणि च, विदाहि रुक्षमुष्णञ्च विस्फोटी सम्परित्यजेत् ॥३-४.५॥

भावार्थः

स्वेदन, मैथुन, व्यायाम, क्रोध, गरिष्ठभोजन, घामको राप, वमनको वेगधारण, पात भएका साग, धेरै हावा खानु, दिउसो सुत्नु, ग्राम्य-औदक-आनूप मांसरस, विरुद्धभोजन, तिल, माष, गहत, नुनिलो र अमिलो तथा भारी खानेकुराहरू, विदाही र रुखो एवं उष्ण खानेकुरा यी सबैलाई विष्फोटरोगीले परित्याग गर्नुपर्दछ ॥३-४.५॥

इति विस्फोटे पथ्यापथ्यविधिः ॥५०॥

यति विस्फोटरोगमा अपनाउनुपर्ने पथ्यापथ्यविधिबारे बताइयो ॥५०॥

◆◆◆

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

५१

अथ मसूरीगदे पथ्यापथ्यविधिः

मसूर्यां पथ्यानि–

पूर्वं लंघनवान्तिरेचनशिरावेधाः शशांकोज्ज्वलाः।
जीर्णा पष्टिकशालयोऽपि चणकाः मुद्गाः मसूराः यवाः ॥
सर्वेऽपि प्रतुदाः कपोतचटका ये पृष्टदात्यूहकाः।
जीवञ्जीवशुकादयोऽपि कुलकं[२९३] काठिल्लमाषाढकम् ॥१॥
कर्कोटं कदलं च शिग्रु रुचकं द्राक्षाफलं दाडिमम्।
मेध्यं बृंहणमन्नपानमखिलं कोलानि माषो रसः ॥
अक्ष्णोः सेकविधौ गवेधुमधुकोद्भूतं सुशीतोदकम्।
शम्बूकोदरकोषनीरमपि वा कर्पूरचूर्णानि वा ॥२॥
पक्वे मुद्गरसोऽपि जांगलरसः शालिञ्चशाकं घृतम्।
धूपो गोमयभस्मगुण्ठनमथो शेषे व्रणोक्ताः क्रियाः ॥[२९४]
इत्थं सर्वदशाविभागसहितं पथ्यं यथादोषतः।
संयुक्तं सुखमातनोति नितरां नृणां मसूरीगदे ॥३॥[२९५]

अन्वयः

पूर्वंम् लघन-वान्ति-रेचन-शिरावेधाः, शशांकोज्ज्वलाः जीर्णाःषष्टिक-शालयोऽपि, चणकाः, मुद्गाः मसूराः यवाः।

सर्वेपि प्रतुदाः कपोतचटका ये पृष्टदात्यूहकाः, जीवञ्जीवशुकादयोपि, कुलकम्, काठिल्ल-माषाढकम्, कर्कोटम्, कदलं च, शिग्रु, रुचकम्, द्राक्षाफलम्, दाडिमम्।

मेध्यं बृंहणमन्नपानमखिलम्, कोलानि, माषः, रसः, अक्ष्णोः सेकविधौ, गवेधु-मधुकोद्भूतं सुशीतोदकम्, शम्बूकोदरकोषनीरमपि वा, कर्पूरचूर्णानि वा।

---

२९३ कुललम्, भै.र.,

२९४ निर्गुण्डीदलयक्षधूपविहितो धूपो मृदुर्युक्तितः। शश्वद् गोमयभस्म गुग्गुलुमथो शुष्के शिलपिष्टयोरालेपः पिचुमर्दपत्रनिशयोः शेषे व्रणोक्ताः क्रियाः। भै.र., श.क.द्रु.।

२९५ घण्टाकर्णं शिवं गौरीं विष्णुं विप्रञ्च पूजयेत्। आचारजपहोमादीन् व्रतं रोगहरं तथा॥ अगदानि विषघ्नानि रत्नानि विविधानि च। धारयेद् व चयेच्चापि वैनतेयस्य संहिताम्॥ विषघ्नैः सिद्धमन्त्रैश्च प्रमृज्यात्तु पुनः पुनः। युक्त्या पठेत्पाठयेच्च शीतलायाः स्तवं शुभम्॥ इति भैषज्यरत्नावली। अत्र प्रसंगात् शीतलास्तोत्रमप्युद्धृतं दृश्यते। तद्यथा– अथ शीतलास्तोत्रम्। स्कन्द उवाच- भगवन् देवदेवेश शीतलायाः स्तवं शुभम्। वक्तुमर्हस्यशेषेण विस्फोटकभयापहम्॥ ईश्वर उवाच- वन्देऽहं शीतलादेवीं रासभस्थां दिगम्बरीम्। यामासाद्य निवर्त्तेत विस्फोटकभयं महत्॥ शीतले शीतले चेति यो ब्रूयाद् दाहपीडितः। विस्फोटकभयं घोरं क्षिप्रं तस्य प्रणस्यति॥ यस्तामुदकमध्ये तु धृत्वा सम्पूजयेन्नरः। विस्फोटकभयं घोरं कुले तस्य न जायते॥ शीतले ज्वरदग्धस्य पूतिगन्धगतस्य च। प्रणष्टचक्षुषः पुंसस्त्वामाहुर्जीवितौषधम्॥ नमामि शीतलां देवीं रासभस्थां दिगम्बरीम्। मार्जनीकलशोपेतां सूर्पालंकृतमस्तकाम्॥ अस्य श्रीशीतलास्तोत्रस्य महादेवऋषिरनुष्टुप्छन्दः श्रीशीतलादेवता शीतलोपद्रवशान्त्यर्थं जपे विनियोगः। शीतले तनुजान् रोगान् नृणां हरसि दुस्तरान्। विस्फोटकविशीर्णानां त्वमेकामृतवर्षिणी॥ गलगण्डग्रहा रोगा ये चान्ये दारुणा नृणाम्। त्वदनुध्यानमात्रेण शीतले यान्ति ते क्षयम्॥ न मन्त्रं नौषधं किञ्चित् पापरोगस्य विद्यते। त्वमेका शीतले धात्रि नान्यां पश्यामि देवताम्॥ मृणालतन्तुसदृशीं नाभिहृन्मध्यसंस्थिताम्। यस्त्वां सञ्चिन्तयेद्देवि! तस्य मृत्युर्न जायते॥ अष्टकं शीतलादेव्या यः पठेन्मानवः सदा। विस्फोटकभयं घोरं कुले तस्य न जायते॥ श्रोतव्यं पठितव्यञ्च नरैर्भक्तिसमन्वितैः। उपसर्गविनाशाय परं स्वस्त्ययनं महत्। शीतलाष्टकमेतद्धि न देयं यस्य कस्यचित्। किन्तु तस्मै प्रदातव्यं भक्तिश्रद्धान्वितो हि यः॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पक्वे मुद्गरसोऽपि, जांगलरसः, शालिञ्चशाकम्, घृतम्, धूपः, गोमयभस्मगुण्ठनम्, अथो शेषं व्रणोक्ताः क्रियाः ।

इत्थं यथादोषतः सर्वदशाविभागसहितं मसूरीगदे संयुक्तं पथ्यं नितरां नृणां सुखमातनोति ॥१-३॥

भावार्थः

मसूरीरोगमा पहिले लंघन, वमन, विरेचन, शिरावेध गर्नुपर्छ। चन्द्रकिरणले समुज्वल भएका वा चन्द्रजस्तै स्वच्छ सेतो वर्णका पुराना सठिया र मार्सीधान (षष्टिकशाली), चना, मूंगी, मुसुरो, जौ, सबै किसिमका प्रतुद[२९६] पक्षी, परेवा, भँगेरा, सिमसार या जलीय क्षेत्रमा बस्ने दात्यूह[२९७] काग, जीवञ्जीवनामक चकोरपक्षी (च्याखुरा)[२९८], सुघा आदि, कुलक (परवर), तितेकरेला/पुनर्नवा, आषाढफल, कर्कोट, केरा, सहिजन, रुचकलवण, दाख, अनारको पथ्य दिनुपर्दछ।

मेध्य र बृंहण गुण भएका अन्नपानहरू, बयर, मासको दाल, मांसरस, आँखामा सेक लगाउनु, गवेधुक (एक किसिमको क्षुद्रधान्य) र मधुक (महुवा)बाट तयार गरिएको सुशीतल जल, नरिवलको पानी, कपूरको धुलोलाई पथ्यको रूपमा लिन सकिन्छ।

पक्वावस्थामा मूंगको रस, जांगल मांसरस, शालिञ्चशाक, घिउ, धूपन, गोमयभस्मको लेपन र व्रणोपचारका क्रिया गर्नुपर्दछ।

यसरी दोषको अवस्थानुसार सबै दोषको विभागसहित मसूरीरोगका लागि संयोजन गरिएका पथ्यलाई अपनाएमा मानिसहरूलाई सुख मिल्नेछ ॥१-३॥

मसूर्यामपथ्यानि–

रतं स्वेदं श्रमं तैलं गुर्वन्नं क्रोधमातपम्।
कट्वम्लं वेगरोधं च मसूरीगदवांस्त्यजेत् ॥४॥[२९९]

अन्वयः

रतम्, स्वेदम्, श्रमम्, तैलम्, गुर्वन्नम्, क्रोधम्, आतपम्, कट्वम्लम्, वेगरोधं च, मसूरी-गदवान् त्यजेत् ॥४॥

भावार्थः

मैथुन, स्वेदन, परिश्रम, तिलको तेल, गरिष्ठभोजन, क्रोध, घाम, पिरो-अमिलो र वेगधारण मसूरी रोग लागेका व्यक्तिले त्याग गर्नुपर्दछ ॥४॥

इति मसूरीगदे पथ्यापथ्यविधिः ॥५१॥

यति मसूरीरोगमा अपनाउनुपर्ने पथ्यापथ्यविधिबारे बताइयो ॥५१॥

◆◆◆

---

२९६ पारावतः खञ्जरीटः पिकाद्याः प्रतुदाः स्मृताः। प्रतुद्य भक्षयन्त्येते तुण्डेन प्रतुदास्ततः ॥ – भावप्रकाशनिघण्टु। परेवा, सुघा आदि चुच्चाले ठुंगेर खानेकुरालाई फोरेर खाने पक्षीहरू प्रतुदवर्गका प्राणी हुन्।

२९७ दात्यूहः कालकण्ठकः इत्यमरकोषः।

२९८ जीवञ्जीवश्चकोरकः इत्यमरकोषः।

२९९ दुष्टाम्बु दुष्टपवनो विरुद्धान्यशनानि च। निष्पावमालुकं शाकं लवणं विषमाशनम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

५२
अथ क्षुद्ररोगे पथ्यापथ्यविधिः

क्षुद्ररोगे पथ्यापथ्यानि–

क्षुद्ररोगेषु सर्वेषु नानारोगानुकारिषु ।
दोषान् दूष्यान्नवस्थाञ्च निरीक्ष्य मतिमान्नरः ॥१॥[३००]
तस्य तस्य च रोगस्य पथ्यापथ्यानि सर्वशः ।
यथादोषं यथादूष्यं यथावस्थाञ्च कल्पयेत् ॥२॥[३०१]

अन्वयः

नानारोगानुकारिषु सर्वेषु क्षुद्ररोगेषु मतिमान्नरः दोषान् दूष्यान्नवस्थाञ्च निरीक्ष्य तस्य तस्य च रोगस्य सर्वशः यथादोषं यथादूष्यं यथावस्थाञ्च पथ्यापथ्यानि कल्पयेत् ॥१-२॥

भावार्थ

नाना किसिमका पीडा र रोग गराउने सबै क्षुद्ररोगमा बुद्धिमान् मानिसले दोष, दूष्य र अवस्था निरीक्षण गरेर तत्तद् क्षुद्ररोगको समग्र रूपमा दोष अनुसार, दूष्य अनुसार र अवस्था अनुसार पथ्यापथ्य कल्पना गर्नुपर्दछ ॥१-२॥

इति क्षुद्ररोगे पथ्यापथ्यविधिः ॥५२॥

यति क्षुद्ररोगमा अपनाउनुपर्ने पथ्यापथ्यविधिबारे बताइयो ॥५२॥

◆◆◆

---

३०० मतिमान् भिषक्, भै.र. ।

३०१ यथादोषं यथादुष्टं यथादृष्टञ्च कल्पयेत् । श.क.द्रु. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

५३
अथ मुखरोगे पथ्यापथ्यविधिः

मुखरोगे पथ्यानि–

स्वेदो विरेको वमनं गण्डूषः प्रतिसारणम् ।
कवलोऽसृक्स्रुतिर्नस्यं धूमः शस्त्राग्निकर्मणी ॥१॥
तृणधान्यं यवाः मुद्गाः कुलत्था जांगलो रसः ।
बहुपुत्री[३०२] कारवेल्लं पटोलं बालमूलकम् ॥२॥
कपूरनीरं ताम्बूलं तप्ताम्बु खदिरो घृतम् ।
कटुतिक्तं च वर्गोऽयं मित्रं स्यान्मुखरोगिणाम् ॥३॥

अन्वयः

स्वेदः, विरेकः, वमनम्, गण्डूषः, प्रतिसारणम्, कवलः, असृक्स्रुतिः, नस्यम्, धूमः, शस्त्राग्निकर्मणी, तृणधान्यम्, यवाः, मुद्गाः, कुलत्थाः, जांगलो रसः, बहुपुत्री, कारवेल्लम्, पटोलम्, बालमूलकम्, कर्पूरनीरम्, ताम्बूलम्, तप्ताम्बु, खदिरः, घृतम्, कटुतिक्तं च अयं वर्गः मुखरोगिणां मित्रं स्यात् ॥१-३॥

भावार्थ

स्वेदन, विरेचन, वमन, गण्डूष, प्रतिसारण, कवलधारण, रक्तस्रावण, नस्य, धूमपान, शस्त्रकर्म, अग्निकर्म, तृणधान्य कोदो, कागुनो आदि, जौ, मूंग, गहत, जांगल पशुपक्षीको मांसरस, बहुपुत्री (शतावरी), तिते करेलो, परबर, कलिलो मूला, कपूरपानी, पान, तातो पानी, खयर, घृत, कटु र तिक्त रसका द्रव्य यो वर्ग मुखरोगीहरूका लागि मित्र वा पथ्य हुन्छ ॥१-३॥

३०२ वृहत्प्रोष्ठी, श.क.द्रु. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मुखरोगेऽपथ्यानि–

दन्तकाष्ठं स्नानमम्लं मत्स्यं चानूपमामिषम् ।
दधिक्षीरं गुडं माषं रुक्षान्नं कठिनाशनम् ॥४॥
अधोमुखेन शयनं गुर्वभिष्यन्दकारि च ।
मुखरोगेषु सर्वेषु दिवानिद्रां च वर्जयेत् ॥५॥

अन्वयः

दन्तकाष्ठम्, स्नानम्, अम्लम्, मत्स्यम्, चानूपमामिषम्, दधि-क्षीरम्, गुडम्, माषम्, रुक्षान्नम्, कठिनाशनम्, अधोमुखेन शयनम्, गुर्वभिष्यन्दकारि च, दिवानिद्रां च सर्वेषु मुखरोगेषु वर्जयेत् ॥४-५॥

भावार्थ

दन्तकाष्ठ, स्नान, अमिलो, माछा, आनूपमांस, दही-दुध, सख्खर, मास, रुखो अन्न, कठिन खानेकुराहरू (चिउरा, भुटेको बकुल्लाजस्ता चपाउन गाह्रो र दरफन्याउने खालका खानेकुराहरू), घोप्टो परेर सुत्नु, गरिष्ठ र अभिष्यन्दी खानेकुराहरू, दिवाशयन यी सबैलाई जुनसुकै खालको मुखरोगमा पनि सेवन गर्नुहुँदैन ॥४-५॥

इति मुखरोगे पथ्यापथ्यविधिः ॥५३॥
यति मुखरोगमा अपनाउनुपर्ने पथ्यापथ्यविधिबारे बताइयो ॥५३॥

◆◆◆

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

५४
अथ कर्णरोगे पथ्यापथ्यविधिः

कर्णरोगे पथ्यानि–

स्वेदो विरेको वमनं नस्यं धूमः शिराव्यधः ।
गोधूमाः शालयो मुद्गाः यवाश्च प्रतनं हविः ॥१॥
लावो मयूरो हरिणस्तित्तिरिर्वनकुक्कुटः ।
पटोलं शिग्रु वार्त्ताकं सुनिषण्णं कठिल्लकम् ॥२॥
रसायनानि सर्वाणि ब्रह्मचर्यमभाषणम् ।
उपयुक्तं यथादोषमिदं कर्णामये हितम् ॥३॥

अन्वयः

स्वेदः, विरेकः, वमनम्, नस्यम्, धूमः, शिराव्यधः, गोधूमाः, शालयः, मुद्गाः, यवाश्च, प्रतनं हविः, लावः, मयूरः, हरिणः, तित्तिरिर्वनकुक्कुटः, पटोलम्, शिग्रु, वार्त्ताकम्, सुनिषण्णम्, कठिल्लकम्, रसायनानि सर्वाणि, ब्रह्मचर्यम्, अभाषणम् यथादोषं उपयुक्तं इदं कर्णामये हितम् ॥१-३॥

भावार्थ

स्वेदन, विरेचन, वमन, नस्य, धूम, शिरावेधन, गहुँ, शालिधान, मूंगी, जौ, पुराण घृत सेवन गर्नु, लावपक्षी, मयूर, हरिण, तित्रो, जंगली कुखुरा, परवर, सहिजन, भण्टा, चारपाते चरीअमिलो, पुनर्नवा वा करेला, सबै रसायन, ब्रह्मचर्य, मौनता यी सबै दोषको अवस्थानुसार कर्णरोगका लागि हितकारक छन् ॥१-३॥

कर्णरोगेऽपथ्यानि

दन्तकाष्ठं शिरःस्नानं व्यवायं श्लेष्मलं गुरु ।
कण्डूयनं तुषारं च कर्णरोगे परित्यजेत् ॥४॥

अन्वयः

दन्त-काष्ठम्, शिरःस्नानम्, व्यवायम्, श्लेष्मलम्, गुरु, कण्डूयनम्, तुषारं च कर्णरोगे परित्यजेत् ॥४॥

भावार्थः

दन्तकाष्ठको प्रयोग, शिरःस्नान, मैथुन, कफकारक वस्तु, भारी द्रव्य र ओष यति कर्णरोगीले परित्याग गनुपर्छ ॥४॥

इति कर्णरोगे पथ्यापथ्यविधिः ॥५४॥
यति कर्णरोगमा अपनाउनुपर्ने पथ्यापथ्यविधिबारे बताइयो ॥५४॥

◆◆◆

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

५५
अथ नासारोगे पथ्यापथ्यविधिः

नासारोगे पथ्यानि–

स्थितिर्निवातनिलये [३०३]प्रगाढोष्णीषधारणम् ।
गण्डूषो लंघनं नस्यं धूमश्छर्दिः शिराव्यधः ॥१॥
स्वेदः स्नेहः शिरोऽभ्यंगः प्रतनं यवशालयः ।[३०४]
कुलत्थमुद्गयोर्यूषो ग्राम्यजांगलजाः रसाः ॥२॥
वार्ताकं कुलकं शिग्रुः कर्कोटं बालमूलकम् ।
लशुनं दधि तप्ताम्बु वारुणी च कटुत्रयम् ॥३॥
कट्वम्ललवणं स्निग्धमुष्णं च लघुभोजनम् ।
नासारोगे पीनसादौ सेव्यते तत्सुखावहम् ॥४॥

अन्वयः

निवातनिलये स्थितिः, प्रगाढोष्णीषधारणम् :, गण्डूषः, लंघनम्, नस्यम्, धूमः, छर्दिः, शिराव्यधः, स्वेदः, स्नेहः, शिरोऽभ्यंगः, प्रतनं यवशालयः, कुलत्थमुद्गयोर्यूषः, ग्राम्यजांगलजाः रसाः, वार्ताकम्, कुलकम्, शिग्रुः, कर्कोटम्, बालमूलकम्, लशुनम्, दधि, तप्ताम्बु, वारुणी च, कटुत्रयम्, कट्वम्ललवणम्, स्निग्धम्, उष्णं च, लघुभोजनम्, नासारोगे पीनसादौ सेव्यते तत्सुखावहम् ॥१-४॥

भावार्थः

हावा राम्ररी संचालन भएको स्थानमा बस्नु, बाक्लो नातो बाध्नु या पगरी गुथ्नु, गण्डूषधारण गर्नु, लंघन, नस्य, धूमपान, वमन, शिरावेधन, स्वेदन, स्नेहन, शिरमा तेल लगाउनु, पुराना जौ-शालिधानहरू, गहत र मूंगीको यूष, ग्राम्य र जांगल पशुपक्षीको मांसरस, भण्टा, कुलक (परवर), सहिजन, कर्कोट (चटेलो), कलिलो मूला, लशुन, दही, तातो पानी, वारुणी मदिरा, पिरो, अमिलो, नुनिलो, चिल्लो, तातो र लघुभोजन सेवन गर्दा नासारोगी पीनस आदिका रोगीहरूलाई सुखकारक हुन्छ ॥१-४॥

---

३०३ कोमलो-पाठान्तरम्
३०४ पुराणाः यवशालयः, भै.र. श.क.द्रु. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नासारोगेऽपथ्यानि–

स्नानं क्रोधं शकृन्मूत्रवातवेगान् शुचं द्रवम् ।

भृशं शय्यां च यत्नेन नासारोगी परित्यजेत् ॥५॥

अन्वयः

स्नानम्, क्रोधम्, शकृन्मूत्रवातवेगान्, शुचम्, द्रवम्, भृशं शय्यां च नासारोगी यत्नेन परित्यजेत् ॥५॥

भावार्थः

स्नान, क्रोध, मलमूत्र र वायुको वेगधारण गर्नु, शोक गर्नु, द्रव अर्थात् तरलपदार्थ, ज्यादा नरम शय्यामा सुतिरहनु यी सबै कुरालाई नासारोगीले परित्याग गर्नुपर्दछ ॥५॥

इति नासारोगे पथ्यापथ्यविधिः ॥५५॥

यति नासारोगमा अपनाउनुपर्ने पथ्यापथ्यविधिबारे बताइयो ॥५५॥

◆◆◆

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

५६
अथ नेत्ररोगे पथ्यापथ्यविधिः

नेत्ररोगे पथ्यानि–

आश्च्योतनं लंघनमञ्जनं च स्वेदो विरेकः प्रतिसारणं च।
प्रपूरणं नस्यमसृग्विमोक्षः शस्त्रक्रिया लेपनमाज्यपानम् ॥१॥
सेको मनोनिर्वृतिरंघ्रिपूजा[३०५] मुद्गाः यवाः लोहितशालयश्च।
लावो मयूरो वनकुक्कुटश्च कूर्मः कुलिंगोपि कपिंजलश्च ॥२॥
कौम्भं हविर्वन्यकुलत्थयूषः पेया विलेपी लशुनं पटोलम्।
वार्त्ताककर्कोटककारवेल्लम् नवीनमोचं नवमूलकं च ॥३॥
पुनर्नवामार्कवकाकमाचीपत्तूरशाकानि कुमारिका च।
कुस्तुम्बुरूशीरकमाणिमन्थलोध्रं वरा क्षौद्रमुपानहौ च ॥४॥[३०६]
नारीपयश्चन्दनमिन्दुखण्डं तिक्तानि सर्वाणि लघूनि चापि।
विजानता पथ्यमिदं प्रयुक्तं यथामलं नेत्रगदं[३०७] निहन्ति ॥५॥

अन्वयः

आश्च्योतनम्, लंघनम्, अञ्जनं च, स्वेदः, विरेकः, प्रतिसारणं च, प्रपूरणम्, नस्यम्, असृग्विमोक्षः, शस्त्रक्रिया, लेपनम्, आज्य-पानम्, सेकः, मनो-निर्वृतिः, अंघ्रिपूजा, मुद्गाः, यवाः, लोहित-शालयश्च, लावः, मयूरः, वनकुक्कुटश्च, कूर्मः, कुलिंगोपि, कपिंजलश्च, कौम्भं हविः, वन्यकुलत्थयूषः, पेया, विलेपी, लशुनम्, पटोलम्, वार्त्ताक-कर्कोटक-कारवेल्लम्, नवीन-मोचम्, नवमूलकं च, पुनर्नवा-मार्कव-काकमाची-पत्तूर-शाकानि, कुमारिका च, कुस्तुम्बुरू-शीरक-माणिमन्थ-लोध्रम्, वरा, क्षौद्रम्, उपानहौ च, नारी-पयः, चन्दनम्, इन्दुखण्डम्, तिक्तानि सर्वाणि, लघूनि चापि, विजानता यथामलं प्रयुक्तं इदं पथ्यं नेत्रगदं निहन्ति ॥१-५॥

भावार्थः

आश्च्योतन, लंघन, अञ्जन, स्वेदन, विरेचन, प्रतिसारण, प्रपूरण, नस्य, रक्तमोक्षण, शस्त्रकर्म, लेप, घृतपान, सेक, मनको शान्ति वा सन्तृप्ति (सत्वावजय), पादसेवा (खुट्टाको हेरविचार), मूंगी, जौ, रक्तशालि, लावपक्षी, मयूर, वनकुखुरो (कालिज), कछुवा, कुलिंग पक्षी, कपिञ्जलपक्षी, कौम्भ घृत, बनगहतको यूष, पेया, विलेपी, लशुन, परवर, भण्टा, करेला, काँचो केरा, वनमूला, पुनर्नवा, भृंगराज, कवई, पत्तूरको साग, घिउकुमारी, धनियाँ, उशीर, सैन्धव लवण, लोध, शतावरी, मह, पादस्त्राण (खुट्टाको स्वस्थ्यको हित गर्ने खालका जुत्ता)

३०५ मनोवृत्तिरथांघ्रिपूजा, भै.र.।
३०६ द्राक्षा च कुस्तुम्बुरुमाणिमन्थलोध्रं वराक्षौद्रमुपानहावपि। भै.र.
३०७ दोषचयम्। भै.र.।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नारीको स्तन्य, चन्दन, चन्द्रकिरण, सबै तिता वस्तुहरू, हलुका खाने कुराहरू यी विज्ञले संयोजन गरिएका पथ्यलाई सेवन गरेमा नेत्ररोग निको हुन्छ ॥१-५॥

नेत्ररोगेऽपथ्यानि–

क्रोधं शुचं मैथुनमश्रुवायुविण्मूत्रनिद्रावमिवेगरोधम् ॥
सूक्ष्मेक्षणं दन्तविघर्षणं च स्नानं निशाभोजनमातपं च ॥६॥
[३०८]प्रजल्पनं छर्दनमम्बुपानं मधूकपुष्पं दधि पत्रशाकम् ॥
कालिंगपिण्याकविरूढकानि मत्स्यं सुरां मांसमजांगलं च ॥७॥
ताम्बूलमम्लं लवणं विदाहि तीक्ष्णं कटूष्णं गुरू चान्नपानम् ॥
नरो न सेवेत हिताभिलाषी सर्वेषु रोगेषु दृगाश्रयेषु ॥८॥

अन्वयः

हिताभिलाषी नरः दृगाश्रयेषु सर्वेषु रोगेषु क्रोधम्, शुचम्, मैथुनम्, अश्रु-वायु-विण्-मूत्र-निद्रा-वमि-वेगरोधम्, सूक्ष्मेक्षणम्, दन्त-विघर्षणं च, स्नानम्, निशा-भोजनम्, आतपं च, प्रजल्पनम्, छर्दनम्, अम्बुपानम्, मधूकपुष्पम्, दधि, पत्रशाकम्, कालिंग-पिण्याक-विरूढकानि, मत्स्यम्, सुराम्, मांसमजांगलं च, ताम्बूलम्, अम्लम्, लवणम्, विदाहि, तीक्ष्णम्, कटूष्णम्, गुरु चान्नपानम्, न सेवेत ॥६-८॥

भावार्थः

आफ्नो हित चाहने मानिसले आँखाका सबै किसिमका रोगहरूमा क्रोध, शोक, मैथुन; आँसु, वायु, मल, मूत्र, निद्रा र वमनको वेग रोक्नु, सूक्ष्म अर्थात् अत्यन्त साना वस्तुहरूलाई हेर्नु, दाह्रा किट्नु, धेरै नुहाउनु, अवेर राती खाना खानु, चर्को घाम ताप्नु, धेरै बोल्नु, वमन गर्नु, ज्यादा पानी पिउनु, महुवाका फूलको सेवन गर्नु, दही खानु, पत्रशाक, खरबूजा, पीना, टुसा उमारेको खाने कुरा, माछा, ग्राम्य र औदक मासु, पान, अमिलो, नुनिलो, विदाही, तीक्ष्ण, पिरो र तातो खानेकुरा यी सबैलाई सेवन गर्नुहुँदैन ॥६-८॥

इति नेत्ररोगे पथ्यापथ्यविधिः ॥५६॥

यति नेत्ररोगमा अपनाउनुपर्ने पथ्यापथ्यबारे बताइयो ॥५६॥

◆◆◆

---

३०८ द्रवं रजोधूमनिषेवणञ्च दृक्स्वेदनञ्चापि विरुद्धमन्नम् । इति भैषज्यरत्नावल्यामतिरिक्तः पाठः ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

५८
अथ शीर्षरोगे पथ्यापथ्यविधिः

शिरोरोगे पथ्यानि–

स्वेदो नस्यं धूमपानं विरेको लेपः सेको[३०९] लंघनं शीर्षवस्तिः ।
रक्तोन्मुक्तिर्वस्तिकर्मोपनाहौ जीर्णं सर्पिः शालयः षष्टिका च ॥१॥
यूषो दुग्धं धन्वमांसं पटोलं शिग्रुर्द्राक्षा वास्तुकं कारवेल्लम् ।
आम्रं धात्री दाडिमं मातुलुंगं तैलं तक्रं काञ्जिकं नारिकेलम् ॥२॥
पथ्या कुष्ठं भृंगराजः कुमारी मुस्तोशीरं चन्द्रिका गन्धसारः ।
कर्पूरं च ख्यातिमानेष वर्गः सेव्यो मर्त्यैः शीर्षरोगे यथास्वम् ॥३॥

अन्वयः

स्वेदः, नस्यम्, धूमपानम्, विरेकः, लेपः, सेकः, लंघनम्, शीर्षवस्तिः, रक्तोन्मुक्तिः, वस्तिकर्मोपनाहौ, जीर्णं सर्पिः शालयः षष्टिका च, यूषः, दुग्धम्, धन्वमांसम्, पटोलम्, शिग्रुः, द्राक्षा, वास्तुकम्, कारवेल्लम्, आम्रम्, धात्री, दाडिमम्, मातुलुंगम्, तैलम्, तक्रम्, काञ्जिकम्, नारिकेलम्, पथ्या, कुष्ठम्, भृंगराजः, कुमारी, मुस्तोशीरम्, चन्द्रिका, गन्धसारः, कर्पूरं च एषः ख्यातिमान् वर्गः मर्त्यैः शीर्षरोगे यथास्वं सेव्यः ॥१-३॥

भावार्थः

स्वेदन, नस्य, धूमपान, विरेचन, लेप, सेक, लंघन, शिरोवस्ति, रक्तमोक्षण, वस्तिकर्म, उपनाह, पुरानो घिउ, पुराना शालिषष्टिक धान, यूष, दुध, जांगल मांस, परवर, सहिजन, दाख, बेथे, करेलो, आँप, अमला, दाडिम, बिमिरो, तिलको तेल, मही, काञ्जी, नरिवल, हर्रो, कुठ, भृंगराज, घिउकुमारी, मोथे, उशीर, चन्द्रकिरण, कस्तूरी, कपूर समेतको यो ख्यातिमान् वर्ग शिरको रोग भएका मानिसहरूले प्रशस्त सेवन गनुपर्दछ ॥१-३॥

---

३०९ छर्दिः, भै.र., श.क.द्रु. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शिरोरागेऽपथ्यानि–

क्षवजृम्भामूत्रवाष्पनिद्राविड्वेगभञ्जनम् ।

दुष्टं नीरं विरुद्धान्नं विरुद्धं जलमज्जनम् ॥४॥[३१०]

दन्तकाष्ठं दिवानिद्रां शिरोरोगी परित्यजेत् ॥४.५॥

अन्वयः

क्षव-जृम्भा-मूत्र-वाष्प-निद्रा-विड्वेग-भञ्जनम्, दुष्टं नीरम्, विरुद्धान्नम्, विरुद्धं जल-मज्जनम्, दन्तकाष्ठम्, दिवानिद्राम् शिरोरोगी परित्यजेत् ॥४-४.५॥

भावार्थः

हाच्छिउँ, हाइ, मूत्र, आँसु, निद्रा, मलको वेग धारण गर्नु; दूषित पानी, विरुद्ध अन्न, शिर डुब्ने गरी पौडी खेल्नु, दन्तकाष्ठको प्रयोग गर्नु, दिउसो सुत्नु यी सबै शिरोरोगीहरूले परित्याग गर्नुपर्दछ ॥४-४.५॥

इति शिरोरोगे पथ्यापथ्यविधिः ॥५७॥

यति शिरोरोगमा अपनाउनुपर्ने पथ्यापथ्यविधिबारे बताइयो ॥५७॥

♦♦♦

३१० सद्यविन्ध्यसरिज्जलम्, भै.र., श.क.द्रु. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

५८
अथ स्त्रीरोगे पथ्यापथ्यविधिः

स्त्रीरोगे पथ्यानि–

यत्पथ्यं यदपथ्यं च रक्तपित्तेषु कीर्तितम्।
प्रदरेऽपि यथादोषं तत्तु नारी भजेत् त्यजेत् ॥१॥

अन्वयः

रक्तपित्तेषु कीर्तितम् यत्पथ्यं यदपथ्यं च तत् प्रदरेऽपि नारी तु यथादोषं भजेत्, त्यजेत् (पथ्यं भजेत्, अपथ्यं त्यजेत्) ॥१॥

भावार्थः

रक्तपित्तरोगमा जुन पथ्य र अपथ्य बताइएको छ प्रदर भएकी नारीले पनि दोष र अवस्थालाई विचार गरेर त्यही पथ्यको सेवन र अपथ्य त्याग गर्नुपर्दछ ॥१॥

योनिव्यापत्स्वपि वातव्याधिवत् पथ्यापथ्यानि–

वातव्याधिवतां पथ्यमपथ्यञ्च यदीरितम्।
योनिव्यापत्स्वपि तथा तद्विद्याच्च यथामलम् ॥२॥

अन्वयः

वातव्याधिवतां पथ्यमपथ्यञ्च यदीरितम्, तथा योनिव्यापत्स्वपि च यथामलम् तद् विद्यात् ॥२॥

भावार्थः

वातव्याधिका लागि जे जे पथ्य र अपथ्य बताइयो त्यही पथ्यापथ्य दोषको अवस्था अनुसार योनिव्यापद् रोगका लागि पनि जान्नू ॥२॥

गर्भिण्यां पथ्यानि–

शालयः षष्टिका मुद्गाः गोधूमा लाजसक्तवः।
नवनीतं घृतं क्षीरं रसाला मधुशर्करा ॥३॥
पनसं कदली धात्री द्राक्षाम्लं स्वादुशीतलम्।
कस्तूरी चन्दनं माला कर्पूरमनुलेपनम् ॥४॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चन्द्रिकास्नानमभ्यंगो मृदुशयचा हिमोऽनिलः ।
सन्तर्पणं प्रियावाचो विहाराश्च मनोरमाः ॥५॥
प्रियंकरं चान्नपानं गर्भिणिभ्यो हितं सदा ॥५.५॥

अन्वयः

शालयः, पष्ठिकाः, मुद्गाः, गोधूमाः, लाजसक्तवः, नवनीतम्, घृतम्, क्षीरम्, रसाला, मधुशर्करा, पनसम्, कदली, धात्री, स्वादुशीतलम् द्राक्षा, अम्लम्, कस्तूरी, चन्दनम्, माला, कर्पूरम्, अनुलेपनम्, चन्द्रिका, स्नानम्, अभ्यंगः, मृदुशय्या, हिमोऽनिलः, सन्तर्पणम्, प्रियावाचो, विहाराश्च मनोरमाः, प्रियंकरं चान्नपानम् सदा गर्भिणिभ्यो हितम् (भवति) ॥३-५.५॥

भावार्थः

शालिधानको चामल, षष्टिक धानको चामल, मूंग, गहुँ, लाजाको सातु, नौनी, घृत, दुध, रसाला, मह, सख्खर, रुखकटहर, केरा, अमला, गुलियो र शीतल दाखको अमिलो, कस्तूरी, चन्दन, माला, कपूर, अनुलेपन, चन्द्रमाको किरण, स्नान, अभ्यंग, नरम विछौना, चिसो हावा, सन्तर्पण, प्रियवचन, मनोहर विहार, प्रिय अन्नपान गर्भिणीका लागि सदा हितकर हुन्छ ॥३-५.५॥

गर्भिण्यामपथ्यानि–

स्वेदनं वमनं क्षारं कलहं विषमाशनम् ।
असात्म्यं नक्तसञ्चारं शौर्य[311] चाप्रियदर्शनम् ॥६॥
अतिव्यवायममायासं भारं प्रावरणं गुरु ।
अकालजागरस्वप्नं कठिनोत्कटकासनम् ॥७॥
शोकक्रोधभयोद्वेगश्रद्धावेगविधारणम् ।[312]
उपवासाध्वतीक्ष्णोष्णं गुरुविष्टम्भिभोजनम् ॥८॥
रक्तं विवसनं [313] श्वभ्रकूपेक्षा मद्यमामिषम् ।
उत्तानशयनं यच्च स्त्रियो नेच्छन्ति तत् त्यजेत् ॥९॥

अन्वयः

स्वेदनम्, वमनम्, क्षारम्, कलहम्, विषमाशनम्, असात्म्यम्, नक्त-सञ्चारम्, शौर्यम्, चाप्रियदर्शनम्, अतिव्यवायम्, आयासम्, भारम्, गुरु प्रावरणम्, अकाल-जागर-स्वप्नम्, कठिनो-त्कटकासनम्, शोक-क्रोध-

३११ चौर्यम्, श.क.द्रु ।
३१२ वेगश्रद्धाविधारणम् । भै.र.। श्रद्धावेशविधारणम्, श.क.द्रु. ।
३१३ नक्तं निरशनम्, भै.र. श.क.द्रु. । रक्तनिस्सारणम् इति च पाठान्तरम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भयो-द्वेग-श्रद्धा-वेग-विधारणम्, उपवासा-ध्व-तीक्ष्णो-ष्णम् गुरु-विष्टम्भि-भोजनम्, रक्तम्, विवसनम्, श्वभ्र-कूपे-क्षां मद्यमामिषम्, उत्तान-शयनम्, यच्च स्त्रियो नेच्छन्ति तत् त्यजेत् ॥६-९॥

भावार्थ

स्वेदन, वमन, क्षार, झगडा, विषमभोजन, असात्य भोजन, राती हिँड्नु, शौर्य (साहस), अप्रिय दृश्य हेर्नु, ज्यादा मैथुन गर्नु, ज्यादा प्रयास/व्यायाम वा पसिना बगाउनु/परिश्रम गर्नु, भारी बोक्नु, बाक्लो र गह्रुको ओढ्ने ओढ्नु, अकालजागरण (राती ननिदाउनु) र अकालस्वप्न (दिउसो सुत्नु), कठिन आसन (अप्ठ्यारो बस्नु), उत्कट आसन (कुक्कुक्क बस्नु वा योगको उत्कटासन गर्नु), शोक, क्रोध, भय, उद्वेग (घवडाहट), श्रद्धाको वेग[३१४] तथा अधारणीय वेगको धारण गर्नु[३१५], उपवास गर्नु, तीक्ष्ण, उष्ण, गुरु र विष्टम्भी भोजन गर्नु, रक्तमोक्षण/विस्रावण वा रक्तनिस्सारण गर्नु/रक्तदान गर्नु, लुगा फुकाल्नु वा नांगै बस्नु, गहिरो ठाउँ र कुवामा जाने इच्छा गर्नु, मद्यपान, मांसाहार, उत्तानो सुत्नु र जे नारीहरू रुचाउँदैनन् त्यस्तो सबै कुराको गर्भिणीले त्याग गर्नुपर्दछ ॥६-९॥

सूतिकारोगेषु पथ्यानि–[३१६]

तथा रक्तस्रुतिं शुद्धिं वस्तिमामासतोऽष्टमात् ।

एभिर्गर्भः स्रवेदामः कुक्षौ शुष्येन् म्रियेत वा ॥१०॥

भजेन्न नित्यं तिक्ताम्लकटूषणकषायकान् ।

अकालजागरम्, स्वप्नं कठिनोत्कटकासनम् ॥११॥

वातलैश्च भवेद् गर्भः कुब्जोन्धो जड वामनः ।

पित्तलैः खलतिः पिंगः श्वित्री पाण्डुः कफात्मभिः ॥१२॥

अपथ्यमिदमुद्दिष्टं गर्भिणीनां महर्षिभिः ।

सूतिकाख्येषु रोगेषु वातश्लेष्मोद्भवेषु च ॥१३॥

तत्र रोगानुकूलेन पथ्यापथ्यानि निर्दिशेत् ॥१३.५॥[३१७]

---

३१४ गर्भिणीलाई दोहदको अवस्थामा विभिन्न इच्छा लाग्दछन् त्यस्तो इच्छाको वेगलाई रोक्नुहुँदैन । हाम्रो दहीचिउरा खुवाउने चलन यही गर्भिणीको श्रद्धा (इच्छा) पुऱ्याउन चलेको हो । सम्भवतः पहिले कुनै गर्भिणीले दहीचिउरा खाने श्रद्धा वा इच्छा राखेकी थिइन् होला ।

३१५ "न वेगान् धारयेद् धीमाञ्जातान् मूत्रपुरीषयोः । न रेतसो न वातस्य न छर्द्याः क्षवथोर्न च ॥ नोद्गारस्य न जृम्भाया न वेगान् क्षुत्पिपासयोः । न वाष्पस्य न निद्राया निःश्वासस्य श्रमेण च ॥" –चरकसंहिता । आइसकेको मूत्रको वेग, दिसाको वेग, वीर्यको वेग, अपानवायुको वेग (पाध) वमनको वेग, हाच्छिउँको वेग, डकारको वेग, हाइ आउने वेग, क्षुधाको वेग, प्यास वा तीर्खाको वेग, वाष्प (आँसु) को वेग, निंद्राको वेग र परिश्रम गरेपछि आउने श्वासको वेगलाई कहिल्यै पनि रोक्नुहुँदैन । यी तेरह किसिमका वेगलाई अधारणीय वेग भन्दछन् ।

३१६ अष्टमासाभ्यारभ्य गर्भिण्या अपथ्यम् । यो आठ महिनादेखि सुत्केरी भएको पैतालीस दिनसम्म वा सूतिका रोग भएको अवस्थामा निंको नहुञ्जेलसम्मका लागि पथ्य हो ।

३१७ सूतिकाख्येषु रोगेषु वातश्लेष्मोचितानि च । तत्तद्रोगानुकूल्येन पथ्यापथ्यानि निर्दिशेत् । भै.र. । भैषज्यरत्नावल्यां सूतिकारोगे पथ्यम्–लंघनानि मृदुस्वेदो गर्भकोष्ठविशोधनम् । अभ्यञ्जनं तैलपानं कटुतीक्ष्णोष्णसेवनम् ॥ दीपनं पाचनं मद्यं पुराणाः शालिषष्टिकाः । कुलत्थो लशुनं शिग्रुः वार्त्ताकुं बालमूलकम् ॥ पटोलं मातुलुंगं च ताम्बूलं दाडिमद्वयम् । योनिश्लेष्मानिलघ्नानि विधातव्यानि तानि च ॥ सप्ताहाद् बृंहणं किञ्चिद् द्वादशाहात्तथामिषम् । सार्द्धमासे व्यतिक्रान्ते त्याज्याहारादियन्त्रणा ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अन्वयः

तथा आमासतोऽष्टमात् रक्तस्रुतिं शुद्धिं वस्तिं (त्यजेत्) एभिः आमः गर्भः स्रवेत्, कुक्षौ शुष्येन् म्रियेत वा । न भजेत् नित्यं तिक्ताम्लकटूषणकषायकान्, अकालजागरम्, स्वप्नम्, कठिनोत्कटकासनम्, वातलैश्च गर्भः कुब्जोन्धो जड वामनः भवेत्, पित्तलैः खलतिः पिंगः, कफात्मभिः श्वित्री पाण्डुः । महर्षिभिः गर्भिणीनां इदं अपथ्यं उद्दिष्टम् । तत्र सूतिकाख्येषु रोगेषु वातश्लेष्मोद्भवेषु च रोगानुकूल्येन पथ्यापथ्यानि निर्दिशेत् ॥१०-१३.५॥

भावार्थः

त्यसैगरी आठ महिनादेखि उता रक्तस्राव, शोधन, वस्ति पनि गर्नुहुँदैन । यसो गरेमा आम गर्भस्राव हुनसक्छ, पाठेघरमा नै सुक्न सक्छ अथवा मर्न पनि सक्छ । कहिल्यै पनि तितो, अमिलो, पिरो, तातो र टर्रो खानुहुँदैन, अकालमा जागरण गर्नु र सुत्नु अर्थात् दिनमा सुत्नु र रातमा जाग्राम रहनुहुँदैन, कठिन तथा उत्कटासनमा बस्नुहुँदैन । वातकारक आहारविहारले गर्भ कुब्जो, अन्धो, जड र वामन (पुड्को) हुनसक्छ । पित्तकारक आहारविहारले गर्भ केश झर्ने, पिंगल नेत्रवाला तथा कफकारक आहारविहारले गर्भ श्वित्री (सेतो), पाण्डुवर्णको हुनसक्तछ। महर्षिहरूले गर्भिणीहरूका लागि यस्तो पथ्य बताइदिएका छन् । सूतिका नामक रोगमा वातकफरोगमा गर्नुपर्ने पथ्यापथ्यको पालना गर्नुपर्दछ अथवा रोगानुकूल पथ्यापथ्य अपनाउनुपर्दछ ॥१०-१३.५॥

इति स्त्रीरोगे पथ्यापथ्यविधिः ॥५८॥

यति स्त्रीरोगमा अपनाउनुपर्ने पथ्यापथ्यविधिबारे बताइयो ॥५८॥

◆◆◆

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

५९
अथ बालरोगे पथ्यापथ्यविधिः

बालरोगे पथ्यापथ्यानि–

यत्पथ्यं यदपथ्यं च नृणामुक्तं ज्वरादिषु ।
तद्वद् विधेयमौचित्याद् बालानां तेषु जानता ॥१॥

अन्वयः

नृणां ज्वरादिषु यत्पथ्यं यदपथ्यं च उक्तं तेषु (रोगेषु) जानता बालानां तद्वद् औचित्याद् विधेयम् ॥१॥

भावार्थः

मानिसहरूका लागि ज्वरमा जेजस्तो पथ्य र अपथ्य बताइएको छ ज्ञानीहरूले बालकहरूका रोगमा पनि त्यस्तै उचित पथ्य र अपथ्य बुझेर अपनाउनुपर्दछ ॥१॥

पारिगर्भिके पथ्यापथ्यानि–

पूर्वं पथ्यमपथ्यं च मन्दाग्नौ यत्प्रकीर्तितम् ।
औचित्याद् तद् भवेयातां[३१८] बालानां पारिगर्भिके ॥२॥

अन्वयः

पूर्वं मन्दाग्नौ यत् पथ्यमपथ्यं च प्रकीर्तितम् बालानां पारिगर्भिके तद् औचित्याद् भवेयाताम् ॥२॥

भावार्थः

पहिले मन्दाग्निमा जे पथ्य र अपथ्य बताइयो त्यस्तै बालकको पारिगर्भिक रोगमा पनि औचित्य अनुसार त्यही पथ्य र अपथ्य अपनाउनुपर्दछ ॥२॥

---

३१८ भवेच्चैव, भै.र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

बालग्रहेषु पथ्यापथ्यानि–

आगन्तून्मादिनां पथ्यमपथ्यं च यदीरितम् ।
औचित्याद्योजयेत्तत्र बालेषु ग्रहरोगिषु ॥३॥

अन्वयः

आगन्तून्यमादिनां यत् पथ्यमपथ्यं च ईरितम् औचित्याद् तत्र ग्रहरोगिषु बालेषु योजयेत् ॥३॥

भावार्थः

आगन्तुक उन्माद व्याधिको पहिले जे पथ्य र अपथ्य बताइयो औचित्य अनुसार बालग्रहमा पनि त्यही पथ्यापथ्यको संयोजन गर्नुपर्दछ ॥३॥

इति बालरोगे पथ्यापथ्यविधिः ॥५९॥
यति बालरोगमा अपनाउनुपर्ने पथ्यापथ्यविधिबारे बताइयो ॥५९॥

◆◆◆

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

६०
अथ विषरोगे पथ्यापथ्यविधिः

विषरोगे पथ्यानि–

अरिष्टाबन्धनं मन्त्रयुक्तिश्छर्दिर्विरेचनम् ।[३१९]
जागरं[३२०] शोणिताकृष्टिः परिषेकोऽवगाहनम् ॥१॥
हृदयावरणं नस्यमञ्जनं प्रतिसारणम् ।[३२१]
उद्वर्त्तनं प्रधमनं प्रलेपो वह्निकर्म च ॥२॥
उपधानं प्रतिविषं धूपः संज्ञाप्रबोधनम् ।
शालयः षष्टिकाश्चापि कोरदूषाः प्रियंगुकाः ॥३॥
मुद्गाः हरेणवस्तैलं सर्पिश्चापि नवं क्वचित् ।[३२२]
शिखितित्तिरिलावैणगोधाखुप्लवगामिषम् ॥४॥[३२३]
वार्त्ताकं कुलकं धात्री निष्पावस्तण्डुलीयकम् ।
मण्डूकपर्णी जीवन्ती सुनिषण्णमुपोदिका ॥५॥
कालशाकं च लशुनं दाडिमं च विकंकतम् ।
प्राचीनामलकं पथ्यं कपित्थं नागकेशरम् ॥६॥
गोछागनरमूत्राणि तक्रं शीताम्बु शर्करा ।
अविदाहीनि चान्नानि सैन्धवं मधु कुंकुमम् ॥७॥
पश्चिमोत्तरवाताश्च हरिद्रा सितचन्दनम् ।
मुस्ता शिरीषः कस्तूरी तिक्तानि मधुराणि च ॥८॥
हेमचूर्णानि वर्गोऽयं पथ्यापथ्यं यथाविषम् ।
विषरोगेषु सर्वेषु प्रयोक्तव्यो विजानता ॥९॥

---

३१९ मन्त्रक्रिया, भै.र., श.क.द्रु. ।
३२० कर्षणम्, भै.र. । रूषणम्, श.क.द्रु. ।
३२१ परितारणम्, प्रतिसारणम् इति पाठान्तरम् ।
३२२ सर्पिर्जीर्णं नवं तथा, भै.र. ।
३२३ श्वाविदामिषम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अन्वयः

अरिष्टाबन्धनम्, मन्त्रयुक्तिः, छर्दिः, विरेचनम्, जागरम्, शोणिताकृष्टिः, परिषेकः, अवगाहनम्, हृदयावरणम्, नस्यम्, अञ्जनम्, प्रतिसारणम्, उद्वर्त्तनम्, प्रधमनम्, प्रलेपः, वह्निकर्म च, उपधानम्, प्रतिविषम्, धूपः, संज्ञाप्रबोधनम्, शालयः, षष्टिकाश्चापि, कोरदूषः, प्रियंगुकाः, मुद्गाः, हरेणवः, तैलम्, सर्पिश्चापि नवं क्वचित्, शिखितित्तिरिलावैणगोधाखुप्लवगामिषम्, वार्त्ताकम्, कुलकम्, धात्री, निष्पावः, तण्डुलीयकम्, मण्डूकपर्णी, जीवन्ती, सुनिषण्णम्, उपोदिका, कालशाकं च, लशुनम्, दाडिमं च, विकंकतम्, प्राचीनामलकम्, पथ्यम्, कपित्थम्, नागकेशरम्, गोछागनरमूत्राणि, तक्रम्, शीताम्बु, शर्करा, अविदाहीनि चान्नानि, सैन्धवम्, मधु, कुंकुमम्, पश्चिमोत्तरवाताश्च, हरिद्रा, सितचन्दनम्, मुस्ता,शिरीषः, कस्तूरी, तिक्तानि, मधुराणि च, हेमचूर्णानि वर्गोऽयं पथ्यापथ्यं यथाविषम्, सर्वेषु सर्वेषु विषरोगेषु विजानता प्रयोक्तव्यः ॥१-९॥

भावार्थः

अरिष्टाबन्धन, मन्त्रयुक्ति, वमन, विरेचन, जागरण, शोणिताकर्षण (रक्तमोक्षण), परिषेक, अवगाहन, हृदयावरण, नस्य, अञ्जन, प्रतिसारण, उद्वर्त्तन, प्रधमन, प्रलेप, वह्निकर्म, उपधान, प्रतिविष, धूपन, संज्ञाप्रबोधन यी विषोपचारका उपक्रम हुन् ।

शालिधान, षष्टिकधान, कोदो, कागुनो, मूंगी, केराउ, तिलको तेल, नयाँ घिउ, मयूर, तित्रो, लाभ, मृग, गोहोरो, मुसा, वानर आदिको मासु, भण्टा, कुलक (परवर), अमला, भटमास, लुँडे, घोडटाप्रे, जीवन्ती, पुनर्नवा, पवई, कालशाक, लशुन, अनार, मयल, पानीअमला, हर्रो, कपित्थ, नागकेशर, गाई बाखा र मनिसको मूत्र, मही, चिसो पानी, सख्खर, अविदाही अन्नहरू, सैन्धव लवण, मह, केशर, पश्चिम र उत्तर वहने वायु, हरिद्रा, चन्दन, मुस्तक, शिरीष, कस्तूरी, तिता वस्तु, मीठा गुलिया खानेकुरा, सुवर्ण भस्म यी विषका पथ्यापथ्य हुन् । बुद्धिमान्ले विषको प्रकार र बल अनुसार पथ्यको संयोजन मिलाउनुपर्दछ ॥१-९॥

विषरोगेऽपथ्यानि–

क्रोधं विरुद्धाध्यशनं व्यवायम् ताम्बूलमायासमपि प्रवातम् ॥
अम्लं च सर्वं लवणं च सर्वं सस्वेदनं तद् विविधानि तानि ॥१०॥[३२४]
निद्रा भयं धूमविकार घर्मो विषातुरो नैव भजेत्कदाचित् ॥१०.५॥

अन्वयः

क्रोधम्, विरूद्धाध्यशनम्, व्यवायम्, ताम्बूलम्, आयासमपि, प्रवातम्, अम्लं च सर्वम्, लवणं च सर्वम्, सस्वेदनं तद् विविधानि तानि, निद्रा, भयम्, धूमविकारः, घर्मः विषातुरो नैव भजेत्कदाचित् ॥१०-१०.५॥

---

३२४ ... नानाविधमासुतानि । निद्रां भयं धूमकटुक्षुधां च-पाठान्तरम् ।
... नानाविधमातपानि । निद्रा भयं धूमकटुक्षुधां च इत्यपि पाठान्तरम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भावार्थः

क्रोध, विरुद्धभोजन, अध्यशन, मैथुन, पान, व्यायाम, वायुको सेवन, सबै किसिमको अमिलो, सबै किसिमको नुनिलो, विभिन्न किसिमका स्वेदन, निद्रा, भय, धूमविकार, घाम यी सबै अपथ्य हुन् र विषातुर व्यक्तिले कहिल्यै पनि सेवन गर्नुहुँदैन ॥१०-१०.५॥

इति विषरोगे पथ्यापथ्यविधिः ॥६०॥
यति विषरोगमा अपनाउनुपर्ने पथ्यापथ्यविधिबारे बताइयो ॥६०॥

इति पथ्यापथ्यनिघण्टुः समाप्तः ॥
पथ्यापथ्यनिघण्टु समाप्त भयो ॥

इति पथ्यापथ्यसंग्रहः ॥
पथ्यापथ्यसंग्रह समाप्त भयो ॥

◆◆◆

सम्वत् १७३० चैत्रकृष्ण ६ भौमे
आत्मारामस्येदं पुस्तकम् ।
श्रीरस्तु ॥ श्रीः॥श्रीः॥श्रीः॥श्रीः॥श्रीः॥श्रीः॥श्रीरस्तु ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

परिशिष्ट खण्ड

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

परिशिष्ट–१

सन्दर्भ ग्रन्थहरू :

१. **चरकसंहिता**, चरकचन्द्रिका हिन्दी व्याख्यासहिता– ब्रह्मानन्द त्रिपाठी भाग १, चौखम्बा सुरभारती प्रकाशन, पुनर्मुदित संस्करण, २००८ ई. ।

२. **चरकसंहिता**, चरकचन्द्रिका हिन्दी व्याख्यासहिता– ब्रह्मानन्द त्रिपाठी भाग २, चौखम्बा सुरभारती प्रकाशन, पञ्चम संस्करण, १९९८ ई. ।

३. **सुश्रुतसंहिता**, डल्हणाचार्यकृत निबन्धसंग्रह तथा गयदासाचार्यकृत न्यायचन्द्रिकासहिता, चौखम्बा कृष्णदास अकादमी, वाराणसी पुनर्मुद्रित सन् २०१४ ।

४ **भैषज्यरत्नावली**, गोविन्ददासविरचिता, जयदेव विद्यालंकारकृत चन्द्रप्रभा व्याख्या, मोतीलाल बनारसीदास, अष्टम संस्करण १९७० ।

५ **द्रव्यगुणसंग्रह**, चक्रपाणिदत्त विरचित, डा. श्याममणि अधिकारीद्वारा नेपाली भाषामा अनुदित, प्रथम संस्करण, वि. सं. २०७५ ।

६ **द्रव्यगुणविज्ञान**, आचार्य प्रियव्रत शर्मा, चौखम्भा भारती अकादमी, प्रथम भाग, स्वर्णजयन्ती संस्करण २०१३, ई. पुनर्मुद्रित २०१८ ई. ।

७ **द्रव्यगुणविज्ञान**, आचार्य प्रियव्रत शर्मा, चौखम्भा भारती अकादमी, द्वितीय भाग, पुनर्मुद्रित २०१९ ई. ।

८. **द्रव्यगुणविज्ञान**, आचार्य प्रियव्रत शर्मा, तृतीय भाग, चौखम्भा भारती अकादमी, पुनर्मुद्रित २०१७ ई. ।

९. **द्रव्यगुणविज्ञान**, आचार्य प्रियव्रत शर्मा, चतुर्थ भाग, चौखम्भा भारती अकादमी, पुनर्मुद्रित २०१७ ई. ।

१०. **द्रव्यगुणविज्ञान**, आचार्य प्रियव्रत शर्मा, पञ्चम भाग, चौखम्भा भारती अकादमी, पुनर्मुद्रित २०१७ ई. ।

११. **द्रव्यगुणविज्ञान**, डा. श्याममणि अधिकारी, साझा प्रकाशन, प्रथम भाग, पहिलो संस्करण, २०६२ वि.सं. ।

१२. **नेपालमा पाइने जडीबुटीको उपयोगिता**, रामकाजी बोहरा, हाम्रो सम्पदा नेपाल, पहिलो संस्करण, २०६९ वि.सं. ।

१३ **किन धार्मिक बोटबिरुवाको महत्त्व**, विष्णु प्रसाद खत्री, श्रीमती शान्तिदेवी खत्री, पहिलो संस्करण, २०४२ वि.सं. ।

१४. **जडीबुटी विज्ञान**, डा. खडानन्द पौडेल, श्रीमती मीना पौडेल, २०५८ वि. सं. ।

१५. **जडीबुटी मञ्जरी**, ध्रुवराज भट्टराई, पहिलो संस्करण २०५८ वि. सं. ।

१६. *An Introduction to Neplese Food Plants, Puskal Prasad Regmi, Royal Nepal Academy, First Edition 1982 AD.*

१७. **चन्द्र निघण्टु**, सिंहदरबार, वैद्यखाना विकास समिति, भाग १, प्रथम संस्करण २०६९ वि.सं. ।

१८. **चन्द्रनिघण्टु**, सिंहदरबार वैद्यखाना विकास समिति, भाग २, प्रथम संस्करण, २०७० वि.सं. ।

१९. **चन्द्रनिघण्टु**, सिंहदरबार वैद्यखाना विकास समिति, भाग ३, प्रथम संस्करण, २०७३ वि.सं. ।

२०. **चन्द्रनिघण्टु**, सिंहदरबार वैद्यखाना विकास समिति, भाग ४, प्रथम संस्करण, २०७३ वि.सं. ।

२१. **चन्द्रनिघण्टु**, सिंहदरबार वैद्यखाना विकास समिति, भाग ५, प्रथम संस्करण, २०७५ वि.सं. ।

२२. **महारसनिघण्टु**, योगी धर्ममहारस, विद्यार्थी पुस्तक भण्डार, कमलपोखरी, काठमाण्डौ, प्रथम खण्ड, प्रथम संस्करण, २०७६ वि.सं. ।

२३. **महारसनिघण्टु**, योगी धर्ममहारस, विद्यार्थी पुस्तक भण्डार, कमलपोखरी, काठमाण्डौ, द्वितीय खण्ड, प्रथम संस्करण, २०७६ वि.सं. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

२४. **महारसनिघण्टु**, योगी धर्ममहारस, विद्यार्थी पुस्तक भण्डार, कमलपोखरी, काठमाण्डौ, तृतीय खण्ड, प्रथम संस्करण, २०७६ वि.सं. ।

२५. **स्थानीय जडीबुटीद्वारा स्वास्थ्यरक्षा**, डा. श्याममणि अधिकारी, महेन्द्र संस्कृत विश्वविद्यालय, प्रथम संस्करण २०५५ वि.सं. ।

२६. Medicinal Plants Of Nepal, Department of Plant Resources, Nepal, Revised Second Edition, April 2016.

२७. **राजनिघण्टु**, नरहरि पण्डित, इन्द्रदेव त्रिपाठीकृत द्रव्यगुणप्रकाशिका हिन्दी व्याख्या, चौखम्बा कृष्णदास अकादमी, वाराणसी, षष्ठ संस्करण २०७३ वि.सं., सन् २०१६ ।

२८. **कैयदेवनिघण्टु**, आचार्य प्रियव्रत शर्मा एवं डा. गुरुप्रसाद शर्माको सम्पादन एवं व्याख्या, चौखम्बा ओरियन्टालिया, पुनर्मुद्रित संस्करण : २००९ ।

२९. **भावप्रकाशनिघण्टु**, भाव मिश्र, चौखम्बा भारती, अकादमी, संशोधित परिवर्द्धित संस्करण २०१० ई., पुनर्मुद्रित २०१८ ।

३०. **अनुपानमञ्जरी**, प्रज्ञा नेपाली टीकासहिता, अनुवादक/टीकाकार डा. छत्रपति दाहाल, राष्ट्रिय अभिलेखालय, काठमाण्डौ, नेपाल, २०७५ वि.सं. ।

३१. **श्रीकाशिराजविरचित अजीर्णमञ्जरी**, नेपाली भाषानुवादसहित, सम्पादक तथा अनुवादक डा. छत्रपति दाहाल, राष्ट्रिय अभिलेखालय, काठमाण्डौ, नेपाल, २०७५ वि.सं. ।

३२. **नेपाली निघण्टु**, कोषनाथ देवकोटा, नेपाल राजकीय प्रज्ञा प्रतिष्ठान, प्रथम संस्करण २०२५ वि.सं. ।

३३. **माधवनिदानम्**, माधवकर, मधुकोषव्याख्या एवं विद्योतिनी हिन्दी टीका, भाग १, चौखम्बा संस्कृत संस्थान, २७ औं संस्करण २०५५ वि. सं. ।

३४. **माधवनिदानम्**, माधवकर, मधुकोषव्याख्या एवं विद्योतिनी हिन्दी टीका, भाग २, चौखम्बा संस्कृत संस्थान, २७ औं संस्करण २०५४ वि. सं. ।

३५. **शब्दकल्पद्रुमः**, स्यार राजा राधाकान्तदेव बहादुरद्वारा विरचित तथा हरिचरणवसुद्वारा प्रकाशित, भाग १, भाग २, भाग ३, भाग ४, भाग ५, भाग ६, भाग ७ ।

३६. **अमरकोषः**, अमरसिंह, विद्वच्छिरोमणि कुलचन्द्र गौतमकृत टिप्पणीसहित, प्रकाशक लक्ष्मीनाथ गौतम, टंगाल, गैरीधारा, काठमाण्डौ - वि.सं. १९९३ सालमा प्रकाशित पुसतकको आधारमा ।

३७. **कायचिकित्सा**, विद्याधर शुक्ल, चौखम्बा सुरभारती प्रकाशन, प्रथम भाग, पुनमुद्रित संस्करण २००९ ।

३८. **कायचिकित्सा**, विद्याधर शुक्ल, चौखम्बा सुरभारती प्रकाशन, द्वितीय भाग, तृतीय संस्करण १९९६ ।

३९. **कायचिकित्सा**, विद्याधर शुक्ल, चौखम्बा सुरभारती प्रकाशन, तृतीय भाग, पुनमुद्रित संस्करण २००८ ।

४०. **नेपाली शब्दसागर (सोपपत्तिक कोष)**, वसन्त कुमार शर्मा, नेपाल, भाभा पुस्तक भण्डार, काठमाण्डौ, द्वितीय संस्करण, २०५८ वि. सं. ।

४१. **नेपाली बृहत् शब्दकोष**, नेपाल प्रज्ञा प्रतिष्ठान, सातौं संस्करण, २०६७ वि. सं. ।

४२. **अंग्रेजी नेपाली साझा संक्षिप्त शब्दकोष**, नरेन्द्रमणि आचार्य दीक्षित, साझा प्रकाशन, दोस्रो संस्करण २०४४ वि. सं. ।

४३. **प्रज्ञा नेपाली अंग्रेजी शब्दकोष**, नेपाल प्रज्ञा प्रतिष्ठान, प्रथम संस्करण २०७० ।

४४. **अष्टांग संग्रह सूत्रस्थान**, वाग्भट, सर्वांगसुन्दरी हिन्दी व्याख्या, वैद्यनाथ आयुर्वेद भवन, द्वितीय संस्करण १९८१ ।

४५. **अष्टांगहृदयम्, वाग्भट**, सर्वांगसुन्दरी व्याख्या, मोतीलाल बनारसीदास, पुनर्मुद्रण १९९९ ।

४६. **शार्ङ्गधरसंहिता**, शार्ङ्गधराचार्य, राधाकृष्ण पाराशरकृत कृष्णा हिन्दी व्याख्या, वैद्यनाथ आयुर्वेद भवन प्रा. लि. द्वितीय संस्करण १९७४ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection



श्रीराष्ट्रिय अभिलेखालय
नेपाल

A ९१४/६

विषयः आयुर्वेद
पुस्तक नामः पथ्यापथ्यसंग्रह
क्र. सं. पं ३११४
वि. सं. १६६७
पत्र संः २५
आकार ३० १/२ × ११ १/२

NATONAL ARCHIVES
NEPAL

Subject:
Manscript-Name:
C. No.
S. No.
Folio. No
Size.



पथ्यापथ्य ॥२॥ ॥श्रीगणेशायनमः॥ ॥श्रित्वा रजः सत्वतमो सि विश्वं निर्मा तिपाति क्षपति स्वयंयः॥ अशेषवृंदारकवृंदवंद्यः पायादपाया
न्मनुजान्गिरीशः॥ आलोक्य वैद्यतंत्राणि यत्नादेष निबध्यते॥ व्याधितानां चिकित्सार्थं पथ्यापथ्यविनिश्चयः॥ भिषक्सर्वे
षु रोगेषु निर्दिष्टं नियथायथं॥ निदानं पथ्यापथ्यानि त्रीणि यत्नाद्विचिंतयेत्॥ पूर्वं सर्वगदे कुर्यान्निदानपरिवर्जनं॥ तेनैव रो
गाः शीर्यंति भुक्तानीरा इवांकुराः॥ रुत्सु सर्वास्वपथ्यानि यत्नात्संपरिवर्जयेत्॥ तास्वपथ्यो विवर्द्धंते दोहदैरिव वीरुधः॥ विनापि
भेषजं व्याधिः पथ्यादेव विलीयते॥ न तु पथ्यविहीनस्य भेषजानां शतैरपि॥ दोषान्दूष्यान्देशकालौ सात्म्यं सत्वं वलं वयः॥
प्रकृतिं भेषजं वह्निं माहास्वप्रयत्नतः॥ निरीक्ष्य मतिमान्व्याधिचिकित्सां कर्तुमुद्यतः॥ पथ्यानि योजयेन्नित्यं यथास्वं सर्वरोगि रा(म) ॥२॥
षु॥ वमनं लंघनं काले यवागूः स्वेदवानिव॥ कटुतिक्तो रसो स्वपाचनं तरुणज्वरे॥ सन्निपाते त्विदं कुर्यात्सर्वमामकफापहं॥
चवलेहांजनं नस्यं गंडूषा स्वरसक्रियाः॥ पादयोर्दस्तयो मूले कंठकूपे च गंडयोः॥ स्वेदश्च घृकुलत्थानां चूर्णघर्षणमाचरेत्॥

स्नानं विरेकं सुरतं कषायं व्यायाममभ्यंजनमह्निनिद्रां॥ दुग्धं घृतं वैदलमामिषं च तक्रं सुरां स्वादुगुरुद्रवं च॥ अन्नं प्रवातं भ्रम
णं क्रुधं च त्यजेत्प्रयत्नात्तरुणज्वरार्त्तः॥ पुरातनाः षष्टिकशालयश्च वार्त्ताकशोभांजनकारवेल्लं॥ वेत्राग्रमायाढफलं पटोलं
कर्कोटकं मूलकपोतिकाच॥ मुद्गमसूरैश्चणकैः कुलत्थैर्मकुष्टकैर्वा विहितश्च यूषः॥ पायामृतावास्तुकतंडुलीयजीवंतिशा
कानि च काकमाची॥ द्राक्षा कपित्थानि च दाडिमानि चकं कताम्लवपवलिमानि॥ लघूनि सात्म्यानि च भेषजं च पथ्यानि मध्य
ज्वरिणां मतूनि॥ विरेचनं छर्दनमंजनं च नस्यं च धूमोप्यनुवासनं च॥ शिराव्यधः संशमनं प्रदेहाभ्यंगोवगाहः शिशिरोपचारः
ऐणः कुलिंगो हरिणो मयूरो लावः शशश्च तित्तिरि कुक्कुटोव॥ कौंचः कुरंगः पृषतश्चकोरः कपिंजलो वर्त्तककालपुच्छो॥ गवा
मजायाश्च पयो घृतं च हरीतकी पक्वनिर्ज्झराभः॥ एरंडतैलं सितचंदनं च वस्त्राणि सूक्ष्माणि पुरेरितानि॥ ज्योत्स्ना प्रिया लिंगन
मप्ययं स्याद्गणः पुराणज्वरिणो हिताय॥ अभिघातसमुत्थानपानाभ्यंगो च सर्पिषः॥ सत्तजव्रणजं वापि क्षतव्रणविकित्सि

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पथ्यापथ्य ॥२॥ तं॥ औषधीगंधजेकर्मकुर्यात्पित्तप्रसाधनं॥ अभिशापाभिचारेभ्यो जपहोमादिभेषजं॥ उत्पातग्रहपीडोत्थेदानस्वस्त्ययना
दयः॥ क्रोधोत्थितपित्तहरं कामक्रोधजपवन॥ कामशोकभयोद्भूते सर्वा वातहरी क्रिया॥ आश्वासनं चेष्टलाभोहर्षदा
यीनियानिच॥ विशेषतः पुनश्चात्र कामक्रोधसमुत्थिते॥ भयशोकेसमुद्भूतकामक्रोधोक्तमौषधं॥ भूताभिषंगजेभूतवं
धावेशनताडनं॥ मनःक्षोभसमुद्भूते मनसः सांत्वनानिच॥ इत्यागंतुज्वरे पूर्वैर्विधिभिपथ्यमिष्यते॥ विष्णोर्नामसहस्रस्य
पठनं श्रवणं श्रुतेः॥ देवानां ब्राह्मणानां च गुरूणामपि पूजनं॥ ब्रह्मचर्यंतपोहोमः प्रदानं नियमोयमः॥ साधूनां दर्शनं स
त्परत्नौषधिविधारणं॥ मंगलाचरणं चैववर्गः सर्वान्ज्वरान्जयेत्॥ वमिवेगं दंतकाष्ठमसात्म्यमतिभोजनं॥ विरुद्धान्यन्न
पानानिविदाहीनिगुरूणिच॥ दुष्टांवुक्षीरमम्लानिपत्रशाकंविरूढकं॥ ललदं वुनतां मूलं कालिंदं लैकुचं फलं॥ ता राम ॥२॥
डीमत्स्यं चपिण्याकं नवान्नं पिष्टवैकृतं॥ अभिष्यंदीनिचैनानिज्वरितः परिवर्जयेत्॥ व्यायामं च व्यवायं च स्नानं चंक्रम

णानिच॥ ज्वरमुक्तोनसेवेत यावन्नवलवान्भवेत्॥ ॥इतिज्वरे पथ्यापथ्यविधिः॥ ॥वमनं लंघनं निद्रा पुराणाः शालिषष्टि
काः॥ विलेपीलाजमंडश्च मसूरतुवरीरसः॥ शशैणलावहरिणकपिंजलभवारसाः॥ मेदिहुद्रगवाः शृंगी डिंडिसा मधुना
लिका॥ तैलंछागघृतंक्षीरं दधितक्रं गवामपि॥ दधिजं वापयोजं वानवनीतं गवाजयोः॥ नवरंभाफलं क्षौद्रं जंबूफल
निच॥ भव्यं महार्द्रजं विश्वं शालूकंचविकंकतं॥ कपित्थं वकुलं विल्वं तिंदुकं दाडिमद्वयं॥ तालकं कंचटदलं चांगेरी विज
याम्रुणा॥ जातीफलं सफूनं जीरकं गिरिमल्लिका॥ कुस्तुंबुरुमहानिंबः कषायः सकलोरसः॥ अन्नपानानि सर्वाणि दी
पनानिलघूनिच॥ नाभेर्द्व्यंगुलतोधस्तात्त्र्यंगुलेणेंदुवद्दहेत्॥ तथावंशास्थिमूलेपिपथ्यवर्गोतिसारिणां॥ स्वेदांजनं
रुधिरमोक्षणमंवुपानं स्नानं व्यवायमपिजागरधूमनस्यं॥ अभ्यंजनं वेगविधारणं नरूक्षाण्यसात्म्यमशनं च विरुद्धमन्न
गोधूममाषयववास्तुककाकमाचीनिष्पावकंदमधुशिग्रुरसालपूगं॥ कूष्मांडतुंविवदरंगुरुचान्नपानंतांवूलमिक्षुगुड

पथ्यापथ्य ॥३॥ मद्यमुपोदिकां च॥ द्राक्षाम्लवेतसफलंलशुनं चधात्रीदुष्टांवुमस्तुमुष्टवारिचनालिकेरं॥ संस्वेदनं मृगमदोविलपत्र
शाकंक्षीरंसराणिचफलानिपुनर्नवां च॥ एवविकंलवणमम्लमपिप्रकोपिवर्गोतिसारगदपीडितमानवेषु॥ ॥इत्यती
सारे॥ ॥निद्रा छर्दनलंघनेचिरभवायेशालयः षष्टिका मंडोलाजकृतोमसूरतुवरीमुद्गप्रभूतारसाः॥ निःशेषोद्धृतसा
रमेवदधियच्छाजंगवां छाग्यावानवनीतमेवविमलंतद्भूतयः संभवं॥ छागल्याचपयोदधीनितिलजंतैलंसु
रामाक्षिकं शालूकंवकुलंचदाडिमयुगंनव्यानिभव्यानिच॥ रंभायाः कुसुमंफलंचतरुणं विल्वंचशृंगाटकं चांगेरी वि
जयाकपित्थकुटजाजातीकसेरूणिच॥ तक्रं कंचटपल्लवंचनलकंजातीफलं जांववं धान्याकानिचतिंदुकानिसम
हानिंवारुणा फलवृत॥ कल्याल्लावशशेणतित्तिरिरसाः क्षुद्राख्याः सर्वशः खुड्डीशोमधुरालिकाचवलिशः सर्वेक राम ॥३॥
षायोरसः॥ नाभेर्द्व्यंगुलकादधार्द्धशशिवद्दंशास्थिमूलेतथादाहः प्रज्वलितायसावकथितं पथ्यंग्रहण्यातुरे॥ रक्त

स्रुतिं जागरमंवुपानं स्नानं स्त्रियं वेगविनिग्रहं च॥ नस्यांजनस्वेदनधूमपानं श्रमं विरुद्धाशनमातपं च॥ गोधूमनिष्पा
वकलायमाषयवार्द्रकच्छत्रकराजमाषान्॥ उपोदिकावास्तुककाकमाचीकूष्मांडतुंवीमकशिग्रुकंदान्॥ तांबू
लमिक्षुं वदरं रसालमेर्वारुकं पूगफलं रसोनं॥ धान्याम्लसौवीरतुषोदकानि दुग्धं गुडं मस्तु च नारिकेलं॥ पुनर्नवा
वार्द्रतवेणवानिसर्वाणिशाकानिचपत्रवंति॥ दुष्टांवुगोवारिकुरंगनाभिक्षीरं समस्तानिसुराणि चापि॥ द्राक्षा
म्लंलवणंरसं च गुर्वन्नपानं सकलं च पूगं॥ वैद्यश्चिकित्सन्ग्रहणीविकारं विवर्जयेत् संततमप्रमत्तः॥ ॥इतिग्रह
ण्यां॥ ॥विरेचनं लेपनमस्त्रमोक्षः क्षाराग्निशस्त्रावरितं च कर्म॥ पुरातनालोहितशालयश्च सषष्टिका वाप्यथवाः कु
लत्थाः॥ गोधाखुलापाकगवाह्वकूर्मश्वाविल्कुरंगाजखरोतुकीशाः॥ तरक्षुवाघ्रश्च शृगालकाकाद्यस्वल्पमांसाः
प्रसहाश्चतेऽपि॥ पटोलवल्लूरसोनवह्निपुनर्नवावास्तुकसूरणानि॥ जीवंतिकादंतशठासुराख्यत्रुटिर्दयस्यानदं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पथ्यापथ्य ॥४॥ ततकं ॥ कंकोलधात्रीरुचकंकपित्थमोद्भूणिभूत्राज्यपथ्यांसिवापि ॥ भल्लातकंसर्षपजंचतैलंगोमूत्रसौवीरतुषोद
कानि ॥ वातापद्देयच्चयदम्रिकारितद्वन्नपानंहितमर्शसेम्प ॥ आनूपमामिषंमत्स्यंपिएयाकंदधिपिष्टकं ॥ माषान्क
रीरंनिष्पावंविल्वंतुंवसुपोदिकं ॥ पक्वाम्रमालुकंसर्वविष्टंभीनिगुरूणिच ॥ आतपंजलपानानिवमनंवस्तिकर्मच ॥
आत्यावंत्यपरांतोत्थनदीनांसलिलानिच ॥ विरूद्धानिचसर्वाणिमारुतंपूर्वदिग्भवं ॥ वेगरोधंस्त्रियंपृष्टस्यानमुत्कट
कासनं ॥ यथास्वंदोषलंचान्नमर्शसःपरिवर्जयेत् ॥ यत्पथ्यंयदपथ्यंचवक्ष्येपत्तेरक्तपित्तिनां ॥ रक्तार्शसिरोगिणांतत्तदपि
विद्याद्विशेषतः ॥ यानयानंदिवास्वप्नंगुर्वन्नमतिभोजनं ॥ व्यवायंकलहंचैवक्रुत्तत्तारविधिस्त्यजेत् ॥ यदुक्तमर्शसामं
दोभेषज्यंपथ्यमेवच ॥ तदेवचर्मकीलानांकार्यदोषादिभेदतः ॥ ॥ इत्यर्शःसु ॥ ॥ श्लेष्मिकेवमनंपूर्वपैत्तिकेमृदुरेचनं ॥ राम
वातिकेस्वेदनंवाथयथावस्थंहितंचयत् ॥ नानाप्रकारोव्यायमोदीपनानिलघूनिच ॥ बहुकालसमुत्पन्नामुद्गालोहित ॥४॥

शालयः ॥ विलेपीलाजमंडश्चमंडोमुद्गरसःसुरा ॥ एणोवर्हिःशशोलावःक्षुद्रमत्स्याश्चसर्वशः ॥ शालिंचशाकंवेत्राग्रं
वास्तूकंबालमूलकं ॥ लशुनंदृढकूष्मांडंकदलीनवनीतकं ॥ शोभांजनंपटोलंचवृंताकंललदंवुच ॥ कर्कोटकं
कारवेल्लंवाईतंचमदार्द्रकं ॥ प्रसारणीकाकमाचीचांगेरीसुनिषण्णकं ॥ धात्रीरसंनागरंगंदाडिमक्षारपर्पटाः ॥ अ
म्लवेतसजंवीरमातुलुंगानिम्बादिकं ॥ नवनीतंघृतंतक्रंसौवीरंचतुषोदकं ॥ धान्याम्लंकटुतैलंचरामठंलवणार्द्रकं
यवानीमरिचंमेथीधान्याकंजीरकंदधि ॥ तांबूलंतप्तसलिलंकटुतिक्तौरसावपि ॥ मंदानलेप्पजीर्णेचपथ्यमेतच्च
णांभवेत् ॥ विरेचनानिविएमूत्रवायुवेगविधारणं ॥ अतिवेलंचाध्यशनंजागरंविषमासनं ॥ रक्तस्रुतिंशमीधान्यंम
त्स्यंमांसमुपोदिकां ॥ जलपानेपिष्टकंचजांववंसर्वमालुकं ॥ कूर्चिकामोदकंक्षीरंकिलाटंचप्रपानकं ॥ तालास्थिस

पथ्यापथ्य ॥५॥ स्यंतद्दालंस्नेहनंदुष्टवारिच ॥ विरूद्धासात्म्यपानान्नेविष्टंभीनिगुरूणिच ॥ अग्निमांद्येप्यजीर्णेचसर्वाणिपरिवर्जयेत् ॥
फलवर्त्तिविमिस्वेदंलंघनंचापतर्पणं ॥ विशेषादलसेकुर्याद्विसूच्यामतिसारवत् ॥ ॥ इत्यग्निमांद्याजीर्णालसविसूचि
कासु ॥ ॥ आस्थापनंकायशिरोविरेचनंधूमःकफघ्नानिशरीरशोधनं ॥ चिरंतनावैणवरक्तशालयःपटोलवेत्राग्ररसोन
वास्तुकं ॥ हुताशमंदारदलानिसर्षपानवीनमोचंवृहतीफलान्यपि ॥ तिक्तानिनालीचदलानिमोचिकंमांसंविडंगंपि
चुमंदपल्लवाः ॥ पथ्याचतैलंतिलसर्षपाद्भवंसौवीरसुक्तंचतुषोदकंमधु ॥ पचेलिमंतालमरुष्करंगवांमूत्रंचतांबूल राम
मिराम्लगांडूजं ॥ ओंद्राणिस्त्राज्यपयांसिरामठंक्षारोजमोदाखदिरश्चवत्सकाः ॥ जंवीरनीरंसुखवीयवानिकाःसा ॥५॥
राःसुराह्वागुरुशिंशिपोद्भवाः ॥ तिक्तःकषायःकटुकोरसोप्ययंवर्गोनराणांक्रिमिरोगिणांसुखः ॥ छर्दितहेगवि

रणंचविरूद्धपानाशनमक्षिनिद्रां ॥ द्रवंचपिष्टान्नमजीर्णभोजनंघृतानिमाषान्दधिपत्रशाकं ॥ मांसंपयोऽम्लंमधुरंरसंच
कमीन्जिघांसुःपरिवर्जयेत्तु ॥ ॥ इतिक्रिमिरोगे ॥ ॥ छर्दिविरेचनंजीर्णयवगोधूमशालयः ॥ मुद्गाढकीमसूराणांयूषाजांग
लजारसाः ॥ पटोलंवृद्धकूष्मांडंतरुणंकदलीफलं ॥ जीवंतीक्षुरमत्स्याक्षीगुडूचीतंडुलीयकं ॥ पुनर्नवाद्रोणपुष्पीवार्त्ताकंल
शुनद्वयं ॥ पक्वान्नमभयाबिंवीशृंगीमत्स्यागवांजलं ॥ धात्रीतक्रंघृतंतैलंसौवीरकंतुषोदकं ॥ नवनीतंगंधसारोहरिद्रानागके
सरं ॥ यवक्षारोलोहभस्मकषायाणिचकुंकुमं ॥ दाहश्चरणयोःसंधौनाभेर्द्व्यंगुलकादधः ॥ मस्तकेदक्षयोर्मूलेमध्यवस्ति
त्वयोः ॥ यथादोषमिदंपथ्यंपांडुरोगवतांभवेत् ॥ रक्तस्रुतिर्धूमपानंवमिवेगविधारणं ॥ स्वेदनंमैथुनंशिंवीपत्रशाकानिरामठं
माषांवुपानंपिएयाकंतांवूलंसर्षपासुराः ॥ मृद्भक्षणंदिवास्वप्नंतीक्ष्णानिलवणानिच ॥ सह्यविंध्याद्रिजातानांनदीनांस
लिलानिच ॥ सर्वाण्यम्लानिदुष्टांवुविरूद्धाध्यशनानिच ॥ गुर्वन्नंचविदाहीनिपांडुरोगवतांविषं ॥ ॥ इतिपांडुरोगे ॥ ॥ अथ

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पथ्यापथ्य ॥६॥ गते छर्दनमूर्द्ध निर्गमे विरेचनं स्यादुभयत्र लंघनं। पुरातनाः षष्टिक शालि कोद्रवाः प्रियंगुनीवारयवप्रसाधिकाः॥ मुद्गा मसू
राश्चणका स्तुवर्यो मंजुष्टकाश्चंगिकवर्मिमत्स्याः॥ शशः कपोतो हरिणो ण लावशारिपारावतवर्त्तकाश्च॥ वकाञ्जरखाश्च
सकालपुच्छाः कपिंजलाश्चापि कषायवर्गः॥ गवामजायाश्च पयो घृतं च पक्वं तमहिष्याः घनसं प्रियालं॥ रंभाफलं कंचट
तुलीयकं पटोल वेत्राग्रमहार्द्रकानि॥ पुराणकूष्मांडफलं च पक्वतालानि तद्दीजदलानि वा स्या॥ स्वादूनि तिक्तानि च दाडि
मानि खर्जूरधात्री मिसिनालिकेरं। कसेरुश्रृंगाटकपौष्कराणि कपित्थ शालूकपरूषकानि॥ भूनिंवशाकं पि तुमंदपत्रं तुंवी
कलिंगानि च लाजसक्तु॥ द्राक्षा सिता माक्षिकमित्तव श्च शीतोदकं चोद्भिदवारि चापि॥ सेकावगाहः शतधौत सर्पिरभ्यंगया
गः शिशिरप्रदेहः॥ हिमानिल श्चंदन मिंदुपादाः कथा विचित्राश्च मनोरमाणि॥ धारागृहं भूमिगृहं सुशीतं वैदूर्यमुक्तामुक्ता राम ॥६॥
णिधारणं च॥ रंभोत्पलांभोरुहपत्रशय्या सौमां चरंसोपवनं सुशीतं॥ प्रियंगुकाचंदनभूषितानामालिंगनं चापि वरांगनानां

पद्माकराणां सरितां ह्रदानां चंद्रोदयानां हिमसीकराणां॥ सुशीतलानां गिरिनिर्झराणां श्रुतिप्र धूम्ना निचकीर्त्तनानि
प्रतीरनीरं हिमवालुकाचमिश्रं चंदनं शोणितपित्तरोगे॥ व्यायामाध्वनिषेवणे रविकर स्त्री हस्तिकर्माणि च क्रोधो वेगवि
धारणं च पलताहस्त्य श्वयानानि च। स्वेदस्त्र स्रुति धूमपान सुरतं क्रोधः कुलत्थगुडौ वार्त्ताकी दधि माष सर्षप तिल क्षारा
श्च कोपं पयः॥ तांबूलं ललदं चु मद्य लशुनं शिंबी विरुद्धाशनं कट्वम्ल लवणं विदाहि च गण स्त्याज्यास्त पित्तेन्दणां॥ ॥[illegible]
॥ दोषाधिके स्यवलिनो मृदु शुद्धिरन्नेगो धूममुद्गचणकान्नवशालयश्च॥ छागादिमांस नवनीत पयो घृतानि कव्याद
मांसमपि जांगलजारसाश्च॥ मार्त्तंड चंडकिरणैः परिशोषितानि लेह्यानि पक्ववदराणि खर्जूरणितानि॥ रगाः सकांवलिकश्च
उववेसवारा भक्ष्याः शशांककिरणा मधुरा रसश्च॥ पक्वानि माचपनसाम्रफलानि धात्री खर्जूर पौष्कर परूषक नारिकेलं॥
सौभांजनं वकुलकं नवतालसस्यं द्राक्षाफलानि मिषयोषि च मंथं॥ सिंहास्य पत्र गजगो महिषी घृतं च छोयाश्च सश्च तद्व

पथ्यापथ्य ॥७॥ श्चरमूत्र लेपः॥ मत्स्यंडिका शिखरिणी मदिरा रसालाः कर्पूरकं मृगमदा सितचंदनं च॥ अभ्यंजनानि सुरभीण्यनुलेप
नानि स्नानानि चेष्टन चनान्यवगाहनानि॥ हर्म्यं स्रजः स्मरकथा मृदु गंधवाहः शीतानिलास्यमपि चेंद्ररुचो विपंची।
संदर्शनं मृगदृशामपि हेमचूर्णं मुक्तामणि प्रचुरभूषणधारणं च॥ होमप्रदानममरद्विजपूजनादि दिव्यान्नपानमपि
पथ्यगणः स्वपांते॥ विरेचनं वेगविधारणानि श्रमं स्त्रियं स्वेदनमंजनं च॥ प्रजागरं साहसकर्मसेवां रूक्षान्नपानं विषमा
सनं च॥ तांबूलकालिंग कुलत्थमाष रसोन वंशांकुर रामठानि॥ अम्लानि तिक्तानि कषायकाणि कटूनि सर्वाणि च राम
पत्रशाकं॥ क्षारान्विरुद्धान्नपशनानि शिंबी कर्कोटकं चापि विदाहि सर्वं॥ कठिल्लकं कोलमपित्तयुक्षु विवर्जयेत्संतत ॥७॥
मद्यमत्तः॥ ॥[illegible]॥ ॥ स्वेदो विरेचनं छर्दिर्धूमपानं समोषिताः॥ शालिषष्टिक गोधूम श्यामाक
यवकोद्रवाः॥ चात्मगुप्ता माष मुद्ग कुलत्थानां रसाः पृथक्॥ ग्राम्यौदकानूपधन्वमांसानि विविधानि च॥ सुरापुरा
× संवत्सरोषिताः ३२

तने सर्पिश्छागं चापि पयो घृतं॥ वास्तूकं वायसी शाकं वार्त्ताकं वालमूलकं॥ कंटकारीकासमर्दो जीवंती सुनिषण्णकं॥ इ
ग्धाविंवी मातलुंगं पौष्करं वासकं त्रुटिः॥ गोमूत्रं लशुनं पथ्या व्योषमुष्णोदकं मधु॥ लाजादि वस निद्रा च लघून्यन्नानि
यानि च॥ पथ्यमेतद्यथा दोषमुक्तं कासगदातुरे॥ वस्तिं नस्यमसृङ्मोक्षं व्यायामं दंतघर्षणं॥ आतपं दुष्टपवनं रजो मार्ग
निषेवणं॥ विष्टंभीनि विदाहीनि रूक्षाणि विविधानि च॥ शाकमूत्रान्नार वास वमिवेगविधारणं॥ मत्स्यं कंदं सर्षपं च
तुंवीफलमुपोदिकं॥ दुष्टांवु चान्नपानं च विरुद्धान्यशनानि च॥ गुरुशीतं चान्नपानं कासरोगी परित्यजेत्॥ ॥[illegible]
[illegible]॥ ॥ विरेचनं स्वेदनधूमपान प्रच्छर्दनानि स्वपनं दिवा च॥ पुरातना षष्टिकरक्तशालि कुलत्थगोधूमयवाश्च शस्ताः
शशादिमुक्ति त्तिरिलावदक्षैर्भेकादयो धन्वमृगा द्विजाश्च॥ पुरातनं सर्पिरजाप्रभूतं पयो घृतं वापि सुरा मधूनि॥ निदि
ग्धिका वास्तुकतंडुलीयकं जीवंतिका मूलकपोदिका च॥ पटोल वार्त्ताक रसोनपथ्या जंवीरवीजं फलमातुलुंगं॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पथ्यापथ्य ॥८॥ द्राक्षात्रुटिः पौष्करमुस्तवारिकद्वयं गोजनितंमूत्रं ॥ अन्नानि पानानि च भेषजानि श्लेष्मानिलघ्नानि च यानि तानि
वक्त्रः प्रदेशादपि पार्श्वयुग्मकरस्थयोर्मध्यमयोर्द्वयोश्च ॥ प्रदीप्तलोहेन नकंठकूपेदाहोपि नश्वासिनि पथ्यवर्गः ॥
रक्तोद्गारखर्दितृट्कासरोधानस्यं वस्तिर्दंतकाष्ठं श्रमश्च ॥ च्यवाभारोरेवणः सर्षपादावि वंभीनिग्राम्यधर्मो विदाहि
आनूपानामामिषं तैलभ्रष्टं निष्पावाश्च श्लेष्मकारीणि माषः ॥ रक्तस्रावः पूर्ववातोत्तुपानं मषीसर्पिर्दुग्धमंभोपि दुष्टं ॥
मत्स्याः कंदाः सर्षपाश्चान्नपानं रूक्षं शीतं गुर्वपि श्वासवर्ज्ये ॥ ॥इति श्वासे॥ ॥स्वेदनं वमनं नस्यं धूमपानं विरेचनं ॥
निद्रा स्निग्धानि चान्नानि मृदूनि लवणानि च ॥ जीर्णाः कुलत्थागोधूमाः शालयः षष्टिका यवाः ॥ एणतित्तिरिल
वाद्या जांगला मृगपक्षिणः ॥ पक्वकपित्थं लशुनं पटोलं बालमूलकं ॥ पौष्करं कस्तुलसीमदिरालल दं वुद ॥ उष्णोदकं राम ॥८॥
मातुलुंगं माक्षिकं सुरभी जलं ॥ अन्नपानानि सर्वाणि वातश्लेष्महराणि च ॥ शीतांबुसेकं मद्य सात्म्यासाविस्मापनं भयं ॥ को

धोहर्षः प्रियोद्वेगाः श्रमायाम निषेवणं ॥ वस्थसिक्तमृदाघ्राणं कुर्याद्धाराजलार्पणं ॥ नाभ्यूर्ध्वपीडनं दाहो दीपदग्धद
शिखिरा ॥ वाद्यो रंगुलाभ्यां भेरुद्धं वेष्टानि हिक्किनां ॥ वातस्रोतोद्गारकासशक्तवेगविधारणं ॥ रजो निलानपायास
विरुद्धान्यशनानि च ॥ विष्टंभीनि विदाहीनि रूक्षाणि कटुफलानि च ॥ निष्पावं माषमायपिण्याकवास्तिकं एमामिषे
अवि दुग्धं दंतकाष्ठं वस्तिं मत्स्यान् सर्षपान् ॥ ॥इति हिक्कायां॥ ॥स्वेदो वस्तिर्धूमपानं विरेकः कवलग्रहः ॥ नस्यं भालशि
राव्येधो यवा तोहित शालयः ॥ हंसा ठवीताम्रचूडके किमांसरसाः सुरा ॥ गोकंठकः काकमाचीजीवंती बालमूलकं ॥
द्राक्षा पथ्या मातुलुंगं लशुनं लवणार्द्रकं ॥ तांबूलं मरिचं सर्पिः पथ्यानि स्वरभेदिनां ॥ आम्रं कपित्थं बकुलं शालूकं जांव
वानि च ॥ तिंदुकानि कषायानि वमिं स्वप्नं प्रजल्पनं ॥ अन्नपानं विरुद्धं च स्वरभेदी विवर्जयेत् ॥ ॥इति स्वरभेदे॥ ॥वस्तिर्वि
रेको वमनं यथाबलं धूमोपसेवा कवलप्रदस्तथा ॥ तिक्तानि काष्ठानि च दंतघर्षणे विचान्नपानानि हितेकृतान्यपि ॥ गो

पथ्यापथ्य ॥९॥ धूमसुद्गाम्रणशालिषष्टिकामांसं करादाजशशोणसंभवं ॥ तैंगोरूषांडं मधुरालिके शिशः प्रोष्ठी सलेशः कवरी वरो
हितः ॥ कर्करूपेचाम्रनवीनमूलकं वार्ताकशोभांजनमोचदाडिमे ॥ भव्यं पटोलं रुचकं घृतं पयो बालानि तालानि
रसोनसूरणं ॥ द्राक्षारसं सल्लल दं बुकांजिकं मधुरसालो दधितक्रमार्द्रकं ॥ काकोलखर्जूरि प्रियाल तिंदुकं पक्व
कपित्थं बदरं विकंकतं ॥ तालास्थिमज्जा हिमवालुका सिता पथ्या यवानी मरिचानि रामठं ॥ स्वादुक्षतिक्तानि च देहला
जनं तर्गौघ्य सूक्ताः रुचिरो विघ्नेहितः ॥ चलोद्गारक्षुधानेत्रवारि वेगविधारणं ॥ असद्यान्नमसृड्योक्षं क्रोधं लोभं भ
यं शुचं ॥ दुर्गंधरूपसेवां च न कुर्यादरुचौ नरः ॥ ॥[illegible]॥ ॥विरेचनं छर्दनलंघनानि स्नानेस्ट जालाजकृतश्च मंडः ॥ पु
रातनाः षष्टिकशालिमुद्गकलाययगोधूमयवाश्च धूनि ॥ प्रशादि मुक्तितित्तिरिलावकाद्याम्रगद्विजा नं मलसंज्ञिताश्च ॥ म राम ॥९॥
नोज्ञपाना रसगंधरूपा रसाश्च यूषाश्च पिस्ताडकाश्च ॥ भागाः स्वद्यकांवलिकाः सुराश्च वेत्राग्रकुस्तुंबुरुनारिकेलं ॥ जंबीरधात्री

सहकारकोलद्राक्षा कपित्थानि पक्वेक्षिमानि ॥ हरीतकी दाडिमबीजपूरजातीफलं बालकबिंबवासाः ॥ सिताशतावृहाक
रिकेसराणि भस्तामकः शीतिक्तादि वा स्वभक्तस्य वक्त्रे शिशिरांबुसेकः कस्तूरिका चंदनमिंदुपादाः ॥ मनोज्ञगंधाम्बनु
लेपनानि पावानि पुष्पाणि कलाविनाविरूपाणि शब्दा असाध्यगंधाः स्पर्शा प्रियेयस्पमवानुकूलाः ॥ साह्यनाभोक्ष
येवापरि सन्दिदेहे पथ्यं वमनातुरस्य ॥ नस्यं वस्तिं स्वेदनं स्नेहपानं रक्तचात्तं दंतकाष्ठं द्रवान्ने ॥ बीभत्सं हाभीति शुद्धेगशुले
क्षिकधाः साम्याहृद्यवेरप्रकाने ॥ सर्वं बिंबीका शतेयामधूके रोधोमदो सर्षपान्द्वदाली ॥ व्यायामं वासा स्वप्नं दुष्टान्नपानं
नीमसर्प्यं वर्जयेच्छ्रमतः ॥ ॥इति छर्दिषु॥ ॥शोधनं वमनं निद्रा स्नानं कवलधारणं ॥ कोद्रवाः शालयः पेयाविलेपीलाज
सक्तवः ॥ धन्वमांसं धन्वरसाः शर्करातारसाडवाः ॥ द्राक्षा मधुकमिक्षू वीन्ना गोक्षीरं कतीरसः ॥ रंभापुष्पं तैलकूच्छिद्राक्षा पर्पट
फलानि ॥ कपित्थं कोलमज्जा कूष्मांडकबुपारिका ॥ कस्तूरी दाडिमं धात्री कर्कटी लवलं बुच ॥ जंबीरं करमर्दं च बीजपूरं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पथ्यापथ्य वांपयः॥ मधूकपुष्पं ह्रीवेरंतिक्ता निम्बधुराणि च॥ बालताहांवुशीतांवु पयः पेटीप्रपानकं॥ मात्तीकं सरसीतोयं शर्कराद्व
॥२०॥ नागकेसरं॥ एला जातीफलं पथ्या कुसुंकुकुं चंदनं॥ घनसारो गंधसारः कौमुदी शिशिरानिलः॥ चंदनाई प्रियाश्लेषो
रत्नाभरणधारणं॥ हिमानुलेपनं वस्यात्पथ्यमेतत्तृषातुरे॥ स्वेदांजनं छर्दनं धूमपानव्यायामनस्यानि पित्तं दंतकाष्टं॥ गुर्वं
न्नमम्लं लवणं कषायं कटु स्त्रियं दुष्टजलानि तीक्ष्णं॥ एतानि सर्वाणि हितानि भिलो घीतृषातुरो नैव भजेत्कदाचित्॥ इति
तृष्णायां॥ सेकावगाहौ मणयः सहाराः शीताः प्रदेहा व्यजनानिलाश्च॥ शीतानि पानानि चगंधवंति धाराग्रहाः शीत
मरीचिरोचिः॥ धूमांजनंलीवनमस्त्वमात्तो दाहश्च स्त्रीपरितादनानि॥ लोमांकवानाम पिलुंचनानि नखांत पीडा दश
नायदंशः॥ नासामुखद्वार मरुन्निरोधो विस्वनंच्छईनलंघनानि॥ क्रोधो भयंदुःखकरी न शय्या कथा विचित्राः सुमना
हराश्च॥ छायानभोमः शतधौतसर्पिर्मर्दनिती हणानि बलाजमंडः॥ जीर्णा यवा लोहितशालयश्च कौभंद विमुद्ग सतीन
राम ॥२०॥

यूषः॥ धन्वोद्भवा मांसरसाश्च रागाः खराडवा गव्यपयः सिता च॥ पुराणकूष्मांडपटोलमोचहरीतकी दाडिम नालि
केरं॥ मधूकपुष्पाणि च तंडुलीय मुपोदिकान्नानिलधूनि चापि॥ प्रतीरनीरं सितचंदनानि कर्पूरनीरं हिमवालुका च॥ च
तुश्च शब्दाद्भुतदर्शनानि गीतानि वाद्यान्यपि चोत्कटानि॥ श्रमः स्मृतिश्चिंतनमात्मबोधो धैर्यं च मूर्छासु वर्मितिपथ्यवर्गः॥
तांबूलपत्रशाकानि दंतघर्षणमातपं॥ विरुद्धान्यन्नपानानि व्यवायं स्वेदनं कटु॥ न्तरिणि द्वयो वेगरोधं तन्कंमूर्छामयी
तत्त्यजेत्॥ ॥इति मूर्छायां॥ ॥संशोधनं संशमनं स्वपनं लंघनं श्रमः॥ संवत्सरसमुत्पन्नाः शालयः षष्ठिका यवाः॥ मुद्गा
श्च माषा गोधूमाः सतीनाराग खाडवो॥ एणतित्तिरिलावाजदक्षवर्हिशशामिषं॥ क्रमवारो विचित्रान्नं हृद्यं मद्यं पयः
सिता॥ तंडुलीयं पटोलं च मातुलुंगं परूषकं॥ खर्जूरं दाडिमं धात्री नारिकेलं कशेरुस्तनी॥ सर्पिः पुराणं कर्पूरं प्रतीरं शिशिरा
निलः॥ धारागृहं चंद्रपादा मणयो मित्रसंगमः॥ क्षौमांवरं प्रियाश्लेषो गीतं वाद्यं च मुद्धतं॥ शीतांबु चंदनस्नानं सेव्यमेत

पथ्यापथ्य मदात्यये॥ स्वेदांजनं धूमपानं नावनं दंतघर्षणं॥ तांबूलं चेत्यपथ्यं स्यान्मदात्ययविकारिणं॥ ॥इति मदात्यये॥ ॥शाल
॥२१॥ यः षष्टिका मुद्गमसूरमुख्यणकायवाः॥ धन्वमांसरसा लाजमंडस्तु सक्तवः सिता॥ शतधौतघृतं दुग्धं नवनीतं पयोभवं॥ कूष्मां
डं कर्कटीमिश्रं पक्वमध्वादुदाडिमं॥ पटोलं पर्पटोड्रा क्षा धात्रीफलपरूषकं॥ विंवीतुंवी पयः पेटी खर्जूरं धान्यकं मिसिः॥ वा
लतालं प्रियालं च शृंगाटककसेरुकं॥ मधूकपुष्पं ह्रीवेरं पथ्यातिक्तानि सर्वशः॥ शीताः प्रदेहा भूवेश्मसेको भ्यंगो वगाहनं॥ प
ल्लवालं प्रियालं च शृंगाटक कसेरुकं॥ ... उशीरचंदनालेपः शीतांबुशिशिर
योत्पलदलैःक्षौमशय्या शीतलकाननं॥ कथा विचित्रा गीतानि शिशवो मंजुभाषिणः॥ उशीरचंदनालेपः शीतांबु शिशिरा
निलः॥ धारागृहं प्रियास्पर्शः प्रतीरं हिमवालुकाः॥ सुधांबु रश्मयः स्नानं मलयो मधुरो रसः॥ यानि यानि पुरोक्तानि पित्त
हारीणि तानि च॥ इति दाहवतां नॄणां पथ्यवर्ग उदाहृतः॥ विरुद्धान्यन्नपानानि क्रोधो वेगविधारणं॥ गजाश्वयानमध्वानं
क्षारं पित्तकराणि च॥ व्यायाममातपं तक्रं तांबूलं मधुरामठं॥ व्यवायं कटु तिक्तोलं दाद्रवान्परिवर्जयेत्॥ ॥इति दाहे॥
राम ॥२१॥

खेदो विरेको वमनं च पूर्वं क्रमान्मरुत्पित्तकफोत्थितेषु॥ ततः परं वा विविधं च नस्यं संतर्जनं ताडनमंजनं च॥ आश्वासनं त्रास
नबंधनानि भर्त्सनानि दानानि च घर्षणानि॥ धूमो वधो विस्मरणं सदेदः शिराव्यधः संशमनं च सेकः॥ आश्चर्यकर्माणि
च धूमपानं धीधैर्यसत्वात्मनिवेदनानि॥ अभ्यंजनस्थापनमासनानि निद्रा सुशीतान्यनुलेपनानि॥ गोधूममुद्गारुणशा
लयश्च धारोष्णदुग्धं शतधौतसर्पिः॥ घृतं नवीनं च पुरातनं च कूर्मामिषं धन्वरसाल शालं॥ पुराणकूष्मांडफलं पटोलं ब्रा
ह्मी दलं वास्तुक तंडुलीयं॥ द्राक्षाम्र मूत्रं गगनांबुपथ्या सुवर्णचूर्णानि च नालिकेलं॥ द्राक्षापयोलं पनसं च वैद्यो विधेयमुन्मा
देष्वेषु पथ्यं॥ कामशोकभयक्रोधहर्षेर्ष्यालोभसंभवान्॥ परस्परप्रतिद्वंद्वैरेभिरेव शमं नयेत्॥ दृष्टद्रव्यविनाशात् मुन्मा
दो यस्य जायते॥ तस्य तत्सदृशलाभेन शांतिर्व्याधेः प्रजायते॥ देवर्षिपितृगंधर्वैरुन्मत्तस्य च बुद्धिमान्॥ वर्जयेदंजनादीनि तीक्ष्णानि क्रूरकर्म च॥ पूजावल्युपहारशांतिविधयो होमेष्टिमंत्रक्रिया दानं स्वस्त्ययनं च नादि नियमः सत्यं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पथ्यापथ्य ॥१२॥ पोमंगले॥प्रायश्चित्तविधानमंजलिविधीरत्नौषधीधारणं भूतानामधिपस्य पिष्टपपतेर्गौरीपतेरर्चनं॥येचस्युर्भुविगुह्यका
श्चप्रमथास्तेषांसमाराधनं देवब्राह्मणपूजनं च शमयेदुन्मादमागंतुजं॥मद्यं विरुद्धासनमुष्णभोजनं निद्राक्षुधात्तृट्कृ
तवेगधारणं॥व्यवायमाषाढफलं कठिल्लकं शाकानि पत्रप्रभवानि सर्वशः॥तिक्तानि तीक्ष्णानि भिषक् समादिशेदुन्माद
रोगेषु विगर्हितानि॥ ॥इत्युन्मादरोगे॥ ॥वस्तिर्वातोद्भवे पूर्वं पैत्तिके च विरेचनं॥वमनं श्लैष्मिके चापि परं धूपनमंजनं॥
नस्यं शिराव्यधो दानं त्रासनं बंधनं भयं॥तर्जनं ताडनं हर्षो धूमपानं च विस्मयः॥धीधैर्यात्मादिविज्ञानं स्नानमभ्यंज
नानि च॥लोहिताः शालयो मुद्गा गोधूमाः प्रततं हविः॥कूर्मामिषं धन्वरसा दुग्धं ब्राह्मीदलं वचा॥पटोलं वृद्ध
कूष्मांडं वास्तूकं स्वादु दाडिमं॥सोभांजने पयः पेटी द्राक्षा धात्री परूषकं॥तैलं खराश्वगोमूत्रं गगनांबुहरीतकी॥अ राम ॥१२॥
पस्मारे गदे नॄणां पथ्यमेतदुदीरितं॥चिंताशोकभयक्रोधमशुचीस्पर्शनानि च॥मद्यं मत्स्यं विरुद्धान्नं तीक्ष्णोष्णं गुरु

भोजनं॥अतिव्यवायव्यायामपूज्यपूजाव्यतिक्रमं॥पत्रशाकानि सर्वाणि बिंबीमाषाढजं फलं॥क्षुधातृषास्वप्नवेगानपस्मारी
परित्यजेत्॥ ॥इत्यपस्मारे॥ ॥अभ्यंगो मर्दनं वस्तिः स्नेहः स्वेदोवगाहनं॥संवाहनं संशमनं प्राकूप्रवातविवर्जनं॥अभि
कर्णोपनाहश्चर्भूशय्यासनमासनं॥तैलद्रोणी शिरोवस्तिः शयनं नस्यमातपः॥संतर्पणं बृंहणं च किलाटं दधिकूर्चिका
सर्पिस्तैलं वसा मज्जा स्वाद्वम्ललवणा रसाः॥नवीनास्तिलगोधूममाषाः संवत्सरोषिताः॥शालयः षष्टिकाश्चापि कु
लत्थानां रसाः सुरा॥ग्राम्या गोश्वतरोष्ट्राश्वरासभच्छागलादयः॥आनूपाः कोलमहिषन्यंकुखड्गगजादयः॥औद
गलाः॥गिलिन्यः पर्वतीनक्रो गर्गरः कवजीलिशाः॥एरंडखुल्लकी कूर्मः शिशुमारस्तिमिंगिलः॥रोहितो मद्गुरुः शृंगी
वर्मी खुडिशोरुषाः॥पटोलं शिग्रुवार्ताकं लशुनं दाडिमं द्वयं॥पक्वतालरसालं च ललदं बुपरूषकं॥जंबीरं बदरं द्राक्षा

पथ्यापथ्य ॥१३॥ नागरंगं मधूकजं॥प्रसारणी गोक्षुरकः शुक्लौ द्वौ पारिभद्रकः॥पयांसि च पयः पेटी रुबुतैलं गवां जलं॥मत्स्यंडिका च तांबूलं धा
न्याम्लं तिंतिडीफलं॥स्निग्धोष्णानि च भोज्यानि स्निग्धोष्णं चानुलेपनं॥विशेषाद्वमनं कार्यमामाशयमुपागते॥पक्वाशय
स्थे मांसस्थे तथा स्निग्धविरेचनं॥प्रत्याध्माना ध्मानसंज्ञे वर्त्तिलंघनदीपनं॥अष्टीलास्वेगुल्मविधिः शुक्रस्थे त्वयजिक्रि
याः॥त्वङ्मांसास्रक्शिराप्राप्ते हितं शोणितमोक्षणं॥यथाश्रयं यथावस्थं यथाचरणमेव हि॥वातव्याधौ समुत्पन्ने
पथ्यमेतन्नॄणां भवेत्॥चिंता प्रजागरणवेगविधारणानि छर्दिः श्रमोनशनतावणाकाः कलायाः॥नीवारकंगुशाण
वेणवकोरदूषश्यामाकचूर्णकुरुविंदमुखानियानि॥धान्यानि तानि तृणजानि च राजमाषामुद्गास्तडागतटिनीसलि
लं करीरं॥जांबूकसेरुनलकं क्रमुकं मृणालं निष्पावबीजमपि तालफलास्थिमज्जा॥शालूकतिंदुककठिल्लकवा राम ॥१३॥
लनालं शिंबी च पत्रभवशाकमुदुंबरं च॥शीतांबु रासभपयो पि विरुद्धमन्नं क्षारो पिशुष्कपललं क्षतजस्रुतिश्च॥सौ

द्रं कषायकटुतिक्तरसाव्यवायो हस्त्यश्वयानमपि चंक्रमणं चकद्वा॥आध्मानिनो हितवतोपि पुनर्विशेषात्स्नानं प्रदुष्ट
सलिलं द्विजघर्षणं च॥निःशेषतं नपरिकीर्तितएष कर्मो नॄणां समीरणगदेषु मुदं न दत्ते॥ ॥इति वातव्याधौ॥ ॥जन्मानि भं
शतधौतघृताभ्यंगो मेषीदुग्धावसेचनं॥यवषष्टिकनीवारकलमारुणशालयः॥गोधूमाश्चणका मुद्गा स्तुवर्यो पि
मृकुष्टकाः॥अव्यजा महिषीणां च गवामपि पयांसि च॥लावतित्तिरिवर्त्तीरताम्रचूडाविविष्किराः॥प्रतुदाः शुकहा
रीतकपोतचटकादयः॥उपोदिका काकमाची वेत्राग्रं सुनिषण्णकं॥वास्तूकं कारवेल्लं च तंडुलीयः प्रसारणी॥धत्तूरो
चिरुवूष्मांडं सर्पिः शम्याकपल्लवं॥पटोलं रुबुतैलं च मृद्वीका श्वेतसर्षपाः॥नवनीतं सोमवल्ली कस्तूरी सितचंदनं॥पि
शिपणुरुदेवाह्वसरलस्नेहमर्द्दनं॥तिक्तं च पथ्यमुद्दिष्टं वातरक्तगदे नॄणां॥दिवास्वप्नाग्निसंतापव्यायामातपमैथुनं॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पथ्यापथ्य माषाः कुलत्था निष्पावाः कलायाः क्षारसेवनं॥ अंडजान्नूपमांसानि विरुद्धानि दधीनि च॥ इक्षवो मूलकं मद्यं पिण्याका
।।२४।। म्लानि कांजिकं॥ कटूष्णगुर्वभिष्यंदिलवणाम्लनि च सक्तवः॥ एतानि वातरक्ते षु न प्रयुंज्या द्भिषग्वरः॥ ॥इति वातरक्ते॥ ॥
रूक्षः सर्वविधिः स्वेदः कोद्रवा रक्तशालयः॥ यवाः कुलत्थाः श्यामाकाउद्दालाश्च पुरातनाः॥ शोभांजनं कारवेल्लं पटो
लं लसुनानि च॥ सुनिषण्णं काकमाची नवाग्रं निंबपल्लवाः॥ पत्तूरो वालकं पथ्या वार्त्ताकं तप्तवारि च॥ शंपाकशाकं पिण्या
कं तक्रारिष्टमधूनि च॥ कटुतिक्तकषायाणि क्षारसेवा गवांजलं॥ व्यायामश्च यथाशक्ति स्थलस्याक्रमणानि च॥ खच्छे
द्रुदेसंतरणेप्रतिस्रोतो नदीषु च॥ श्लेष्मापहरणं यच्च नच मारुतकोपनं॥ एतत्पथ्यं समुद्दिष्टमूरुस्तंभविकारिणां॥ गुरु राम
शीतद्रवं स्निग्धं विरुद्धासात्म्यभोजनं॥ विरेचनं स्नेहनं च वमनं रक्तमोक्षणं॥ वस्तिं च नहितं प्राहुरूरुस्तंभविकारिणां॥ ॥ ।।२४।।
इत्यूरुस्तंभे॥ ॥रूक्षः स्वेदो लंघनं स्नेहपानं वस्तिर्लेपो रेचनं पांशुवर्त्तिः॥ अब्दोत्पन्नाः शालयो ये कुलत्था जीर्णं मद्यं

जंगलानां रसाश्च॥ वातश्लेष्मघ्नानि सर्वाणि चक्रं वर्षाभूश्चैरंडतैलं रसोनः॥ पटोलपत्तूरककारवेल्लवार्त्ताकशिग्रूणि च तप्तनीरं॥ मंदार
गोकंटकहृद्दारभल्लातकं गोजलमार्द्रकं च॥ कटूनि तिक्तानि च दीपनानि सुरामवातामयिने हितानि॥ दधिमत्स्यगुडक्षीरोपोदिकामा
षपिष्टकं॥ दुष्टनीरं पूर्ववातं विरुद्धान्यशनानि च॥ असात्म्यं वेगरोधश्च जागरं विषमासनं॥ वर्जयेदामवातार्त्तो गुर्वभिष्यंदकानि च॥ ॥इ
त्यामवाते॥ ॥छर्दिः स्वेदो लंघनं पांशुवर्त्तिर्वस्तिर्निद्रा रेचनं पाचनं च॥ वर्षोत्पन्नाः शालयो वर्षमंडस्तप्तक्षीरं जांगलानां रसाश्च॥ पटो
लं शोभांजनकारवेल्लवार्त्ताकमात्स्यानि पचेलिमानि॥ द्राक्षाकपित्थं रुचके प्रियाले शालिंचपत्राणि च वास्तुकानि॥ सामुद्रसौवर्चल
हिंगुविश्वविडं शताह्वालसुनं लवंगं॥ एरंडतैलं सुरभीजलं च तप्तांबु जंबीररसोपि कुष्ठं॥ लघूनि रुक्षाणि रसाः सितेति वर्गोहितः शूलगदा
र्दितस्य॥ विरुद्धान्नपानानि जागरं विषमासनं॥ रूक्षतिक्तकषायाणि शीतलानि गुरूणि च॥ व्यायामं मैथुनं मद्यं वैदलं लवणं क
टु॥ वेगरोधं शुचं क्रोधं वर्जयेच्छूलवान्नरः॥ ॥इति शूले॥ ॥स्वेदस्नेहविरेकाश्च वर्त्तयः फलवर्त्तयः॥ अभ्यंगाश्च यवाः सर्वे स्थूला विण्मू

पथ्यापथ्य त्रमारुतं॥ ग्राम्यैदकानूपरसाः कटुतैलं च वारुणी॥ बालमूलकशम्याकविटतिलसुधादलं॥ शृंगवेरं मातुलुंगं यक्षारो हरीतकी॥ लवं
।।२५।। गरामठं द्राक्षा गोमूत्रं लवणानि च॥ अधोवातसमुत्थे तु स्नेहाः स्वेदाश्च वर्त्तयः॥ वस्तयोन्नानि पानानि समीरणहराणि च॥ पुरीषजे तथा
स्थापितः स्वेदोभ्यंगोवगाहनं॥ फलवर्त्तिश्च पानानि विड्भेदीन्यशनानि च॥ मूत्रवेगसमुत्पन्ने विविधं वस्तिकर्म च॥ स्वेदोभ्यंगोवगाहश्च
व्यापिः स्वेदोभ्यंगोवगाहनं॥ फलवर्त्तिश्च पानानि विड्भेदीन्यशनानि च॥ मूत्रवेगसमुत्पन्ने विविधं वस्तिकर्म च॥ स्वेदोभ्यंगोवगाहश्च
पिच्छावपीडनं॥ उद्गारोत्थे तु हिक्काघ्नः कासजे कासजिद्विधिः॥ हवजे स्वेदनं धूमो घृतं चोत्तरभक्तिकं॥ तवप्रवर्त्तनं नस्यमभ्यंगश्चो
ईजतुकः॥ शीतान्नपाने तृष्णोत्थे जृंभोत्थे वातजित्क्रिया॥ निद्रावेगोत्थिते क्षीरं स्वप्नः संवाहनानि च॥ क्षुत्कोत्थे व शिरोभ्यंगो व राम
घुतभोजनं॥ वाष्पजे वाष्पसंमोक्षः स्वप्नोमद्यं प्रियाः कथाः॥ श्रमश्वाससमुत्पन्ने विश्रामो वातहारि च॥ शुक्रोत्थे व शिरोभ्यंगो व ।।२५।।
गाहश्चरणायुधाः॥ शालयो मदिरा क्षीरं प्रिया यौवनगर्विता॥ छर्द्युत्थे लंघनं धूमो भुक्त्वा प्रच्छर्दनं श्रमः॥ रूक्षाणि चान्नपानानि
विरेको रक्तमोक्षणं॥ इति पथ्यमुदावर्त्तेन्नृणामुक्तं महर्षिभिः॥ वमनं वेगरोधं च शमीधान्यानि कोद्रवान्॥ नाडीशाकं च शालूकं

जांववं कर्कटीफलं॥ पिण्याकमालुकं सर्वं करीरं पिष्टवैकृतं॥ विष्टंभीनि विरुद्धानि कषायाणि गुरूणि च॥ उदावर्त्तभयेलेन व
र्जयेत्सततं नरः॥ उदावर्त्ते हितं सर्वं पाचनं लंघनं तथा॥ आनाहे तु यथायोग्यं योजयेन्मतिमान्नरः॥ अपथ्यानि प्रदिष्टानि
यान्युदावर्त्तिनां पुरा॥ आनाहार्त्तः परिहरेत्तानि सर्वाणि यत्नतः॥ ॥इत्युदावर्त्तानाहयोः॥ ॥स्नेहः स्वेदो विरेकश्च वस्तिर्वर्त्तिः शि
रास्वधः॥ लंघनं वर्त्तिरभ्यंगः स्वेदः पक्वेति पाठने॥ संवत्सरसमुत्पन्ना कलमा रक्तशालयः॥ खंडः कुलत्थयूषश्च धन्वमांसर
सः सुराः॥ गवामजायाश्च पयो मृद्वीका च परूषकं॥ खर्जूरं दाडिमं धात्री नागरं स्वाम्लवेतसं॥ तक्रमेरंडतैलं च लशुनं बालमूलकं
पत्तूरो वास्तुकं शिग्रु यवक्षारो हरीतकी॥ रामठं मातुलुंगं च ऊषणं सुरभीजलं॥ यदन्नं स्निग्धमुष्णं च दृढं लघु दीपनं॥ वाता
नुलोमनं चैव पथ्यं गुल्मेन्न णां भवेत्॥ माषादयः शमीधान्यं भूकधान्यं यवादयः॥ वातकारीणि सर्वाणि विरुद्धान्यशनानि च॥
वल्लूरं मूलकं मत्स्यं मधुराणि फलानि च॥ शुष्कशाकं शमीधान्यं विष्टंभीनि गुरूणि च॥ अधोवायुशकृन्मूत्रं मच्छामाशुधारणं॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection



पथ्यापथ्य ॥२६॥ वमनं जलपानं च गुल्मरोगी परित्यजेत्॥ ॥इति गुल्मे॥ ॥स्नेहो विरेको वमनं च लंघनं वस्तिर्विलेपी विररक्तशालयः॥ मृगद्विजानां
गलसंज्ञयान्विता यूषा रसा मुद्गकुलत्थसंभवाः॥ रागाः खडाः कांवलिकाश्च खाडवा भव्यं पटोलं कदलीफलान्यपि॥ पुराण
कूष्मांडरसालदाडिमं शम्पाकशाकं नवमूलकान्यपि॥ एरंडतैलं गगनांवु सैंधवं द्राक्षा च तक्रं च पुरातनो गुडः॥ शुंठी यवा
नील्युनंद्रीतकी कुष्टं च कुस्तुंवुरु कस्तमार्द्रकं॥ सौवीरशुक्तं मधुवारुणीरसः कस्तूरिकाचंदनकं प्रपानकं॥ तांवूलमप्ये
षगणः सखा भवेन्मर्त्यस्य हृद्रोगनिपीडितात्मनः॥ तृट्छर्दिमूत्रानिलशुक्रकासोद्गारश्रमश्वासविजृंभवेगान्॥ सह्याद्रिविं
ध्यादिनदीजलानि मेषीपयो दुष्टपयांसि जलं कषायं॥ क्षारं मधूकानि च दंतकाष्ठं रक्तश्रुतिं हृद्गदवास्त्यजेत्तु॥ ॥इति हृद्रोगे॥
॥वातोद्भवे भ्यंगनिरूहवस्तिस्नेहावगाहोन्तरवस्तिसेकः॥ पैत्ते वगाहाः शिशिरप्रदेहाः श्लेष्मा विधिर्वस्तिविधिर्विरेकः॥ श्ले
ष्मोद्भवे स्वेदविरेकवांतं त्वारोयवान्नान्विता दशामुस्तं॥ त्रिदोषजे भ्यंगपुरःसराणि सर्वाण्यमूनि विमलोदितानि॥ अयो राम ॥२६॥



यथादोषमयं गणो पि पुरातनो लोहितशालयश्च॥ तक्रोपयोदध्यपि गोपयस्तं धन्वामिषं मुद्गरसः सिता च॥ पुराणकूष्मांडफलं पटोलं
मृद्वार्द्रकं गोक्षुरकः कुमारी॥ गुवाकखर्ज्जूरकनारिकेलतालद्रुमाणां च शिरांसि पथ्या॥ तालास्थिमज्जा त्रपुसं तु टिश्च शीतानि पानान्य
न्नानि चैव॥ नदीरनीरं हिमवालुका च मित्रं त्वरणं स्यात्सतिमूत्रकृच्छ्रे॥ मद्यं श्रमं निधुवनं गजवाजियानं सर्वं विरुद्धमशनं विषमासनं
च॥ तांवूलमत्स्यलवणार्द्रकतैलभृष्टं पिण्याकहिंगुतिलसर्षपमूत्रवेगान्माषान्करीरमतितीक्ष्णविदाहिरूक्षमम्लं प्रमुंचतु जनः स
तिमूत्रकृच्छ्रे॥ ॥इति मूत्रकृच्छ्रे॥ ॥अभ्यंजनस्नेहविरेकवस्तिस्वेदावगाहोन्तरवस्तयश्च॥ पुरातनालोहितशालयश्च मांसानि धन्वप्र
भवाणि मद्यं॥ तक्रं पयोदध्यपि माषयूषः पुराणकूष्मांडफलं पटोलं॥ मृद्वार्द्रकं तालफलास्थिमज्जा हरीतकी कोमलनारिकेलं॥ गु
वाकखर्ज्जूरकनारिकेलतालद्रुमाणामपि मस्तकानि॥ यथामलं सर्वमिदं च मूत्राघातातुराणां हितमादिशंति॥ विरुद्धान्नानि सर्वाणि
व्यायामं मार्गशीलनं॥ रूक्षं विदाहि विष्टंभि व्यवायं वेगधारणं॥ करीरं वमनं चापि मूत्राघाती विवर्जयेत्॥ ॥इति मूत्राघाते॥ ॥व



पथ्यापथ्य ॥२७॥ स्तिर्विरेको वमनं च लंघनं स्वेदो वगाहो पि च वारिसेवनं॥ यवाः कुलत्थाश्च पुराणशालयो मद्यानि धन्वोद्भवसंभवा रसाः॥ पुराणकूष्मांड
फलानि तुंडुली गोकंटको वारुणशाकमार्द्रकं॥ पाषाणभेदो यवशूककौरण्टवः छित्वा समाकर्षणमश्मनामपि॥ एतानि सर्वाणि भवंति
सर्वदा मुदे श्मरीरोगनिपीडितात्मनां॥ मूत्रस्य शुक्रस्य च वेगमम्लं विष्टंभिरूक्षं गुरु चान्नपानं॥ विरुद्धसानाशनमश्मरीमान्विवर्जयेत्सं
ततमप्रमत्तः॥ ॥इत्यश्मर्यां॥ ॥प्राग्लंघनानि वमनानि विरेचनानि प्रोद्वर्त्तनानि शमनानि च दीपनानि॥ नीवारकंगुयववेणवकोरदू
षश्यामाकचूर्णकुरुविंदमकुष्ठकाश्च॥ गोधूमशालिकलमाश्चिरजा कुलत्थमुद्गाढकी चणकयूषरसाः शिलाश्च॥ लाजाः पुरातनसु
रा मधुवाद्यमंडस्तक्रं च रासभजलं महिषीजलं च॥ लट्वाकपोतशशतित्तिरिलाववर्हिव्याघ्रैणवर्तकशुकादिकजांगलाश्च॥ शोभां
जनानि कुलकानि च वर्हणानि च्चोदुंवराणि लशुनानि नवीनमोचं॥ पत्त्रूरगोक्षुरकमूषिकपर्णशाकं मंदारपत्रमम्टतात्रिफलाक
पित्थं॥ जंवूकसेरुकमलोत्पलकंदवीजं खर्जूरलामलिकनालतरुत्तमांगं॥ व्योषं च तिंदुकफलं खदिरः कलिंगं तिक्तानि चापि राम ॥२७॥



सकलानि कषायकानि॥ हस्त्यश्ववाहनमतिश्रमणं रवि[illegible]भवति मेदकानां॥ मित्रप्रमेहगदपीडितमानवानां॥ मू
त्रवेगं धूमपानं स्वेदं शोणितमोक्षणं॥ सदासनं दिवा[illegible]संनिष्पावं पिष्टान्नानि मैथुनं॥ सौवीरकं
सुराशुक्तं तैलं क्षीरं घृतं गुडं॥ तुंवीनालास्थिम[illegible]मिक्षुदुष्टांवु स्वाद्वम्ललवणानि च॥ अभिष्यं
दि वयलेनप्रमेही परिवर्जयेत्॥ ॥इति प्रमेहे॥ ॥चिंताश्रम[illegible]द्वर्त्तनं लंघनमातपश्च॥ हस्त्यश्वयाने भ्रमणं दिरे
कः प्रच्छर्दनं चाप्यपतर्पणं च॥ पुरातना वैणवकोरदूषश्यामाक[illegible]यंगुजूर्णाः॥ यवाः कुलत्थाश्चणकामसूरा मुद्गाः सुव
र्चस्तु मधूनि लाजाः॥ कटूनि तिक्तानि कषायकानि तक्रं सुरा हिंगुटमक्षपत्रं॥ दग्धानि वार्त्ताकफलानि चापि फलत्रयं गुग्गुलुराय
संच॥ कटुत्रयं सर्षपतैलमेला रूक्षाणि सर्वाणि च मुस्तपत्तैलं॥ पत्त्राम्यशाकागुरुलेपनानि प्रतप्तनीराणि शिलाजतूनि॥ एतानि स
र्वाणि निषेवितानि मेदोमदं सत्वरमुत्क्षिपंति॥ स्नानं रसायनं शाली नो धूमान्सुखशीलतां॥ क्षीरं तु विकृतीर्माषान्सौहित्यस्वेद

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पथ्यापथ्य नानिच ॥ मत्स्यंमांसंदिवानिद्रांस्वगंधान्मधुराणिच ॥ च्यतिमात्रंत्रूपवितो विशेषाद्वमनक्रियां ॥ स्वभावस्य त्वमन्विच्छन्भेदस्वीपरिव
।।१८।। र्ज्जयेत् ॥ ॥इतिमेदसि ॥ ॥ विरेचनंलंघनमद्व संभवाः कुलत्थमुद्गारुणशाल्वयोयवाः ॥ मृगद्विजाजांगलसंज्ञयान्विताः पेयासुरा
माक्षिकसीधुमाधवाः ॥ तक्रंरसोनोरुबुतैलमार्द्रकंशालिंच शाकंकुलकंकठिल्लकं ॥ पुनर्नवाशिग्रुफलंहरीतकीतांबूलमेलाय
वशूकमायसं ॥ अजागवोष्ट्रीमहिषीपयोजलंलघूनितीक्ष्णानिवदीपनानि ॥ वस्त्रेणसंवेष्टनमग्निकर्मतातिविषप्रयोगास्त्वमुतो
यथायथं ॥ विशेषतःप्लीहसमुद्भवेपुनर्वमिप्रवाहोधमनीव्यधःपरं ॥ त्र धमाद्वयेचोदरजेस्तोत्थितेनाभेरधःशस्त्रविधिर्य
थाविधिः ॥ समीरणोत्थेघृतपानमादितःसाभ्यंजनंवाप्यनुवासनंतथा ॥ यथामलंपथ्यगणोयमाश्रितःसरवान्दणांस्पादुदराम
यसति ॥ सस्नेहनंधूमपानंजलपानंशिराव्यधं ॥ वर्द्धियानंदिवास्वप्नंव्यायामंपिष्टवैकृतं ॥ औदकानूपमांसानिपत्रशाकानि
लानपि ॥ उस्त्राणिचविदाहीनिलवणान्यम्लानिच ॥ मद्देंद्रगिरिजातानांसरितांसलिलानिच ॥ शामीधान्यंविरुद्धान्नंदुष्टनीरं

राम ।।१८।।

गुरूणिच ॥ विष्टंभीनिविशेषात्तुस्वेदंविष्टंभसंभवे ॥ वर्ज्जयेदुदरव्याधिविधुरस्तन्निजेंयसः ॥ ॥इत्युदररोगे ॥ ॥ संशोधनंलंघनम
स्त्रमोक्षःस्वेदःप्रलेपःपरिषेचनंच ॥ पुरातनाःशालियवाःकुलत्थामुद्गाश्चगोधापिचशल्लकोपि ॥ भुजंगभुक्तित्तिरिताम्रचूड
लावादयोजांगलविष्किराश्च ॥ कूर्मोपिशृंगीत्रपुराणसर्पिस्तक्रंसुरामाक्षिकमासवश्च ॥ निष्पावकाठिल्लकरक्तशिग्रु
रसोनकर्कोटकवालमूलं ॥ सुवर्चलागृंजनकःपटोलंवेत्राग्रधात्रीफलमूलकानि ॥ पुनर्नवाचित्रकपारिभद्रश्रीपर्णिनिंबे
क्षुरपल्लवानि ॥ एरंडतैलंकटुकाद्वहरिद्राहरीतकीक्षारनिषेवणंच ॥ भल्लातकंगुग्गुलुरायसंचकटूनितिक्तानिचदीपना
नि ॥ मूत्राणिगोजामहिषीभवानिकस्तूरिकाचापिशिलाजतूनि ॥ यत्पांडुरोगेश्वपिवह्निकर्मपुराप्रदिष्टंचतदेवचापि ॥
यथामलेपथ्यमिदंनिरुक्तंशोथामलान्सत्वरमुच्छिनत्ति ॥ ग्राम्यानूपंपिशितलवणंशुष्कशाकंनवान्नंगौडंपिष्टंदधिस
कृसरंविज्जलंमद्यमम्लं ॥ धान्यावल्लूरशैमेनमथोगुर्व्यसात्म्यंविदाहिस्वप्नंरात्रौश्वयथुगदवान्वर्ज्जयेन्मैथुनंच ॥ ॥इति

पथ्यापथ्य शोथे ॥ ॥ संशोधनंवस्तिरसृग्विमोक्षःस्वेदःप्रलेपोरुणशालयश्च ॥ एरंडतैलंसुरभीजलंचधन्वामिषंशिग्रुफलंपटोलं ॥ पुनर्न
।।१९।। वागोक्षुरकाग्निमंथतांबूलपथ्यासरणारसोनाः ॥ वार्तिगनंगृंजनकंमधूनिशुभंघृतंतप्तजलंचतक्रं ॥ यदामवातापद्दमग्नि
कारितदन्नपानंचसुराःपुराणाः ॥ अर्धेन्दुवद्दत्तणयोश्चदाहोव्यत्यासतोवाद्दुशिराव्यधश्च ॥ यथाश्रुतंशास्त्रविधिश्चव
र्गःस्याद्वृध्मठद्धामयिनांसुखाय ॥ आनूपमांसानिदधीनिमाषाद्दुष्टानिपिष्टान्नमुपोदिकाच ॥ गुरूणिमुक्तोत्थित
वेगरोधाःस्युर्वृध्मद्दामयिनामभित्राः ॥ ॥इतिवृध्मद्धामये ॥ ॥ छर्द्दिर्विरेचनंनस्यंस्वेदोधूमःशिराव्यधः ॥ अग्नि
कर्मक्षारयोगःप्रलेपोलंघनानिच ॥ पुराणघृतपानंचजीर्णालोहितशालयः ॥ यवामुद्गाःपटोलंचरक्तशिग्रुक
ठिल्लकं ॥ शालिंचशाकंवेत्राग्रंरूक्षाणिचकटूनिच ॥ दीपनानिचसर्वाणिगुग्गुलुश्चशिलाजतु ॥ विशेषाद्गलगंडेषु
छित्वाजिह्वातलेशिरे ॥ कुर्याद्दामणिवंधाद्वैलेखाक्षिसोंगुलांतरा ॥ गलगंडगंडमालापचीग्रंथ्यर्बुदांतरे ॥ यथा

राम ।।१९।।

दोषंयथावस्थंपथ्यमेतत्प्रकीर्त्तितं ॥ दुग्धेक्षुविकृतीःसर्वामांसंचानूपसंभवं ॥ पिष्टान्नमम्लंमधुरंगुरुर्वभिष्यंदिकादिच ॥ गलगंडगंडमा
लापचीग्रंथ्यर्बुदामयान् ॥ विकिक्सन्नगदंकारोयशोर्थीपरिवर्जयेत् ॥ ॥इतिगलगंडादिषु ॥ ॥ प्रच्छर्द्दनंलंघनमस्त्रमोक्षःस्वेदो
विरेकःपरिलेपनंच ॥ पुरातनाःषष्टिकशालयश्चयवाःकुलत्थालशुनंपटोलं ॥ वार्त्ताकशोभांजनकारवेल्लंपुनर्नवामूलकपो
दिकाच ॥ एरंडतैलंसुरभीजलंचकटूनितिक्तानिचदीपनानि ॥ गुल्फोपरिष्टाच्चतुरंगुलेचवाताङ्कवेगुल्फतलेतुपैत्ते ॥ अंगुष्ठमू
लेकफजेविशेयात्सिराव्यधश्चापियथाविधानं ॥ एतानिपथ्यानिभवंतिपुंसोरोगेसतिश्लीपदनामधेये ॥ पिष्टान्नंदुष्टंगधविकृतिंगुड
मानूपमामिषं ॥ स्वादुंरसंपायसपायसंसिंधुविंध्यनदीजलं ॥ पिच्छिलंगुर्वभिष्यंदिश्लीपदीपरिवर्जयेत् ॥ ॥इतिश्लीपदे ॥ ॥ आमावस्था
स्वनानिलपःस्वेदासंमोक्षणं ॥ जीर्णाःश्यामाककलमाःकुलत्थालशुनानिच ॥ रक्तशिग्रुश्चनिष्पावःकारवेल्लंपुनर्नवा ॥ श्रीप
र्णीचित्रकंक्षोद्रंशोथाक्ता निचसर्वशः ॥ पक्वावस्थेशस्त्रकर्मपुराणरक्तशालयः ॥ घृतंतैलंमधुरसोविलेपीधन्वजारसाः ॥ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection


पथ्यापथ्य ॥२०॥
शालिंनशाकंकदलंपटोलंहिमवालुका॥चंदनंसप्तशीतांवुसर्वंवापिव्रणेणादितं॥नराणांविद्रधौवाधौयथावस्थंयथामलं॥प
थ्यान्येतानिसर्वाणिनिर्दिष्टानिमहर्षिभिः॥शोथिनां यान्यपथ्यानिव्रणिनामहितानिच॥क्रमोदामेवपक्वेचविद्रधौवर्जयेन्नरः
॥ ॥इतिविद्रधौ॥ ॥विम्लापनंरक्तमुक्तिरुपनाहोविपाटनं॥शोधनंरोपणं षष्टं पुराणाःसितशालयः॥यवषष्टिकगोधूमाजांगला
मृगपक्षिणः॥विलेपीलाजमंडश्चकटुतैलंघृतंमधु॥तैलंमसूरतुवरीमुद्गयूषाश्चशर्कराः॥आषाढफलवौर्न्नाककर्कोटकप
टोलकं॥कारवेल्लंनिंवपत्रंवेत्राग्रंवालमूलकं॥सुनिषण्णकशालिंचतंडुलीयकवास्तुकं॥त्रिफलापनसंचोचंदाडिमंकटुका
फलं॥जीवंतीसैंधवंद्राक्षास्वादुतिक्तकषायकाः॥समस्तमेतदन्नंतुस्निग्धमुष्णंद्रवोत्तरं॥उशीरवालव्यजनंचंदनंतिललेपनं॥
तत्रशीतांवुकर्पूरंवैकृतापहृतिःपरा॥एतत्पथ्यंनरैःसेव्यंपथ्यापथ्यंयथामलं॥व्रणशोथेव्रणेसद्योव्रणेनाडीव्रणेपिच॥ राम ॥२०॥
नवानिधान्यानितिलान्कषायान्माषान्कुलत्थान्कृशरान्हिमांभः॥क्षीरेक्षुजातान्विविधान्विकारानम्लानिशाकानिचपात्र


वंति॥अजांगलंमत्स्यमसात्म्यमन्नंविदाहिविष्टंभिगुरूणिचापि॥कद्वम्लशीतंलवणंव्यवायमायासमुच्चैःपरिभाषणंच॥स्त्रिया
समालोकनमग्निनिद्राप्रजागरंचंक्रमणंनितांतं॥सदास्थितिद्राग्धिरोपणंचनस्नानितंतूलमजीर्णतांच॥प्रचंडवातातपधू
मदृष्टिरजोभयक्रोधवमिंमहर्मीत॥शोकंविरुद्धाशनमंवुपानंतीक्ष्णानरूक्षाणिविघट्टनेच॥कंडूयनंकाष्ठनखादिनोदंति
रत्नमावंविषमासनंवा॥वैद्यःविकित्सन्व्रणशोथरोगंव्रणेचसद्योव्रणमाममेच॥नाडीव्रणेचापियशोभिलाषीविवर्जयेत्संततं
मप्रमत्तः॥ ॥इतिव्रणशोथव्रणसद्योव्रणनाडीव्रणेषु॥शीतांवुसेवनंपंकप्रदेहोवंधनक्रिया॥शालिप्रियंगुगोधूमयूषामुद्गस
तीनयाः॥नवनीतंघृतंक्षीरंतैलंमांसरसोमधु॥पटोलंलशुनंशिग्रुपत्तूरोवालमूलकं॥द्राक्षाधात्रीवज्रपर्णीलाक्षायश्चापिटं
दुणं॥तत्सर्वंभिषजारिष्टंभिषग्भग्नोपजायते॥लवणंकटुकंक्षारमम्लंमैथुनमातपं॥व्यायामंचनसेवेतभग्नोरूक्षान्नमेवच॥ ॥
इतिभग्ने॥ ॥चामसंप्राधमंलेपोलंघनंरक्तमोक्षणं॥पक्वेपुनःशस्त्रविधिस्तथाक्षाराग्निकर्मच॥सर्वत्रशालयोमुद्गाविलेपीजां


पथ्यापथ्य ॥२१॥
गलोरसः॥पटोलंशिग्रुवेत्राग्रंपत्तूरोवालमूलकं॥तिलसर्षपयोस्तैलंतिक्तवर्गोघृतंमधु॥एतत्पथ्यंनरैःसेव्यंयथादोषंभगं
दरे॥व्यायामंमैथुनंयुद्धंपृष्ठयानंगुरूणिच॥संवत्सरंपरिहरेदपिमूढव्रणोनरः॥ ॥इतिभगंदरे॥ ॥छर्दिर्विरेकोध्वजमध्यन
डीवेधोजलौकःपरिपातनंच॥सेकःप्रलेपोयवशालिमन्नधन्वामिषंमुद्गरसोघृतानि॥कठिल्लकंशिग्रुफलंपटोलंशालिं
चशाकंनवमूलकंच॥तिक्तंकषायंमधुकूपवारितैलंवदन्त्याढ्युपदंशरोगे॥दिवानिद्रांमूत्रवेगंगुर्वन्नंमैथुनंगुडं॥अम्लंतमन्ने
तक्रंचवर्जयेदुपदंशवान्॥ ॥इत्युपदंशे॥ ॥लेपोविरेकोरक्तस्रावःसर्पिष्पानंचशालयः॥यवाजांगलमांसानिमुद्गयूषःकठि
ल्लकं॥पटोलंशिग्रुकर्कोटंपत्तूरंवालमूलकं॥वेत्राग्रमाषाढफलंदाडिमंसैंधवंवरा॥कूपादकंगंधसारःकस्तूरीहिमवा
लुका॥तिक्तंकषायंतैलंचस्यात्पथ्यंशूकदूषिणां॥मूत्रवेगंदिवानिद्रांव्यायामंमैथुनंगुडं॥विदाहिगुरुतक्रंचशूकदोषामा राम
यीत्यजेत्॥ ॥इतिशूकदोषे॥ ॥पञ्चात्यक्त्वाछेर्द्दनानिमासान्मासाद्विरेचनं॥नस्यंत्र्यहात्र्यहान्मासात्त्वक्स्त्वक्सस्त्रमोक्षणे॥स ॥२१॥


र्पिर्लेपश्चिरोत्पन्नायवगोधूमशालयः॥मुद्गाढकीमसूरादिमाहिकंजांगलामिषं॥आषाढफलवेत्राग्रपटोलवृहतीफ
लं॥काकमाचीनिंवपत्रंलशुनंहिलमोचिका॥पुनर्नवामेषशृंगीचक्रमर्ददलानिच॥भल्लातकंपक्वतालंखदिराश्चिन्नकोवरा॥जाती
फलंनागपुष्पंकुंकुमंचंदनंदधिः॥कोशातकीकरंजोचतिलसर्षपनिंवजं॥तैलंतथेंगुदोत्थंचवलपूत्यान्यानियानिच॥स्नेहाःसरलदे
वाह्वशिंशिपागुरुसंभवाः॥सर्वाणिगोखरोष्ट्राश्वमहिषीजनितानिच॥कस्तूरिकागंधसारस्तिक्तानिद्रारकर्मच॥यथादोषंस
मथिनस्त्यजयुः॥ ॥इतिकुष्ठे॥ ॥छर्दिर्विरेचनंलेपोरक्तस्रावोजीर्णशालयः॥जांगलेरामिषैर्मुद्गैःकुलत्थैर्वाकृतोरसः॥कर्कोट
कंकारवेल्लंशिग्रुमूलकपादिकाः॥शालिंचशाकंवेत्राग्रंदाडिमंत्रिफलामधु॥कटुतैलंतप्तनीरंपित्तम्लेष्महराणिच॥कटुतिक्तक
षायाणिसर्वाणीतिगणःस्मृतः॥शीतपित्तोदर्दकोठरोगिणांस्याद्यथामलं॥क्षीरेक्षुजातान्विविधान्विकारान्मत्स्यादकानूपभवा

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पथ्यापथ्य ॥२२॥

मिषाणि॥ नवीनमद्यं वमिवेगरोधः त्रणदद्दिण शापरक्तेन दिनिद्रा स्नानं विरुद्धान्नमात पुष्ट स्निग्धं तथाम्लं सधुरंव्यवायः॥
गुर्वन्नपानानि च शीतपीतकोष्ठामयादद्दंवतां विषाणि॥ ॥इति शीतपित्तकोठेषु॥ ॥ऊर्द्धगेवमनं पूर्वमधोगेन विरेचनं॥ सर्व
चान्वासनं पथ्या निरूहस्त्वापि शालयः॥ यवगोधूममुद्गाश्च पुराणा जांगलारसाः॥ जलानि तप्तशीतानि शर्करा मधुसक्तवः
कर्कोटकं कारवेल्लं पटोलं हिलमोचिका॥ वेत्राग्रं वृद्धकूष्माण्डं रंभापुष्पं वास्तुकं॥ कपित्थं दाडिमं धात्री तिक्तानि सकलानि
च॥ पानान्नानि समस्तानि कफपित्तहराणि च॥ अम्लपित्तामये नित्यं सेवितव्यानि मानवैः॥ वमिवेगं तिलान्माषान् कुलत्थांस्ते
लभक्षणं॥ अविदुग्धं च धान्याम्लं लवणाम्लकटूनि च॥ गुर्वन्नं दधिमद्यं च वर्जयेदम्लपित्तवान्॥ ॥इत्यम्लपित्ते॥ ॥विरेको
वमनं लेपो घनं रक्तविमोक्षणं॥ पुराणयवगोधूमे कंगुषष्टिक शालयः॥ मुद्गामसूराश्चणका स्तुवर्या जांगला रसः॥ नवनीतं
घृतं द्राक्षा दाडिमं कारवेल्लकं॥ वेत्राग्रं कुलकं धात्री खदिरो नागकेसरं॥ लाक्षा शिरीषः कर्पूरं चंदनं तिललेपनं॥ यथादोषं

राम ॥२२॥

पथ्यमिदं सेवितव्यं विसर्पिभिः॥ व्यायाममग्निं शयनं सुरतं प्रवातं क्रोधं सुवेगमनवेगमसूयनं च॥ गुर्वन्नपानमखिलं लसुनं
कुलत्थान्माषांस्तिलान्सकलमांसमजांगलं च॥ स्वेदं विदाहि लवणाम्लकटूनि मद्यमर्कप्रभामपि विसर्पगदी त्यजेत्तु॥ ॥इति
विसर्पेषु॥ ॥विरेचनं छर्द्दनलेपलंघनं पुराणशः नाः षष्टिकशालयो यवाः॥ मुद्गा मसूराश्चणकामकुष्ठकाधन्वामिषं गव्यघृतं
करिल्लकं॥ वेत्राग्रमाषाढफलं पटोलकं जपातिमुक्तीनिंबदलानि चंदनं॥ तैलं सिताभ्रस्ति ललेपनं वनं वालं च विस्फोटग
दान्विनाशयेत॥ स्वेदं व्यवायं व्यायामं क्रोधं गुर्वन्नमातपं॥ वमिवेगं पत्रशाकं प्रवातं शयनं दिवा॥ ग्राम्यौदकानूपमांसं विरु
द्धान्यशनानि च॥ तिलान्माषान्कुलत्थांश्च लवणाम्लकटूनि च॥ विदाहि रूक्षमुसलं च विस्फोटी परिवर्जयेत्॥ ॥इति विस्फोटे॥
पूर्वलंघनं वांतिरेकाशिरासवेधाः शशांकोज्वलाजीर्णाः षष्टिकशालयो पित्तणकामुद्गामसूराश्च यवाः॥ सर्वेपि पत्तुदाः क
पोतवटकाद्याः श्वदंष्ट्रा मूत्रकाजी कंजीवसुका दयोपि कुलकं काठिल्लमाषाढकं॥ कर्कोटकं कदलं च शिग्रुरुबकं द्राक्षाफ

पथ्यापथ्य ॥२३॥

लं दाडिमं मधुवृंदणामन्नपानमखिलं कोलानि मांसोरसः॥ अस्त्रेणोसेकविधौगवेधुमधुकोद्भूतसुशीतोदकं शंबूकोदरकोषनीर
मपि वाकर्पूरस्तूणीनिवा॥ पक्वेमुद्गरसो पिजांगलरसः शालिं च शाकं घृतं धूपो गोमय भस्मगुग्गुलमथो शोषेव्रणेक्षोक्रिया॥ इत्यंस
र्वदंष्ट्राविभागविहितं पथ्यं यथा दोषतः संयुक्तं सुखमाननोति निरंतरं नृणां मसूरे गदे॥ रतं स्वेदं श्रमं तैलं गुर्वन्नं क्रोधमातपं॥ कटु
म्लं वेगरोधश्च मसूरीगदवांस्त्यजेत्॥ ॥इति मसूरिकायां॥ ॥क्षुद्ररोगेषु सर्वेषु नानारोगानुकारिषु॥ दोषान्दूष्यानवस्थां च निरीक्ष्य मति
मान्नरः॥ तस्य तस्य च रोगस्य पथ्यापथ्यानि सर्वशः॥ यथादोषं यथा दूष्यं यथावस्थं सकल्पयेत्॥ ॥इति क्षुद्ररोगेषु॥ ॥स्वेदो
विरेको वमनं गंडूषः प्रतिसारणं॥ कवलो रक्तमोक्षश्च नस्यं धूमः शस्त्राग्निकर्म्मणी॥ तृणधान्यं यवा मुद्गाः कुलत्था जांगलो र
सः॥ वृद्धपुनीकारवेल्लं पटोलं बालमूलकं॥ कर्पूरनीरजो बूलतप्तांबु खदिरो घृतं॥ कटु तिक्तं च वर्गोयं मित्रं स्यान्मुखरोगि
णां॥ दंतकाष्ठं स्नानमम्लं मत्स्यमानूपमामिषं॥ दधि क्षीरं गुडं माषं रूक्षान्नं कठिनाशनं॥ अधोमुखेन शयनं गुर्वभिष्यं

राम ॥२३॥

दिकारि च॥ मुखरोगेषु सर्वेषु दिवानिद्रां च वर्ज्जयेत्॥ ॥इति मुखरोगे॥ ॥स्वेदो विरेको वमनं नस्यं धूमः शिराव्यधः॥ शृंगो
धूमः शालयो मुद्गा यवा भक्षपतनं दधि॥ लावो मयूरो हरिणस्तित्तिरिर्वनकुक्कुटः॥ पटोलं शिग्रुवार्त्ताकं मुनिषण्णकं ठिल्ल
कं॥ रसायनानि सर्वाणि ब्रह्मचर्यमभाषणं॥ उपयुक्तं यथादोषमिदं कर्णामये हितं॥ दंतकाष्ठं शिरः स्नानं व्यवायं श्लेष्म
लं गुरु॥ कंडूयनं तुषारं च कर्णरोगी परित्यजेत्॥ ॥इति कर्णरोगे॥ ॥स्थितिर्निर्वातनिलये प्रच्छादितं शिरः धारणं॥ गंडूषो
लंघनं नस्यं धूमश्छर्द्दिः शिराव्यधः॥ स्वेदः स्नेहः शिरोभ्यंगः पूतनांयवं शालयः॥ कुलत्थमुद्गयो यूषो ग्राम्यजांगलजार
साः॥ वार्त्ताकं कुलकं शिग्रु कर्कोटं बालमूलकं॥ लघु चंदधितप्तांबु वारुणी च कटुत्रयं॥ कट्वम्ललवणं स्निग्धं उष्णं च ल
घुभोजनं॥ नासारोगे पीनसादौ सेव्यते तत्सुखावहं॥ स्नानं क्रोधं शकृन्मूत्रवातवेगान्वशुचं द्रवं॥ भूशय्यां च यत्नेन नासा
रोगी परित्यजेत्॥ ॥इति नासारोगे॥ ॥आश्चोतनं लेपनमंजनं च स्वेदो विरेकः प्रतिसारणं च॥ नपूरणं नस्यमसृग्विमोक्षः श

CC-0. Nepal Sanskrit Academy, Kathmandu Collection



पथ्यापथ्य ॥२४॥

खक्रियालेपवमनञ्जपानं॥ सेकोमनो निर्द्धतिरंद्रिपूजा गुडाय वालोदितशालयश्च॥ वालोमयूरो वनकुक्कुटश्च कूर्म्म
कुलिंगो पिकपिंजलश्च॥ कोमंदविर्वन्पकुलत्थयूषपेयाविलेपी लशुनं पटोलं॥ वार्त्ताकुकर्कोटककारवेल्लं नवीन
मोचंनवमूलकंच॥ पुनर्नवामार्कववकाकमाची पत्रशाकानि कुमारिकाश्च॥ कुस्तुंवुरुः शीरकमाणिमंथंलोध्रवराक्षो
द्रसुपाहतश्च॥ नारी पयश्चवनमिंदुरवंडं तिक्तानि मर्षाणि लघूनिचापि॥ विजानता पथ्यमिदं प्रयुक्तं यथामलं नेत्रगदं
निहंति॥ क्रोधं शुचं मैथुनमश्रुवायुविरोधमूत्रं च निद्रां वमिवेगरोधं॥ सत्नमेत्तणं च रविं विपर्यं च स्नानं निशाभोजनमातपं च॥
प्रजल्पनं छर्दनमंवुपानमधूकपुष्पं दधिपत्रशाकं॥ कालिंगपिण्याककविस्रुकांजिकमत्स्यं सुरां मासमजांगलं च॥ तांवू
लमम्लं लवणं विदाहि तीक्ष्णं कटूष्णं गुरुवान्नपानं॥ स्रोतःसेवेन हितं भिलाषी सर्वेषु रोगेषु दृगाश्रयेषु॥ ॥इति नेत्ररो
गे॥ ॥स्वेदो नस्यं धूमपानं विरेको लेपः सेको लंघनं शीर्षवस्तिः॥ रक्तोन्मुक्तिर्वह्निकर्म्मोपनाहो जीर्णं सर्प्पिः शालयः ष

राम ॥२४॥



ष्टिकाश्च॥ यूषं दुग्धं धन्वमांसं पटोलं शिग्रुर्द्राक्षा वास्तुकं कारवेल्लं॥ आम्रं धात्री दाडिमं मातुलुंगं तैलं तक्रं कांजिकं नारिकेलं
पथ्याकुष्ठं भृंगराजः कुमारी मुक्ता शीरं चंद्रिका गंधसारः॥ कर्पूरं च ख्यातिमाने षवर्गः सेव्यामर्त्यैः शीर्षरोगे यथास्वं॥ क्षवं जृं
भां मूत्रवाष्पनिद्रा विड्वेगमाननं॥ दुष्टनीरं विरुद्धान्नं विरुद्धं जलमज्जनं॥ दंतकाष्ठं दिवानिद्रां शिरोरोगी परित्यजेत्॥ ॥इति
शिरोरोगे॥ ॥यत्पथ्यं यदपथ्यं च रक्तपित्तेषु कीर्तितं॥ प्रदरे पि यथादोषं तत्तु नारी भजेन्नजेत्॥ वातव्याधिवतां पथ्यमप
थ्यं च यदीरितं॥ योनिव्यापत्सु सर्वासु तद्विद्याच्च यथामलं॥ शालयः षष्टिका मुद्गा गोधूमा लाजसक्तवः॥ नवनीतं घृतं क्षीर
रसालामधुशर्करा॥ पनसं कदलं धात्री द्राक्षाम्रं स्वादु शीतलं॥ कस्तूरी चंदनं माला कर्पूरमनुलेपनं॥ चंद्रिका स्नानमभ्यंग
मृदुशय्या हिमानिलः॥ संतर्प्पणं प्रियावाचो विहारा श्रमनोरमाः॥ प्रियवर्गान्नपानं गर्भिणीभ्यो हितं सदा॥ स्वेदनं वमनं क्षारं
कलहं विषमासनं॥ असात्म्यनक्तसंचारं शोकं वा प्रियदर्शनं॥ अतिव्यवायमायासं भारं प्रावरणं गुरु॥ अकालजागरस्वप्नं कठिनो



पथ्यापथ्य ॥२५॥

त्कटकासनं॥ शोकक्रोधभयोद्वेषश्रद्धावेगविधारणं॥ उपवासाध्वतीक्ष्णोष्णगुरुविष्टंभिभोजनं॥ रक्तनिस्सारणं श्वभ्रकूपे
क्षामद्यमामिषं॥ उत्तानशयनं यच्च स्त्रियं नेच्छंति तत्त्यजेत्॥ तथा रक्तस्रुतिं शुद्धिं वस्तिमामासतो ष्टमात्॥ एभिर्गर्भः स्रवेदामः
कुक्षौ शुष्येन्म्रियेत वा॥ भजेच्च नित्यं विकाम्लं कटूष्णकषायकान्॥ वातलैश्च भवेद्गर्भः कुब्जांधजडवामनः॥ पित्तलैः खलतिः
पिंगः श्वित्री पांडुः कफात्मभिः॥ अपथ्यमिदमुद्दिष्टं गोर्भिणीनां महर्षिभिः॥ सूतिकारव्येषु रोगेषु वातश्लेष्मोद्भवेषु न॥ तत्र रोगानुकूलं
षु पथ्यापथ्यानि निर्दिशेत्॥ ॥इति स्त्रीरोगे॥ ॥यत्पथ्यं यदपथ्यं च नृणामुक्तं ज्वरादिषु॥ तत्तद्विधेयमौचित्याद्वालानां तेषु जानता
पूर्वपथ्यमपथ्यं च मंदाग्न्यायत्पकीर्तितं॥ औचित्यान्नद्विधेयानां वालानां पारिगर्भिके॥ आगंतत्सादिनां पथ्यमपथ्यं च यदीरितं॥
औचित्याद्योजयेत्तत्तु वालेषु ग्रहरोगिषु॥ ॥इति वालरोगे॥ ॥अरिष्टवंधनं मंत्रं युक्तिं शीर्द्धं विरेचनं॥ जागरं शोणिताकृष्टिः परिषे
कावगाहनं॥ हृदयावरणं नस्यमंजनं परिसारणं॥ उद्वर्त्तनं प्रधमनं प्रलेपा वह्निकर्म च॥ उपधानं प्रति विषं धूपः संज्ञाप्रवोध

राम ॥२५॥



पथ्यापथ्य ॥२६॥

नं॥ शालयः षष्टिका श्चापि कोरदूषः प्रियंगुकः॥ मुद्गा हरेणवस्तैलं सर्प्पिश्चापि नवं कवित॥ शिखितित्तिरिलावैणगोधाखुल्ला
विकामिषं॥ वार्त्ताकं कुलकं धात्री निष्पाव तंडुलीयकं॥ मंडूकपर्णी जीवंती सुनिषण्णमुपोदिका॥ कालशाकं च लशुनं दाडि
मं च विकंकतं॥ प्राचीनामलकं पथ्या कपित्थं नागकेसरं॥ गोह्वागनरमूत्राणि तक्रं शीतांवु शर्क्करा॥ अविदाही निपान्ना निसैंधवं
मधु कुंकुमं॥ पश्चिमोत्तरवाता श्च दरिद्रा मितचंदनं॥ मुस्ता शिरीषकस्तूरी तिक्तानि मधुराणि च॥ हेमचूर्णानि वर्गोयं पथ्यावस्थं यथा
विधं॥ विषरोगेषु सर्वेषु प्रयोक्तव्यो विजानता॥ क्रोधं विरुद्धाध्यशनं व्यवायं तांवूलमायासमपि प्रवातं॥ अन्नं च सर्वं लवणं च सर्वं संस्वे
दनं तद्विविधानि तानि॥ निद्राभयं धूमकटुत्नुधां च विषातुरो नैव भजेत्कदाचित्॥ ॥इति विषे॥ ॥इति पथ्यापथ्यसंग्रहः॥ ॥सं ७७
चैत्रकृष्ण ९ भौमे ॥श्रीरामस्येदं पुस्तकं॥ ॥श्रीरस्तु॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥

त्मा १ ॥पकपावनू औषध॥ १प्रॉवजासारगंधक॥ ग्वालेरीगेरू॥ सु
पेदजी[illegible]॥ समलेवू ऽऽ२५

राम ॥२६॥



दशस्थानसमो चक्री दशचक्रीसमो ध्वजः दशध्वजसमो वेस्या दशवेस्यासमो न्रपः १

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वीर पुस्तकालय तथा राष्ट्रिय अभिलेखालयबाट प्रकाशित पुस्तकहरूको सूची

क्र.सं.	पुस्तकको नाम
१	अभिलेख (अंक १ देखि ३८ सम्म)
२	सूचीपत्र बौद्ध विषयक हस्तलिखित ग्रन्थहरू
३	सूचीपत्र हस्तलिखित नेपाली चिठ्ठी पत्र
४	नेपाली भाषामा लेखिएका हस्तलिखित ग्रन्थहरूको वर्णनात्मक सूचीपत्र
५	आयुर्वेद विषयका हस्तलिखित ग्रन्थहरूको सूचीपत्र
६	देवनागरी लिपिका हस्तलिखित ग्रन्थहरूको सूचीपत्र
७	Catalogue of Tibetan Manuscripts (Vol. 1 to 10)
८	Catalogue of Guthi Paper (Vol. 1 to 2)
९	भूमिसम्बन्धी तमसुक ताडपत्र (अंक १ देखि ४ सम्म)
१०	कान्तिपुर शिलालेख सूची (अंक १ देखि ४ सम्म)
११	पुष्प चिन्तामणि
१२	राजविधान सार
१३	हस्तमुक्तावली
१४	अश्वमेधीय यात्रा
१५	ऐतिहासिक चिठ्ठीपत्र (अंक १ देखि ३ सम्म)
१६	कृत्यवाटिका
१७	बृहत् सूचीपत्र (अंक १ देखि १० सम्म)
१८	ब्रह्मशान्ति
१९	वास्तुशास्त्रीय ग्रन्थहरूको संक्षिप्त अध्ययन
२०	PAINTED ILLUSTRATIONS OF THE MANUSCRIPT COVERS IN NATIONAL ARCHIVES FROM NEPAL
२१	व्रतकल्पलतिका
२२	व्रतरत्न माला
२३	अगस्त्यसंहिता रत्न परीक्षा (वी.पु.)
२४	हरमेखला पूर्वीखण्ड
२५	हरमेखला मध्यखण्ड
२६	SAARC Voyage from Banglore to Kathmandu
२७	ऐतिहासिक कुण्डली
२८	सिद्धान्त सारिणी
२९	भक्तपुर शिलालेख सूची
३०	संक्षिप्त सूचीपत्रम् (वी.पु.)
३१	सूचीपत्र ऐतिहासिक चिठ्ठीपत्र संग्रह
३२	नेपालभाषामा लेखिएका हस्तलिखित अभिलेख ग्रन्थहरूको वर्णनात्मक सूचीपत्र
३३	श्रीमद्‌वराहमिहिराचार्य विरचितम् विवाहपटलम्
३४	शिवधर्मोत्तर (शिवधर्म पुराण द्वितीयखण्ड)
३५	अजीर्णमञ्जरी (नेपाली-भाषानुवादसहित)
३६	वास्तु शास्त्र
३७	लिपि तालिका
३८	अनुपानमञ्जरी (प्रज्ञा नेपाली टीकासहिता)
३९	परातन्त्र
४०	प्रथम लगत (प्रथम भाग), (द्वितीय भाग)
४१	दङ्गीशरण कथा (प्रबन्धकाव्य)
४२	राघवभट्टविरचित कालीतत्त्व

नेपाल सरकार
संस्कृति, पर्यटन तथा नागरिक उड्डयन मन्त्रालय
राष्ट्रिय अभिलेखालय
रामशाहपथ, काठमाडौं, नेपाल
फोन नं.: ०१-४२००८५६, ०१-४२००८४५, ०१-४२००८४६
वेवसाईट: www.narchives.gov.np, ईमेल: mail@narchives.gov.np

CC-0. Nepal Sanskrit Academy, Kathmandu Collection